# रघुवंश-महाकाव्यम्

## त्रयोदशः सर्गः

**प्रसङ्गः**- रावणं विजित्य विमानेन लङ्कातः अयोध्या-गमनावसरे मार्गे सागरमवलोक्य रामः सीतां कथयति-

**अथात्मनः शब्दगुणं गुणज्ञः,**
**पदं विमानेन विगाहमानः।**
**रत्नाकरं वीक्ष्य मिथः स जायां,**
**रामाभिधानो हरिरित्युवाच ॥ 1 ॥**

**अन्वयः**- अथ शब्दगुणम् आत्मनः पदम् विमानेन विगाहमानः गुणज्ञः, स रामाभिधानः हरिः रत्नाकरं वीक्ष्य मिथः जायाम्, इति उवाच।

**व्याख्या**- अथ = लङ्कायाः अयोध्यां प्रति प्रस्थानानन्तरम्। शब्दगुणम् = आकाशम्। आत्मनः = स्वस्य। पदम् = स्थानम्। विमानेन = पुष्पकविमानेन। विगाहमानः = प्लवमानः। गुणज्ञः = गुणवेत्ता। सः = सुप्रसिद्धः। रामाभिधानः = रामनामकः। हरिः = भगवान् विष्णुः। रत्नाकरम् = समुद्रम्। वीक्ष्य = विलोक्य। मिथः = रहसि। जायाम् = पत्नीम् सीताम्। इति = एवम्। उवाच = अकथयत्।

अत्र उपजातिः छन्दः। इदं छन्दः वस्तुतः द्वयोः छन्दसोः मिश्रणात् सञ्जायते - इन्द्रवज्रा, उपेन्द्रवज्रा च इत्यनयोः। तयोः क्रमशः लक्षणं च इत्थम्-

**स्यादिन्द्रवज्रा यदि तौ जगौ गः** इति इन्द्रवज्रा ॥

तगणः तगणः जगणः गुरुद्वयं चेति।

अथ- **उपेन्द्रवज्रा जतजास्ततो गौ** इति उपेन्द्रवज्रा॥

जगणः तगणः जगणः गुरुद्वयं चेति।

यस्मिन् पद्ये च चतुर्षु अपि चरणेषु एकमेव छन्दः सङ्घटते- तत्पद्यं तन्नाम्ना एव ज्ञातव्यम्। केवलं मिश्रण-दशायामेव उपजातिः सम्भवति इति। अस्मिन् सर्गे च (त्रयोदशे इति) सप्तषष्टितम-पद्य-पर्यन्तम् इदमेव छन्दः प्रयुक्तम्।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

अथ + आत्मनः = अथात्मनः - स्वरसन्धिः, सवर्णदीर्घः।

रत्न + आकरम् = रत्नाकरम् - स्वरसन्धिः, सवर्णदीर्घः।

सः + जायाम् = स जायाम् - विसर्गसन्धिः, विसर्गलोपः।

राम + अभिधानः = रामाभिधानः - स्वरसन्धिः, सवर्णदीर्घः।

रामाभिधानः + हरिः = रामाभिधानो हरिः - विसर्गसन्धिः, उत्वम्।

हरिः + इति = हरिरिति- विसर्गसन्धिः, रुत्वम्।

इति + उवाच = इत्युवाच - स्वरसन्धिः, यण्।

**समास-परिचयः-**

शब्दगुणम् - शब्दः गुणः यस्य तत् - बहुव्रीहिः।

गुणज्ञः - गुणानां ज्ञः इति - षष्ठीतत्पुरुषः।

रत्नाकरः - रत्नानाम् आकरः - षष्ठीतत्पुरुषः।

रामाभिधानः - 'राम' इति अभिधानं यस्य सः इति-बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विगाहमानः - वि + गाह् धातुः + शानच् - पु. प्र. ए. व.।

वीक्ष्य - वि + ईक्ष् धातुः + ल्यप् - अव्ययप्रत्ययः।

**प्रसङ्गः**- रावणवधानन्तरं पुष्पकविमानेन पत्न्या सीतया सह लङ्कातः आगच्छन् रामः मार्गे विशालसागरम् अवलोक्य तां प्रति एवम् अकथयत्-

**वैदेहि पश्यामलयाद् विभक्तं**
**मत्सेतुना फेनिलमम्बुराशिम्।**
**छायापथेनेव शरत्प्रसन्नम्**
**आकाशमाविष्कृतचारुतारम् ॥ 2 ॥**

**अन्वयः** - हे वैदेहि! छायापथेन विभक्तम् शरत्प्रसन्नम्, आविष्कृतचारुतारम्, आकाशम् इव आमलयात् मत्सेतुना विभक्तं फेनिलम् अम्बुराशिं पश्य।

**व्याख्या**- वैदेहि! = सीते! छायापथेन = आकाशगङ्गया। विभक्तम् = द्विधाकृतम्। शरत्प्रसन्नम् = शरदि प्रसन्नम् = स्वच्छम्। आविष्कृतचारुतारम् = प्रकटितशोभनतारकम्। आकाशम् = गगनम्। इव = उपमार्थकं पदम् इदम्। आमलयात् = मलयगिरिपर्यन्तम्। मत्सेतुना = मया रचितेन सेतुना। विभक्तम् = द्विधाकृतम्। फेनिलम् = डिण्डीरयुक्तम्। अम्बुराशिम् = सागरम्। पश्य = विलोकय।

सीते! आकाशगङ्गया विभक्तं शरन्निर्मलं प्रस्फुट-रम्यनक्षत्रं नील नभोमण्डलमिव, रावणात् तव उद्धाराय मलयगिरिपर्यन्तं मन्निर्मितसेतुना द्विधा कृतम् इमं फेनवन्तं सागरमवलोकय। उपमालङ्कारः, इन्द्रवज्रा छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पश्य + आमलयात् = पश्यामलयात् - स्वरसन्धिः, सवर्णदीर्घः।

आमलयात् + विभक्तम् = आमलयाद्विभक्तम् - व्यञ्जनसन्धिः, जश्त्वम्।

छायापथेन + इव = छायापथेनेव - स्वरसन्धिः, गुणः।

आविः + कृतम् = आविष्कृतम् - विसर्गसन्धिः, सत्वं,षत्वम्।

**समास-परिचयः-**

मत्सेतुना - मम सेतुना इति षष्ठीतत्पुरुषः।

अम्बुराशिम् - अम्बूनां राशिः इति - षष्ठीतत्पुरुषः।

छायापथेन - छायायाः पथा इति - षष्ठीतत्पुरुषः।

आविष्कृतचारुतारम् - आविष्कृता चारुताराः यस्मिन् येन वा इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विभक्तम् - वि + भज् धातुः + क्तप्रत्ययः - नपुं. द्वि. ए. व।

प्रसन्नम् - प्र + सद् धातुः + क्तप्रत्ययः - नपुं. द्वि. ए. व।

आविष्कृता - आविः + कृ-धातुः - स्त्री. प्र. ए. व.।

**प्रसङ्गः**- रामः कथयति यत् सीते ! पूर्वम् अश्वमेघे मदीयपूर्वजैः अयं समुद्रः भूमिं खनित्वा परिवर्धितः-

**गुरोर्यियक्षोः कपिलेन मेध्ये,**
**रसातलं सङ्क्रमिते तुरङ्गे।**
**तदर्थमुर्वीमवदारयद्भिः,**
**पूर्वैः किलायं परिवर्धितो नः ॥ 3 ॥**

**अन्वयः**-यियक्षोः गुरोः, मेध्ये तुरङ्गे कपिलेन, रसातलं सङ्क्रमिते, (सति) तदर्थम् उर्वीम् अवदारयद्भिः नः पूर्वैः अयं परिवर्धितः किल

**व्याख्या**- यियक्षोः = अश्वमेधयज्ञं कर्तुमिच्छुकस्य। गुरोः = पितुः सगरस्य। मेध्ये = यज्ञीये। तुरङ्गे = अश्वे। कपिलेन = तन्नामकेन मुनिना। रसातलम् = पातालम्। सङ्क्रमिते = प्रापिते सति (यद्यपि इन्द्रेण यज्ञस्य अश्वः रसातलं प्रापितः, तथापि भ्रान्तिवशात् सगरपुत्रः कपिलम् एव तस्य अपहर्त्तारम् अमन्यत।) तदर्थम् = अश्वार्थम्। उर्वीम् = भूमिम्। अवदारयद्भिः। नः = अस्माकम्। पूर्वैः = पूर्वजैः। अयम् = एषः समुद्रः। परिवर्धितः = वृद्धिं प्रापितः। किल = निश्चयेन।

अयि प्रिये! यागं कर्तुमिच्छोः पितुः सगरस्य पवित्रे अश्वे कपिलेन मुनिना रसातलं प्रापिते सति तस्य अन्वेषणाय वसुधां खनद्भिः अस्माकं पूर्वजैः सगरपुत्रैः एष समुद्रः विवर्धितः इति ऐतिहासिकी कथा। अस्मादेव कारणादेष समुद्रः सागरनाम्ना संसारे प्रसिद्धो जातः। इत्थमस्माकं पूर्वजानाम् अयम् सागरः अक्षयकीर्तिस्तम्भोऽपि वर्तते। अत्र उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

गुरोः + यियक्षोः = गुरोर्यियक्षोः - विसर्गसन्धिः, रुत्वम्।

तत् + अर्थम् = तदर्थम् - व्यञ्जनसन्धिः, जश्त्वम्।

किल + अयम् = किलायम् - स्वरसन्धिः, सवर्णदीर्घः।

परिवर्धितः + नः = परिवर्धितो नः - विसर्गसन्धिः, उत्वम्।

**प्रकृति-प्रत्यादि-परिचयः-**

यियक्षोः - यज् धातुः + सन् + उ प्रत्ययः - पुं. ष. ए. व.।

सङ्क्रमिते - सम् + क्रम् धातुः + क्तप्रत्ययः- पुं. स. ए. व.।

अवदारयद्भिः - अव + दृ धातुः (णिजन्तः) + शतृ - पुं. तृ. ब. व.।

परिवर्धितः - परि + वृध् + धातुः (णिजन्तः) + क्तप्रत्यः- पुं. प्र. ए. व.।

**प्रसङ्गः**- रामः समुद्रस्य महत्त्वं वर्णयन् सीतां प्रति कथयति-

**गर्भं दधत्यर्कमरीचयोऽस्माद्,**
**विवृद्धिमत्राश्नुवते वसूनि।**
**अबिन्धनं वह्निमसौ बिभर्ति,**
**प्रह्लादनं ज्योतिरजन्यनेन ॥ 4 ॥**

**अन्वयः**- अस्माद् अर्क मरीचयः गर्भं दधति। अत्र वसूनि विवृद्धिम् अश्नुवते। असौ अबिन्धनं वह्निं बिभर्ति। अनेन प्रह्लादनं ज्योतिरजनि।

**व्याख्या-** अस्मात् = सागरात्। अर्कमरीचयः = सूर्यकिरणाः। गर्भम्=अन्तःपूर्णताम्, वृष्टिजलम्। दधति = धारयन्ति। अत्र = सागरे। वसूनि= धनानि, विवृद्धिम् = विशेषेण वृद्धिं (विकासं)। अश्नुवते = प्राप्नुवन्ति। असौ = समुद्रः। अबिन्धनम् = आपो जलानि इन्धनं दाह्यं यस्य स तम्। वह्निम् = अग्निम् वाडवानलमित्यर्थः। बिभर्ति = धारयति। अनेन = सागरेण। प्रह्लादनम् = आह्लादकं। ज्योतिः = चन्द्रः। अजनि = जनितम्।

सूर्यकिरणा अस्मात् जलमपकर्षन्ति परिवर्तयन्ति च तदेव जलं मेघरूपे, ततो वृष्टिर्भवति। वृष्ट्या वसुन्धरा शस्यश्यामला धनधान्यवती च भवति। अस्मिन् सागरे रत्नानि वर्धन्ते। अत एव रत्नाकरः कथ्यते असौ शरणागतं वाडवानलं (सहज-रिपुम्) अपि पुष्णाति। अनेन विश्वहिताय संसार-सन्ताप-शमनाय चन्द्राभिधानः पुत्रोऽपि उत्पादितः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

दधति + अर्कमरीचयः = दधत्यर्कमरीचयः - स्वरसन्धिः, यण्।

मरीचयः + अस्मात् = मरीचयोऽस्मात् - विसर्गसन्धिः, उत्वम्।

अस्मात् + विवृद्धिम् = अस्माद्विवृद्धिम् - व्यञ्जनसन्धिः, जश्त्वम्।

अत्र + अश्नुवते = अत्राश्नुवते - स्वरसन्धिः, सवर्णदीर्घः।

अप् + इन्धनम् = अबिन्धनम् - व्यञ्जनसन्धिः, जश्त्वम्।

ज्योतिः + अजनि = ज्योतिरजनि - विसर्गसन्धिः, रुत्वम्।

अजनि + अनेन = अजन्यनेन - स्वरसन्धिः, यण्।

**समास-परिचयः-**

अर्कमरीचयः - अर्कस्य मरीचयः इति षष्ठीतत्पुरुषः।

अबिन्धनम् - आपः इन्धनं यस्य तम् इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

दधति - धा-धातुः + लट् - प्र. पु. ब. व।

विवृद्धिम् - वि + वृध्-धातुः + क्तिन् - स्त्री. द्वि. ए. व.।

अश्नुवते - अश् धातुः + लट् - प्र. पु. ए. व.।

प्रह्लादनम् = प्र + ह्लाद्-धातुः + ल्युट् - नपुं. प्र. ए. व.।

बिभर्ति- भृ-धातुः + लट् - प्र. पु. ए. व.।

अजनि - जन् धातु : (णिजन्तः) लुङ् (कर्मणि)- प्र. पु. ए. व.।

**प्रसङ्गः-** अधुना रामः सागरस्य महिमानं वर्णयति यत्-

**तां तामवस्थां प्रतिपद्यमानम् ,**
**स्थितं दश व्याप्य दिशो महिम्ना।**
**विष्णोरिवास्यानवधारणीयम्,**
**ईदृक्तया रूपमियत्तया वा ॥ 5 ॥**

**अन्वयः**- तां ताम् अवस्थां प्रतिपद्यमानं महिम्ना दश दिशः व्याप्य स्थितं विष्णोः (रूपम्) इव अस्य रूपम् ईदृक्तया इयत्तया वा अनवधारणीयम् (अस्ति)।

**व्याख्या**- तां ताम् = अनेकविधाम्। अवस्थाम् = अक्षोभादि, विष्णुपक्षे सत्त्वाद्यवस्थाम्। प्रतिपद्यमानम् = भजमानम्। महिम्ना = स्वमहत्त्वेन। दश दिशः = काष्ठाः। व्याप्य = पूरयित्वा। स्थितम् = वर्तमानम्। विष्णोः = हरेः। इव = यथा। अस्य = सागरस्य। रूपम् = आकारः (स्वरूपम्) ईदृक्तया = एतादृक्तया। इयत्तया = एतावत्त्वेन। वा = अथवा। अनवधारणीयम् = अकल्पनीयम्। प्रकारतः परिमाणतश्च दुर्निरूपणीयमस्तीति भावः।

यथा हि भगवान् विष्णुः नैकां सत्त्वाद्यवस्थां मत्स्य-कूर्माद्यवस्थां वा प्राप्नोति तथैव सागरोऽपि कदाचिदुल्लसति कदाचित् विक्षुभ्यति कदाचिन्मथ्यते-इति नानावस्थां प्राप्नोति। विष्णुर्यथा दिव्यतेजसा दशदिशो व्याप्य तिष्ठति तथैव समुद्रोऽपि दशसु दिक्षु विस्तृतिं प्राप्य तिष्ठति। अनेन कविना पयोधेः महामहिमत्वं विश्व-वन्दनीयत्वं च सूचितम्। उपमालङ्कारः, उपजातिवृत्तञ्च।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

वि + आप्य = व्याप्य - स्वरसन्धिः, यण्।

दिशः + महिम्ना = दिशोमहिम्ना- विसर्गसन्धिः, उत्वम्।

विष्णोः + इव = विष्णोरिव - विसर्गसन्धिः, रुत्वम्।

इव + अस्य = इवास्य - स्वरसन्धिः, सवर्णदीर्घः।

अस्य + अनवधारणीयम् = अस्यानवधारणीयम् - स्वरसन्धिः, सर्वणदीर्घः।

**समास-परिचयः**-

अनवधारणीयम् - न अवधारणीयम् इति - नञ् तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

प्रतिपद्यमानम् - प्रति + पद्धातुः + शानच् - नपुं. प्र. ए. व.।

व्याप्य - वि + आप्-धातुः + ल्यप् - अव्यय प्रत्ययः।

स्थितम् - स्था धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

महिम्ना - महत् + इमनिच् प्रत्ययः - नपुं. प्र. ए. व.।

अनवधारणीयम् - नञ् (अ) + अव + धृ धातुः (णिजन्तः) + अनीयर् - नपुं. प्र. ए. व.।

ईदृक्तया - ईदृश् + तल् प्रत्ययः (तद्धितः) + स्त्री. तृ. ए. व.।

इयत्तया - इयत् + तल् प्रत्ययः (तद्धितः) - स्त्री. तृ. ए. व.।

**प्रसङ्गः**- सकललोक-संहारकस्य भगवतो विष्णोरेष सागर एव शयनस्थानमित्युक्त्वा समुद्रस्य अत्यधिकं महत्त्वं प्रदर्शयति रामः यत्-

**नाभिप्ररूढाम्बुरुहासनेन,**<br>
**संस्तूयमानः प्रथमेन धात्रा।**<br>
**अमुं युगान्तोचितयोगनिद्रः,**<br>
**संहृत्य लोकान् पुरुषोऽधिशेते ॥6॥**

**अन्वयः-** युगान्तोचितयोगनिद्रः, पुरुषः लोकान् संहृत्य, नाभिप्ररूढाम्बुरुहासनेन प्रथमेन धात्रा संस्तूयमानः (सन्) अमुम् अधिशेते।

**व्याख्या-** युगान्तोचितयोगनिद्रः = कल्पान्तयोग्ययोगविश्रामः। पुरुषः = विष्णुः। लोकान् = भुवनानि। संहृत्य = स्वस्मिन् प्रतिनिवेश्य। नाभिप्ररूढाम्बुरुहासनेन = नाभ्यां प्ररूढं यदम्बुरुहं तदासनमेव। तन्नाभिकमलाश्रयेण एव। प्रथमेन धात्रा = दक्षादीनामपि स्रष्ट्रा पितामहेन। संस्तूयमानः = प्रार्थ्यमानः सन्। अमुम् = इमं सागरम्। अधिशेते = शयनं करोति।

प्रलयान्ते गृहीतयोगनिद्रः नाभ्युत्पन्नसरोजाश्रयेण पितामहेन प्रशस्यमानः पुरुषोत्तमो विष्णुः चतुर्दशभुवनानि आत्मनि विलीनानि कृत्वा अस्मिन्नेव सागरे शयनं करोति। अनेन सारगस्य परमपूज्यत्वम् अविनाशित्वं च सूच्यते। अत्र उदात्तालङ्कारः। छन्दश्च उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अम्बुरुह + आसनेन = अम्बुरुहासनेन - स्वरसन्धिः, सवर्णदीर्घः।

नाभिप्ररूढ + अम्बुरुहासनेन = नाभिप्ररूढाम्बुरुहासनेन - स्वरसन्धिः, सवर्णदीर्घः।

युग + अन्तः = युगान्तः - स्वरसन्धिः, सवर्णदीर्घः।

युगान्त + उचितः = युगान्तोचितः - स्वरसन्धिः, गुणः।

पुरुषः + अधिशेते = पुरुषोऽधिशेते - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।

**समास-परिचयः-**

नाभिप्ररूढाम्बरुहासनेन-

(i) नाभौ प्ररूढमिति नाभिप्ररूढम् - सप्तमी तत्पुरुषः।

(ii) नाभिप्ररूढं च तद् अम्बुरुहम् इति नाभिप्ररूढाम्बुरुहम्- कर्मधारयः।

(iii) नाभिप्ररूढम् अम्बुरुहम् आसनं यस्य सः नाभिप्ररूढाम्बुरुहासनः, तेन इति बहुव्रीहिः।

युगान्तोचितयोगनिद्रः - युगान्ते उचिता योगनिद्रा यस्य सः इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्ररूढः - प्र + रुह् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

संस्तूयमानः - सम् धातुः + यक् (कर्मणि) + शानच् - पुं. प्र. ए. व.।

धात्रा - धा-धातुः + तृच् प्रत्ययः -पुं. प्र. ए. व.।

संहृत्य - सन् + हृ धातुः + ल्यप् - अव्ययप्रत्ययः।

अधिशेते - अधि + शीङ् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** इन्द्रस्य भयात् नैके पर्वता अपि समुद्रस्य शरणमागता इत्येतदेव वर्ण्यते-

**पक्षच्छिदा गोत्रभिदात्तगन्धाः,**
**शरण्यमेनं शतशो महीध्राः।**
**नृपा इवोपप्लविनः परेभ्यः,**
**धर्मोत्तरं मध्यममाश्रयन्ते ॥ 7 ॥**

**अन्वयः**-पक्षच्छिदा, गोत्रभिदा , आत्तगन्धाः, शतशः महीध्राः शरण्यम् एनं परेभ्यः, उपप्लविनः नृपाः धर्मोत्तरं मध्यमम् इव आश्रयन्ते।

**व्याख्या**- पक्षच्छिदा = पक्षच्छेदकारिणा। गोत्रभिदा = इन्द्रेण। आत्तगन्धाः = हतगर्वाः। शतशः = शतं शतं कृत्वा। महीध्राः = गिरयः। शरण्यम् = रक्षणसमर्थम्। एनम् = समुद्रम्। परेभ्यः = शत्रुभ्यः। उपप्लविनः = भयवन्तः। नृपाः = भूपाः। धर्मोत्तरम् = धर्मप्रधानम्। मध्यमम्= मध्यभूपालम्। इव = यथा। आश्रयन्ते = शरणं गच्छन्ति।

कुपितः सुरेन्द्रः एकदा पर्वतानां पक्षान् अच्छिनत्। तदा ते तस्माद् भीताः भूत्वा अतुलबलशालिनः पुण्यश्लोकस्य समुद्रस्य शरणमागताः। इत्थमिन्द्राद् ईषदपि भयं न कृत्वा स्वकृत्यं महेन्द्रस्य प्रचण्डामर्ष-कारणं मन्यमानोऽपि सागरः तेभ्यः पर्वतेभ्यः तथैव अभयं प्रदापयामास यथा कोऽपि मध्यस्थो न्यायप्रियो नृपः शत्रुभिः पीडितेभ्यः नृपेभ्यः कामपि दुष्परिणामचिन्तां विहाय शरणं ददाति।

**विशेषः**- वाल्मीकिरामायणेऽपि इन्द्रेण गिरीणां पक्षच्छेदस्य वर्णनं प्राप्यते। तथाहि-

पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन्।
तेऽपि जग्मुर्दिशः सर्वाः गरुडा इव वेगिनः॥
ततस्तेषु प्रयातेषु देवसङ्घा महर्षिभिः।
भूतानि च भयं जग्मुस्तेषां पतनशङ्कया॥
ततः क्रुद्धः सहस्राक्षः पर्वतानां शतक्रतुः ॥

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

पक्ष + छिदा = पक्षच्छिदा - व्यञ्जनसन्धिः, तुक्, श्चुत्वम्।
शतशः + महीध्राः = शतशो महीध्राः - विसर्गसन्धिः, उत्वम्।
नृपाः + इव = नृपा इव - विसर्गसन्धिः, विसर्गलोपः।
इव + उपप्लविनः = इवोपप्लविनः - स्वरसन्धिः, गुणः।
धर्म + उत्तरम् = धर्मोत्तरम् - स्वरसन्धिः, गुणः।
परेभ्यः + धर्मोत्तरम् = परेभ्यो धर्मोत्तरम् - विसर्गसन्धिः, उत्वम्।

**समास-परिचयः**-

पक्षच्छिदा - पक्षान् छिनत्ति इति पक्षच्छित् तेन इति उपपद-तत्पुरुषः।
आत्तगन्धाः - आत्तः गन्धः यैः ते इति बहुव्रीहिः।
धर्मोत्तरम् - धर्मः उत्तरः यस्य सः, तम् इति-बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः**-

पक्षच्छिदा - पक्ष + छिद् धातुः + क्विप् - पुं. तृ. ए. व.।
आत्तः - आङ् + दाधातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
शरण्यम् - शरण + यत् प्रत्ययः (तद्धितः)- पुं. द्वि. ए. व.।
शतशः - शत + शस् प्रत्ययः (तद्धितः) - अव्ययप्रत्ययः।
उपप्लविनः - उपप्लव + इनि प्रत्ययः (तद्धितः)- पुं. प्र. ब. व.।

आश्रयन्ते - आङ् + श्रि धातुः + लट् (आत्मने.) - प्र. पु ए. व.।

**प्रसङ्गः**- समुद्रस्य माहात्म्यं वर्णयन् पुनः श्रीरामः कथयति-

**रसातलादादिभवेन पुंसा,**
**भुवः प्रयुक्तोद्वहनक्रियायाः।**
**अस्याच्छमम्भः प्रलयप्रवृद्धम्,**
**मुहूर्तवक्त्राभरणं बभूव ॥ 8 ॥**

**अन्वयः**- आदिभवेन पुंसा रसातलात् प्रयुक्तोद्वहनक्रियायाः भुवः प्रलयप्रवृद्धम्, अस्य अच्छम् अम्भः मुहूर्तवक्त्र+आभरणं बभूव।

**व्याख्या**- आदिभवेन = आदिवराहेण। रसातलात् = पातालात्। प्रयुक्तोद्वहनक्रियायाः = कृतोद्धरणक्रियायाः। भुवः = पृथिव्याः देव्याः। प्रलयप्रवृद्धम् = प्रलयकाले वर्धमानम्। अस्य = समुद्रस्य। अच्छम् = निर्मलम्। अम्भः = जलम्। मुहूर्तवक्त्राभरणम् = मुहूर्तं यावत् मुखावगुण्ठनम्। बभूव = अभूत्।

प्रलयान्ते यदा आदिवराहः रसातलनिमग्नां भूदेवीं स्वदन्ताग्रे धृत्वा तामुपरि आनीतवान् तदा सागरस्य प्रलयोद्वेलितं निर्मलं जलं तस्याः वसुन्धरायाः मुखावगुण्ठनमिव क्षणं शुशुभे। तदानीं वसुन्धरा नवपरिणीता अवगुण्ठनवती सलज्जा वधूरिव शुशुभे- इति भावः। समासोक्त्यलङ्कारः, उपजातिवृत्तम्।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

रसातलात् + आदिभवेन = रसातलादादिभवेन - व्यञ्जनसन्धिः, जश्त्वम्।
उत् + वहनम् = उद्वहनम् - व्यञ्जनसन्धिः, जश्त्वम्।
प्रयुक्त + उद्वहनम् = प्रयुक्तोद्वहनम् - स्वरसन्धिः, गुणः।
अस्य + अच्छम् = अस्याच्छम् - स्वरसन्धिः, सवर्णदीर्घः।
वक्त्र + आभरणम् = वक्त्राभरणम् - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः**-

प्रयुक्तोद्वहनक्रियायाः- प्रयुक्ता उद्वहन-क्रिया यस्याः सा प्रयुक्तोद्वहन-क्रिया, तस्याः इति- बहुव्रीहिः।
प्रलयप्रवृद्धम् - प्रलयेन प्रवृद्धम् - तृतीयातत्पुरुषः।
मुहूर्तवक्त्राभरणम् - मुहूर्तं वक्त्रस्य आभरणम् इति- षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्यादि-परिचयः**-

प्रयुक्ता - प्र + युज् धातुः + क्त + टाप् - प्र ए. व.।
उद्वहनम् - उत् + वह् + धातुः ल्युट् - नपुं. प्र. ए. व.।
प्रवृद्धम् - प्र + वृध् धातुः + क्त- नपुं. प्र. ए. व.।
आभरणम् - आङ् + भृ-धातुः + ल्युट् - नपुं. प्र. ए. व.।
बभूव - भू धातुः + लिट.- प्र. पु. ए. व.।

**प्रसङ्गः**- नदीः प्रति सागरस्य प्रणयभावं वर्णयति रामः -

**मुखार्पणेषु प्रकृतिप्रगल्भाः,**
**स्वयं तरङ्गाधरदानदक्षः।**

**अनन्यसामान्यकलत्रवृत्तिः,**
**पिबत्यसौ पाययते च सिन्धूः ॥ ९ ॥**

**अन्वयः**- अनन्यसामान्यकलत्रवृत्तिः, तरङ्गाधरदानदक्षः, असौ मुखार्पणेषु प्रकृतिप्रगल्भाः सिन्धूः स्वयं पिबति पाययते च।

**व्याख्या**- अनन्यसामान्यकलत्रवृत्तिः = अन्येषां पुंसां पुरुषाणां सामान्या न भवतीति अनन्यसामान्याकलत्रेषु-स्त्रीषु, वृत्तिः =भोगः यस्य सः (बहु.)। तरङ्गाधरदानदक्षः= तरङ्ग एव अधरः तस्य दाने समर्पणे। दक्षः = चतुरः। असौ= समुद्रः। मुखार्पणेषु=मुखानाम् अधराणाम्। अर्पणानि=दानानि, तेषु चुम्बनदानेषु-इत्यर्थः। प्रकृतिप्रगल्भाः= प्रकृत्या स्वभावेन सख्यादिप्रेषणं विना। प्रगल्भाः = धृष्टाः। सिन्धूः = नदीः। स्वयं पिबति पाययते च = सागरः पानं करोति कारयति च।

सामान्यपुरुषः एकदा एकस्यामेव रमण्यां रमते किन्तु एषः समुद्रस्तु युगपदेव अनेकनदीनारीभिः सह रमते। अस्मादेव अस्य रत्नाकरस्य रमणीभोगव्यापारः साधारणपुरुषेभ्यः विलक्षणः असाधारणश्च वर्तते। एष समुद्रः चुम्बनव्यापरेऽपि अतीव कुशलो वर्तते। अस्मादेव असौ अनेक-नदी-तरङ्गाधर-रसं समकालमेव पिबति, स्वकल्लोलाधर-रसं च ताः पाययते।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

मुख + अर्पणेषु = मुखार्पणेषु - स्वरसन्धिः, सवर्णदीर्घः।

तरङ्ग + अर्पणेषु = तरङ्गाधरः - स्वरसन्धिः, सवर्णदीर्घः।

पिबति + असौ = पिबत्यसौ - स्वरसन्धिः, यण्।

**समास-परिचयः-**

मुखार्पणेषु - मुखानाम् अर्पणम् इति षष्ठीतत्पुरुषः तेषु।

प्रकृतिप्रगल्भाः - प्रकृत्या प्रगल्भाः इति तृतीयातत्पुरुषः।

तरङ्गाधरदानदक्षः -

(i) तरङ्गाः एव अधराः इति तरङ्गाधराः- रूपककर्मधारयः।

(ii) तरङ्गाधराणां दानम् इति तरङ्गाधरदानम् - षष्ठीतत्पुरुषः।

(iii) तरङ्गाधर-दाने दक्षः इति - सप्तमीतत्पुरुषः।

अनन्यसामान्यकलत्रवृत्तिः - अनन्यसामान्या कलत्रवृत्तिः यस्य सः- बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अर्पणेषु - ऋ धातुः (णिजन्तः,पुक्) + ल्युट् - नपुं. स. ब. व.।

प्रकृतिः - प्र + कृ धातुः + क्तिन् - स्त्री. प्र. ए. व.।

पिबति - पा-धातुः + लट् - प्र. पु. ए. व.।

पाययते - पा-धातुः (णिजन्तः) + लट् (आत्मने.) - प्र. पु. ए. व.।

**प्रसङ्गः**- समुद्रे न केवलं बहुमूल्यानि रत्नानि एव अपितु विशालकायाः मत्स्या अपि निवसन्तीति वर्णयन् रामः कथयति यत्-

**ससत्त्वमादाय नदीमुखाम्भः,**
**सम्मीलयन्तो विवृताननत्वात्।**
**अमी शिरोभिस्तिमयः सरन्ध्रैः**
**ऊर्ध्वं वितन्वन्ति जलप्रवाहान् ॥ 10 ॥**

**अन्वयः**- अमी तिमयः विवृताननत्वात् ससत्त्वं नदीमुखाम्भः आदाय सम्मीलयन्तः (सन्तः) सरन्ध्रैः शिरोभिः जलप्रवाहान् ऊर्ध्वं वितन्वन्ति।

**व्याख्या**- अमी = एते पुरः दृश्यमानाः। तिमयः = विशालकायाः मत्स्यविशेषाः। विवृताननत्वात् = व्यात्तमुखत्वात्। ससत्त्वम् = सजीवम्। नदीमुखाम्भः = सरित्सङ्गमजलम्। आदाय = गृहीत्वा। सम्मीलयन्तः = चञ्चुपुटानि निमीलयन्तः। सरन्ध्रैः = छिद्रसहितैः। शिरोभिः = मस्तकैः। जलप्रवाहान् = सलिलधाराः। ऊर्ध्वम् = उपरि। वितन्वन्ति = प्रसारयन्ति।

प्रिये सीते! पश्य तिमिजातयः विशालकायाः मत्स्यविशेषाः स्वाननानि व्यादाय जन्तुसहितं जलं गृह्णन्ति, ततः स्वशिरो-विवरैः वारि-निर्झरान् प्रक्षिपन्ति। इत्थं मुखात् जलं बहिः निःसार्य अवशिष्टान् जन्तून् भक्षयन्ति।

अत्र तिमिनाम्नः मत्स्यस्य स्वाभाविकं चमत्कारपूर्णं वर्णनं विद्यते। अतः स्वभावोक्त्यलङ्कारः, उपजातिवृत्तं च।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

नदीमुख + अम्भः = नदीमुखाम्भः - स्वरसन्धिः, सवर्णदीर्घः।
विवृत + आननत्वात् = विवृताननत्वात् - स्वरसन्धिः,सवर्णदीर्घः।
शिरोभिः + तिमयः = शिरोभिस्तिमयः - विसर्गसन्धिः, सत्वम्।
सरन्ध्रैः + ऊर्ध्वम् = सरन्ध्रैरूर्ध्वम् - विसर्गसन्धिः, रुत्वम्।

**समास-परिचयः**-

ससत्त्वम् - सह सत्त्वेन यत् तद् इति बहुव्रीहिः।
नदीमुखाम्भः - नदीमुखस्य अम्भः इति षष्ठीतत्पुरुषः।
सरन्ध्रैः - सह रन्ध्रैः यत् तद् सरन्ध्रं तैः इति बहुव्रीहिः।
जलप्रवाहान् - जलस्य प्रवाहान् - षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

आदाय - आङ् + दा-धातुः + ल्यप् - अव्ययप्रत्ययः।
संमीलयन्तः - सम् + मील्-धातुः (णिजन्तः) + शतृ - पुं. प्र. ब. व.।
विवृतम् - वि + वृ-धातुः + क्त - नपुं. प्र. ए. व.।
प्रवाहः- प्र + वह् धातुः + घञ् - पुं. प्र. ए. व.।
वितन्वन्ति - वि + तनु धातुः + लट् - प्र. पु. ब. व.।

**प्रसङ्गः**- समुद्रमध्ये मकरादीनां जलक्रीडां वर्णयति रामः यत्-

**मातङ्गनक्रैः सहसोत्पतद्भिः,**
**भिन्नान् द्विधा पश्य समुद्रफेनान्।**

**कपोलसंसर्पितया य एषाम्,**

**व्रजन्ति कर्ण क्षणचामरत्वम् ॥ 11 ॥**

**अन्वयः**- सहसा उत्पतद्भिः मातङ्गनक्रैः द्विधाभिन्नान् समुद्रफेनान् पश्य । ये एषां कपोल-संसर्पितया कर्णक्षण चामरत्वं व्रजन्ति।

**व्याख्या**- सहसा = अकस्मात्। उत्पतद्भिः = क्रीडार्थम् ऊर्ध्वं गच्छद्भिः। मातङ्गनक्रैः = गजाकारैः ग्राहैः। द्विधा = द्वयोः भागयोः। भिन्नान् = विभक्तान्। समुद्रफेनान् = सागर-डिण्डीरान्। पश्य = विलोकय। एषाम् = समुद्रफेनानाम्। नक्राणां कपोलसंसर्पितया = कपोलेषु - गण्डस्थलेषु। संसर्पितया = संसर्पणेन हेतुना। कर्णक्षणचामरत्वम् = क्षणं चामराणि क्षणचामराणि। कर्णेषु = श्रोत्रेषु क्षण-चामराणि, तेषां भावः, तत्त्वम्। व्रजन्ति = गच्छन्ति।

अयि सीते! पश्य, अमी गजाकारा नक्राः यदा जलगर्भात् अकस्माद् ऊर्ध्वं समुच्छलन्ति तदा समुद्रफेनाः द्विधा विभक्ताः भवन्ति। तस्मिन् काले नक्राणां कपोल-सङ्घट्टनेन फेनाः बालव्यजनत्वं भजन्ति, तेषां शोभा गजकर्णयोः चामरशोभेव भवतीति तात्पर्यम्।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

सहसा + उत्पद्भिः = सहसोत्पतद्भिः - स्वरसन्धिः, गुणः।

उत्पतद्भिः + भिन्नाम् = उत्पतद्भिर्भिन्नान् - विसर्गसन्धिः,रुत्वम्।

ये + एषाम् = य एषाम् - स्वरसन्धिः, अयादिः, यलोपः।

**समास-परिचयः-**

मातङ्गनक्रैः - मातङ्गरूपैः नक्रैः इति - रूपक कर्मधारयः (शाक-पार्थिवादिः)।

समुद्रफेनान् - समुद्रस्य फेनान् इति- षष्ठीतत्पुरुषः।

कपोलसंसर्पितया- कपोलेषु संसर्पितया इति सप्तमीतत्पुरुषः।

कर्णक्षण चामरत्वम् - कर्णेषु क्षणं चामरत्वम् इति सप्तमीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

उत्पतद्भिः - उत् + पत् धातुः + शतृ - पुं. तृ. ब. व.।

भिन्नान् - भिद् धातुः + क्तप्रत्ययः - पुं. द्वि. ब. व.।

संसर्पितसया - सम् + सृप् धातुः + णिनि + तल् (तद्धितः) - स्त्री. तृ. ए. व.।

व्रजन्ति - व्रज् धातुः + लट् - प्र. पु. ब. व.।

**प्रसङ्गः**- समुद्र-तरङ्गैः सह नितान्त-साम्यात् कष्टेन परिचीयमानानां सर्पाणाम् अभिज्ञानं केन प्रकारेण भवति इति वर्णयति रामः यत्-

**वेलनिलाय प्रसृता भुजङ्गाः,**

**महोर्मिविस्फूर्जथु-निर्विशेषाः।**

**सूर्यांशुसम्पर्क-समृद्धरागैः,**

**व्यज्यन्त एते मणिभिः फणस्थैः ॥ 12 ॥**

**अन्वयः**- वेलानिलाय प्रसृताः महोर्मिविस्फूर्जथुनिर्विशेषाः एते भुजङ्गाः, सूर्यांशु-सम्पर्क-समृद्ध-रागैः फणस्थैः मणिभिः व्यज्यन्ते।

**व्याख्या**- वेलानिलाय = सागरतट-पवनाय। प्रसृताः = निर्गताः। महोर्मि-विस्फूर्जथु-निर्विशेषाः = महोर्मीणाम्-दीर्घाणाम् ऊर्मीणाम्-तरङ्गाणां यः विस्फूर्जथुः = उद्रेकः, तस्मात् निर्विशेषाः अर्थात् दुर्ग्रहभेदाः एते। भुजङ्गाः = सर्पाः। सूर्यांशु-सम्पर्क-समृद्ध-रागैः = भानु-किरण-सम्पर्केण, समृद्धरागैः = प्रवृद्ध-कान्तिभिः। फणस्थैः- फणासु विद्यमानैः। मणिभिः - रत्नविशेषैः। व्यज्यन्ते = व्यक्ताः भवन्ति।

वायुभक्षणाय तटभूमौ लम्बायमानाः एते भुजङ्गाः विशाल-सागरतट-तरङ्गेभ्यः अभिन्नाः प्रतीयन्ते, ते केवलं सूर्य-किरण-प्रवृद्ध-कान्तिभिः फणस्थितैः मणिभिः एव व्यक्तस्वरूपा भवन्ति। अन्यथा तु समुद्र-तरङ्ग-स्वरूपाः स्युः विशाल-समुद्र-तरङ्गेभ्यश्च तेषां कश्चिद् भेद एव न प्रतीयेत इति भावः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

प्रसृताः + भुजङ्गाः = प्रसृता भुजङ्गाः - विसर्गसन्धिः, विसर्गलोपः।

महा + ऊर्मि = महोर्मिः - स्वरसन्धिः, गुणः।

भुजङ्गाः + महोर्मिः = भुजङ्गा महोर्मिः - विसर्गसन्धिः, विसर्गलोपः।

निः + विशेषः = निर्विशेषाः - विसर्गसन्धिः, रुत्वम् ।

सूर्य + अंशुः = सूर्यांशुः - स्वरसन्धिः, सवर्णदीर्घः।

वि + अज्यन्ते = व्यज्यन्ते - स्वरसन्धिः, यण्।

समृद्धरागैः + व्यज्यन्ते = समृद्धरागैर्व्यज्यन्ते - विसर्गसन्धिः, रुत्वम्।

व्यज्यन्ते + एते = व्यज्यन्त एते - स्वरसन्धिः-अयादिः, यलोपः।

**समास-परिचयः**-

वेलानिलाय - वेलायाः अनिलाय इति षष्ठीतत्पुरुषः।

महोर्मि-विस्फूर्जथु-निर्विशेषाः-

(i) महान्तः च ते ऊर्मयः इति महोर्मयः - कर्मधारयः।

(ii) महोर्मीणां विस्फूर्जथुः इति महोर्मि-विस्फूर्जथुः - षष्ठीतत्पुषः।

(iii) महोर्मि-विस्फूर्जथुभिः निर्विशेषाः इति - तृतीयातत्पुरुषः।

सूर्यांशु-सम्पर्क-समृद्ध-रागैः-

(i) सूर्यस्य अंशवः इति सूर्यांशवः- षष्ठीतत्पुरुषः।

(ii) सूर्यांशूनां सम्पर्क इति सूर्यांशुसम्पर्कः - षष्ठीतत्पुरुषः।

(iii) सूर्यांशुसम्पर्कैः समृद्धः रागः येषांः तैः इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः**-

प्रसृताः- प्र + सृ धातुः + क्त - पुं. प्र. ब. व.।

विस्फूर्जथुः - वि + स्फूर्ज्धातुः + अथुच् प्रत्ययः- पुं. प्र. ए. व.।

सम्पर्कः - सम् + पृच् धातुः + घञ् - पुं. प्र. ए. व.।

समृद्धैः - सम् + ऋध्-धातुः + क्त - पुं . तृ . ब. व.।

रागैः - रञ्ज् धातुः + घञ् - पुं. तृ. ब. व.।

व्यज्यन्ते - वि + अञ्ज् धातुः + यक् (कर्मणि) + लट् - प्र. पु. ब. व.।

**प्रसङ्गः**- सागरे शङ्खानां विद्रुमाणां च बाहुल्यं प्रदर्शयन् अग्रे कथयति यत्-

**तवाधरस्पर्धिषु विद्रुमेषु,**
**पर्यस्तमेतत् सहसोर्मिवेगात्।**
**ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित्,**
**क्लेशादपक्रामति शङ्खयूथम्** ॥ 13 ॥

**अन्वयः**- तवाधरस्पर्धिषु विद्रुमेषु सहसा ऊर्मिवेगात् पर्यस्तम् ऊर्ध्वाङ्कुर-प्रोतमुखम् एतत् शङ्खयूथम् क्लेशात् कथञ्चित् अपक्रामति।

**व्याख्या**- तव = हे सीते! तव = भवत्याः। अधरस्पर्धिषु = अधरोष्ठ-सदृशेषु। विद्रुमेषु = प्रवालेषु। सहसा = अकस्मात्। ऊर्मिवेगात् = तरङ्गवेगात्। पर्यस्तम् = प्रोक्षितम्। ऊर्ध्वाङ्कुरैः = विद्रुमप्ररोहैः। प्रोतमुखम् = स्यूतवदनम्। एतत् = पुरो विद्यमानम्। शङ्खयूथम् = शङ्खसमूहः। क्लेशात् = दुःखात्। कथञ्चित् = येन केन प्रकारेण। अपक्रामति = शनैःशनैः अपसरति इत्यर्थः।

अयि प्रिये! एतदन्यद् दृश्यम्। अत्र हठात् कल्लोल-वेगेन तवाधर-सदृशेषु प्रवालेषु प्रक्षिप्तः शङ्खसमूहः तेषां प्ररोहेषु स्यूतमुखः सन् महता कष्टेन आत्मानं मोचयित्वा पश्चादग्रे शनैः-शनैः अपसरति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

तव + अधरस्पर्धिषु = तवाधरस्पर्धिषु - स्वरसन्धिः, सवर्णदीर्घः।

परि + अस्तम् = पर्यस्तम् - स्वरसन्धिः, यण्।

सहसा + ऊर्मिवेगात् = सहसोर्मिवेगात् - स्वरसन्धिः, गुणः।

ऊर्ध्व + अङ्कुरः = ऊर्ध्वाङ्कुरः - स्वरसन्धिः, सवर्णदीर्घः।

क्लेशात् + अपक्रामति = क्लेशादपक्रामति - व्यञ्जनसन्धिः, जश्त्वम्।

**समास-परिचयः**-

अधरस्पर्धिषु - अधरस्य स्पर्धिषु इति - षष्ठीतत्पुरुषः।

ऊर्मिवेगात् - ऊर्मीणां वेगात् इति - षष्ठीतत्पुरुषः।

ऊर्ध्वाङ्कुर-प्रोतमुखम् - ऊध्वाङ्कुरैः प्रोतं मुखं यस्य तत् - बहुव्रीहिः।

शङ्खयूथम् - शङ्खानां यूथम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

पर्यस्तम् = परि + अस् धातुः + क्त - नपुं. प्र. ए. व.।

वेगात् - विज् धातुः + घञ् - पुं. प. ए. व.।

प्रोतम् - प्र + व्ये- धातुः (सम्प्रसारणम्) + क्त- नपुं. प्र. ए. व.।

क्लेशात् - क्लिश् धातुः + घञ् - पुं. प्र. ए. व.।

अपक्रामति - अप + क्रम् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः**- सामुद्रिक-जन्तूनां शोभां प्रदर्श्य इदानीं श्रीरामः सागरस्योपरि विद्यमानस्य मेघस्य सौन्दर्यं वर्णयन् एवं कथयति यत्-

**प्रवृत्तमात्रेण पयांसि पातुम्,**
**आवर्तवेगाद् भ्रमता घनेन।**
**आभाति भूयिष्ठमयं समुद्रः,**
**प्रमथ्यमानो गिरिणेव भूयः ॥ 14 ॥**

**अन्वयः**- पयांसि पातुम् प्रवृत्तमात्रेण, आवर्तवेगात् भ्रमता, घनेन समुद्रः गिरिणा इव भूयः प्रमथ्यमानः, भूयिष्ठम् आभाति।

**व्याख्या**- पयांसि = जलानि। पातुम् = आस्वादयितुम्। प्रवृत्तमात्रेण = तत्परमात्रेण न तु पीतवता। (परम्) आवर्तवेगात् = जलभ्रमस्य तीव्रप्रवाहात्। भ्रमता = आवर्तमानेन। घनेन = मेघेन। समुद्रः = अम्भोधिः। भूयः = पुनः। गिरिणा = पर्वतेन। प्रमथ्यमानः = आलोड्यमानः। इव = यथा। भूयिष्ठम् = अत्यधिकम्। आभाति = शोभते।

अयि प्राणप्रिये! पश्य तावद् अन्यदपि दृश्यम्। एषः मेघः जलं पातुमत्र आगच्छत् परं वारिमात्रं स्पृशन्नेव सागर-जलावर्ते निपतितः। इत्थं जलावर्त-वेगात् मेघेन समुद्रः पुनः मन्दराचलेन मथ्यमान इव प्रतीयते (नितरां शोभते)।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

आवर्तवेगात् + भ्रमता = आवर्तवेगाद् भ्रमता - व्यञ्जनसन्धिः, जश्त्वम्।

प्रमथ्यमानः + गिरिणा = प्रमथ्यमानो गिरिणा - विसर्गसन्धिः, उत्वम्।

गिरिणा + इव = गिरिणेव - स्वरसन्धिः, गुणः।

**समास-परिचयः**-

आवर्तवेगात् - आवर्तस्य वेगात् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

प्रवृत्तमात्रेण - प्रवृत्त + मात्रच् (तद्धितः) - पुं. तृ. ए. व.।

पातुम् - पा-धातुः + तुमुन् - अव्यय-प्रत्ययः।

भ्रमता - भ्रम् धातुः + शतृ - पुं. तृ. ए. व.।

भूयिष्ठम् - बहु (भू) + इष्ठन् (तद्धितः) - नपुं. प्र. ए. व.।

प्रमथ्यमानः - प्र + मथ् + यक् (कर्मणि) + शानच् - पुं. प्र. ए. व.।

आभाति - आङ् + भा-धातुः + लट्- प्र. पु. ए. व.।

**प्रसङ्गः**-अथ इदानीं ताल-तमाल-वनपङ्क्तिभिः नीलवर्णां समुद्रवेलां साम्यदर्शनद्वारा वर्णयति यत्-

**दूरादयश्चक्रनिभस्य तन्वी,**
**तमाल-ताली-वनराजि-नीला।**
**आभाति वेला लवणाम्बुराशेः,**
**धारानिबद्धेव कलङ्करेखा ॥ 15 ॥**

**अन्वयः**- अयश्चक्रनिभस्य, लवणाम्बुराशेः दूरात् तन्वी तमाल-ताली-वनराजि-नीला वेला धारानिबद्धा कलङ्करेखा इव आभाति।

**व्याख्या**- अयश्चक्रनिभस्य = लौहचक्र-सदृशस्य। लवणाम्बुराशेः = क्षारजलनिधेः। दूरात् = विप्रकृष्टात्।

तन्वी = सूक्ष्मतया दृश्यमाना। तमाल-ताली-वनराजि-नीला = तमालानां च तालीनां-तालवृक्षाणां च, वनानि = अरण्यानि, इति तेषां राजयः = पङ्क्तयः, ताभिः नीला = श्यामवर्णा इति। वेला = तटवर्तिनी भूमिः। धारानिबद्धा= धारायां-पङ्क्तौ निबद्धा-खचिता। कलङ्करेखा-मालिन्यपङ्क्तिः। इव = उपमार्थकं पदम् इदम्। आभाति = प्रतीयते।

प्रिये सीते पश्य! अधुना वयं समुद्रतटं समुपागताः। दूरात् एषः समुद्रः बृहदाकारं लौहचक्रमिव प्रतीयते। अस्य तटभूमिः तालतमाल-वनश्रेणिभिः दूरात् कृष्णवर्णा अतीव कृशा च विलोक्यते। अस्मादेव कारणाद् एषा तटभूमिः चक्राश्रिता मालिन्यरेखा इव प्रतीयते।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अयः + चक्रनिभस्य = अयश्चक्रनिभस्य - विसर्गसिन्धः, सत्वं, श्चुत्वम्।

दूरात् + अयश्चक्रनिभस्य - दूरादयश्चक्रनिभस्य - व्यञ्जनसन्धिः, जश्त्वम्।

लवण + अम्बुराशेः = लवणाम्बुराशेः - स्वरसन्धिः, सवर्णदीर्घः।

अम्बुराशेः + धारा = अम्बुराशेर्धारा- विसर्गसन्धिः, रुत्वम्।

धारानिबद्धा + इव = धारानिबद्धेव - स्वरसन्धिः, गुणः।

**समास-परिचयः-**

अयश्चक्रनिभस्य-

(i) अयसा कृतं चक्रम् इति अयश्चक्रम् - तृ. तत्पुरुषः।

(ii) अयश्चक्रेण निभः - इति अयश्चक्रनिभः, तस्य इति - तृ. तत्पुरुषः।

तमाल-ताली-वन-राजि-नीला -

(i) तमालानां तालीनां च वनराजयः इति तमाल-ताली-वन राजयः - इति षष्ठीतत्पुरुषः।

(ii) तमाल-ताली - वनराजिभिः नीला इति तमालतालीवनराजिनीला इति तृ तत्पुरुषः।

लवणाम्बुराशेः -

(i) लवणं च तत् अम्बु इति लवणाम्बु - कर्मधारयः।

(ii) लवणाम्बूनां राशिः इति लवणाम्बुराशिः, तस्य - षष्ठीतत्पुरुषः।

धारा-निबद्धाः - धाराभिः निबद्धा इति तृतीयातत्पुरुषः। यद्वा धारायां निबद्धा इति स. तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

तन्वी - तनु शब्दः + ङीप् (स्त्रियाम्) - प्र. ए. व.।

निबद्धा - नि + बन्ध् + क्त + टाप् - स्त्री. प्र. ए. व.।

आभाति - आङ् + भा-धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** समुद्र-समीरेण सीतां प्रति क्रियमाणं पुण्यम् उपकारं वर्णयति रामः यत्-

**वेलानिलः केतक-रेणुभिस्ते,**
**सम्भावयत्याननमायताक्षि!**
**मामक्षमं मण्डनकालहानेः,**
**वेत्तीव बिम्बाधर-बद्धतृष्णम् ॥ 16 ॥**

**अन्वयः**- हे आयताक्षि! वेलानिलः केतक-रेणुभिः ते आननं सम्भावयति। बिम्बाधर-बद्धतृष्णं मां मण्डन-कालहानेः अक्षमं वेत्ति इव।

**व्याख्या**- आयताक्षि! = हे विशाल-लोचने! वेलानिलः = समुद्रवायुः। केतक-रेणुभिः = केतक-पुष्परागैः। ते = तव। आननम् = मुखम्। सम्भावयति = विभूषयति। बिम्बाधर-बद्धतृष्णम् = बिम्बाधरोष्ठ-सक्त-वासनम्, बिम्बफल-तुल्यं तव अधरं पिपासुकम् इति। माम् = रामम्। मण्डन-कालहानेः = मण्डनेन -शृङ्गारेण, कालस्य-समयस्य, हानिः-क्षतिः, तस्याः। अक्षमम् = असहमानम्। वेत्ति इव = जानाति इव।

हे विशाललोचने! सीते! अहं तव अधर-रसपानेन स्वप्रणय-तृष्णा-शमनाय अतीवोत्सुकः अस्मि, अत एव मुखमण्डल-मण्डने यः कालक्षेपो भविष्यति तं सोढुम् असमर्थोऽस्मि। समुद्र-तीर-समीरः मम इमम् अभिप्रायं ज्ञात्वा केतकी-कुसुम-मकरन्देन स्वयं तवाननं मण्डयति। इत्थमेषः तट-वायुः मे नूनम् अतीवोपकारकः।

अत्र उत्प्रेक्षालङ्कारः, वृत्तं च इन्द्रवज्रा।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

वेला + अनिलः = वेलानिलः - स्वरसन्धिः, सवर्णदीर्घः।

केतक-रेणुभिः + ते - केतक-रेणुभिस्ते - विसर्गसन्धिः, सत्वम्।

आयत + अक्षी = आयताक्षी - स्वरसन्धिः, सवर्णदीर्घः।

सम्भावयति + आननम् = सम्भावयत्याननम् - स्वरसन्धिः, यण्।

वेत्ति + इव = वेत्तीव - स्वरसन्धिः, सवर्णदीर्घः।

कालहानेः + वेत्ति = कालहानेर्वेत्ति - विसर्गसन्धिः, रुत्वम्।

बिम्ब + अधरः = बिम्बाधरः - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः**-

वेलानिलः - वेलायाः अनिलः इति षष्ठीतत्पुरुषः।

केतक-रेणुभिः - केतकानां रेणुभिः इति षष्ठीतत्पुरुषः।

आयताक्षि! - आयते अक्षिणी यस्य सः आयताक्षः, सा (स्त्री.) आयताक्षी, सम्बोधने च- आयताक्षि! इति बहुव्रीहिः।

मण्डन-कालहानेः-

(i) कालस्य हानिः इति कालहानिः - षष्ठीतत्पुरुषः।

(ii) मण्डनेन कालहानिः इति मण्डन-कालहानिः, तस्याः इति - तृतीयातत्पुरुषः।

बिम्बाधर-बद्धतृष्णम् - बिम्बाधरे बद्धा तृष्णा यस्य सः-बिम्बाधर-बद्ध-तृष्णः, तम् इति- बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः**-

मण्डनम् - मण्ड् धातुः + ल्युट् - नपुं. प्र. ए. व.।

सम्भावयति - सम्+ भूधातुः (णिजन्तः) + लट् - प्र. पु. ए. व.।

वेत्ति - विद् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः**- रामः पुष्पकविमानेन सागरमुत्तीर्य तट-वायोः सुखं चानुभूय अधुना समुद्रतटमुपैति-

**एते वयं सैकतभिन्नशुक्ति-**
**पर्यस्तमुक्तापटलं पयोधेः।**

**प्राप्ता मुहूर्तेन विमानवेगात्,**

**कूलं फलावर्जितपूगमालम् ॥ 17 ॥**

**अन्वयः**- एते वयं विमान-वेगात् मुहूर्तेन सैकत-भिन्न-शुक्ति-पर्यस्त-मुक्तापटलम्, फलावर्जित-पूगमालम्, पयोधेः कूलम्, प्राप्ताः।

**व्याख्या**- एते = इमे वयम्, रामादयः,। सैकत-भिन्न-शुक्ति-पर्यस्त-मुक्तापटलम् = सैकतेषु-बालुकामय-तटप्रदेशेषु, भिन्नाः-त्रुटिताः याः शुक्तयः,-मौक्तिकानां पटलानि-समूहाः च यत्र इति तथाभूतम् अर्थात् विविध-शुक्ति-मौक्तिकैः परिपूर्ण-तट-पटलम् इति। फलावर्जितपूगमालम् = फलैः आवर्जिताः - आनमिताः पूगमाला-पूगतरु -समूहः यस्मिन् इति तत्। पयोधेः = सागरस्य। कूलम् = तीरम्। विमानवेगात् = पुष्पकविमानस्य तीव्रगत्या। मुहूर्तेन = क्षणेन। प्राप्ताः - आगताः।

अयि प्रिये! अस्माकं विमानम् इयता जवेन गगन-मार्गं गाहते यत् क्षणमात्रेण एव वयं समुद्रतटं समागताः। अस्य पयोधि-पुलिनस्य सुषमा नूनमवलोकनीया। अत्र विस्तृत-मुखाभिः शुक्तिभिः विकीर्णाः मुक्ताफलराशयः सूर्यसम्पर्काद् देदीप्यन्ते। अत्र अतिशयफलागमेन विनताः, एकत्र स्थितिः नावलोक्यते किन्तु सागरसाम्राज्यान्तर्गते अस्मिन् तटे मुक्ता-फलराशि-रूपेण वर्तमाना विभूतिः फल-विनत-पूगपङ्क्तिरूपेण विराजमानो विनयश्च समभावेन सौहार्द-पूर्वकं निवसतः- इति भावः। अत्र उदात्तालङ्कारः, इन्द्रवज्रा वृत्तं च।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

प्राप्ताः + मुहूर्तेन = प्राप्ता मुहूर्तेन - विसर्गसन्धिः, विसर्गलोपः।

फल + आवर्जिता = फलावर्जिता - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

सैकत-भिन्न-शुक्ति-पर्यस्त-मुक्तापटलम् -

(i) भिन्नाः च ताः शुक्तयः इति भिन्नशुक्तयः- - कर्मधारयः।

(ii) सैकतेषु भिन्नशुक्तयः इति सैकत-भिन्नशुक्तयः - सप्तमीतत्पुरुषः।

(iii) सैकतेषु भिन्नशुक्तिभिः पर्यस्तानि मुक्ता-पटलानि यस्मिन् इति तत्-बहुव्रीहिः।

विमानवेगात् - विमानस्य वेगात् इति - षष्ठीतत्पुरुषः।

फलावर्जित-पूगमालम् - फलैः आवर्जिता पूगमाला यस्मिन् इति तत् - बहुव्रीहिः।

**प्रसङ्गः**- अत्र रामः विमानेन पूर्वमतिक्रान्तं मार्गमुद्दिश्य तत्सौन्दर्यविषये सीतां कथयति यत्-

**कुरुष्व तावत् करभोरु! पश्चात्,**

**मार्गे मृगप्रेक्षिणि! दृष्टिपातम्।**

**एषा विदूरीभवतः समुद्रात्,**

**सकानना निष्पततीव भूमिः ॥ 18 ॥**

**अन्वयः**- हे करभोरु! मृगप्रेक्षिणि! तावत् पश्चात् मार्गे दृष्टिपातं कुरुष्व। एषा सकानना भूमिः विदूरीभवतः समुद्रात् निष्पतति इव।

**व्याख्याः**- हे करभोरु! करभ इव ऊरू यस्याः सा करभोरूः, तस्याः सम्बोधने, मृगप्रेक्षिणि! मृगः-हरिण इव- यथा प्रेक्षते -पश्यति या सा तत्सम्बोधने। तावत् पश्चात्-अतीते। मार्गे = पथि। दृष्टिपातम् कुरुष्व = दृष्टिं

देहि, पश्य इत्यर्थः। एषा = इयम्, दूरात् दृश्यमाना। सकानना = वनसहिता। भूमिः = धरा। विदूरीभवतः = विशेषेण दूरं गच्छतः। समुद्रात् = सागरात्। निष्पतति इव = निष्क्रामति इव इति मन्ये।

हे मृगनयने! पश्य प्रथमं वनभूमिः दूरात् सागरजलेन संलग्ना इव अलक्ष्यत किन्तु अधुना क्रमेण विमानं यावत् समुद्रं पृष्ठतः कृत्वा सुदूरम् अपसरति तावत् वनभूमिरपि समुद्र-जलात् विच्छिन्ना भवति।

अत्र उपमा उत्प्रेक्षा च। वृत्तं च उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पश्चात् + मार्गे = पश्चान्मार्गे - व्यञ्जनसन्धिः, अनुनासिकपरसवर्णः।

निः + पतति = निष्पतति - विसर्गसन्धिः, सत्वं, षत्वम्।

निष्पतति + इव = निष्पततीव - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

मृगप्रेक्षिणि! - मृगी (मृगः) इव प्रेक्षते सा- मृगप्रेक्षिणी, सम्बोधने च मृगप्रेक्षिणि! -उपमानोपपद-तत्पुरुषः।

दृष्टिपातम् - दृष्टेः पातम् इति षष्ठीतत्पुरुषः।

करभोरु! - करभः इव ऊरू यस्याः सा करभोरूः, सम्बोधने-करभोरु! इति बहुव्रीहिः।

सकानना - सह काननैः या सा- इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

पातः - पत् धातुः + घञ् - पु. प्र. ए. व.।

कुरुष्व - कृ-धातुः + लोट् - म. पु. ए. व.।

विदूरीभवतः - विदूर + च्वि + भू धातुः + शतृ - पु. प्र. ए. व.।

निष्पतति - निः + पत् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** विमानस्य गतिवेग-विशेषतां वर्णयति रामः यत्-

**क्वचित् पथा सञ्चरते सुराणाम्,**
**क्वचिद् घनानां पततां क्वचिच्च।**
**यथाविधो मे मनसोऽभिलाषः,**
**प्रवर्तते पश्य तथा विमानम् ॥ 19 ॥**

**अन्वयः-** क्वचित् सुराणां पथा, क्वचित् पततां, क्वचित् च घनानां (पथा)सञ्चरते (इति)पश्य यथाविधः मे मनसः अभिलाषः, तथा विमानं प्रवर्त्तते।

**व्याख्या-** (इदं) विमानम् = पुष्पकविमानम् । मे = रामस्य। मनसः = चित्तस्य। अभिलाषः = इच्छा। यथाविधः = यादृशः। तथा तथाविधं :, तादृशम् एव इति। प्रवर्तते = गच्छति। क्वचित् सुराणाम् = देवानाम् क्वचित्। घनानाम् = मेघानाम् क्वचित्। च। पतताम् = विहगानाम्। पथा = मार्गेण। सञ्चरते = प्रयाति।

प्रिये सीते! दिव्यशक्ति-सम्पन्नत्वात् इदं पुष्पकविमानं मे मनोऽभिलाषानपि जानाति। अतः मम मनसोऽनुकूलमेव मार्गं गृह्णाति। क्वचित् तद् देवपथं भजति, तु क्वचित् मेघमार्गम्, क्वचिच्च पक्षिपथम् (अधोमार्गम्) अतिक्रामति। इत्थमहं येन मार्गेण गन्तुमिच्छामि इदं विमानं दिव्यशक्ति-बलेन तमेव मार्गमनुसरति।

अत्र विमानस्य स्वाभाविकवर्णनात् स्वभावोक्त्यलङ्कारः, उपेन्द्रवज्रा वृत्तं च।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

क्वचित् + घनानाम् = क्वचिद्घनानाम् - व्यञ्जनसन्धिः, जश्त्वम्।

क्वचित् + च = क्वचिच्च - व्यञ्जनसन्धिः, श्चुत्वम्।

यथाविधः + मे = यथाविधो मे - विसर्गसन्धिः, उत्वम्।

मनसः + अभिलाषः = मनसोऽभिलाषः - विसर्गसन्धिः, उत्वम्।

**प्रकृति-प्रत्ययादि-परिचयः-**

सञ्चरते - सम् + चर् धातुः (आत्मने.)+ लट् - प्र. पु. ए. व.।

पतताम् - पत् धातुः + शत् - पुं. ष. ब. व.।

अभिलाषः - अभि + लष् धातुः + घञ् - पुं. प्र. ए. व.।

पश्य - दृश् धातुः + लोट् - म. पु. ए. व.।

प्रवर्त्तते - प्र + वृत् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** अथेदानीं रामः आकाश-वायोः महत्त्वं प्रतिपादयन् सीतां प्रति कथयति-

**असौ महेन्द्र-द्विप-दानगन्धिः,**
**त्रिमार्गगा-वीचि-विमर्द-शीतः।**
**आकाश-वायुर्दिनयौवनोत्थान्,**
**आचामति स्वेदलवान् मुखे ते ॥ 20 ॥**

**अन्वयः-** महेन्द्र-द्विप-दानगन्धिः, त्रिमार्गगा-वीचि-विमर्द-शीतः, असौ आकाशवायुः ते मुखे दिन-यौवनोत्थान् स्वेद-लवान् आचामति।

**व्याख्या-** महेन्द्रद्विपदानगन्धिः- महेन्द्रस्य-शक्रस्य, द्विपः-हस्ती, तस्य दानम्-मदः, तस्य गन्धोऽस्य अस्तीति सः, अर्थात् ऐरावत-मदजल-गन्ध-युक्तः इति। त्रिमार्गगावीचिविमर्दशीतः = त्रिमार्गगायाः - गङ्गायाः, वीचीनाम्-लहरीणाम्, विमर्देन-सम्पर्केण, शीतः- शीतलः। असौ= एषः। आकाशवायुः = अन्तरिक्ष-पवनः। ते = तव सीतायाः। मुखे = वदने। दिन-यौवनोत्थान् = दिनस्य-दिवसस्य, यौवनेन-मध्याह्नेन, उत्थितान्-उद्भूतान्। स्वेदलवान् = घर्म-जलकणान्। आचामति = पिबति।

देवमार्गेण गच्छता रामचन्द्रेण उक्तम्-अयि प्राणेश्वरि! पश्य असौ ऐरावत-मद-सुरभितः गगन-गङ्गातरङ्ग-सम्पर्क-शिशिरः आकाशसमीरः तव मुखारविन्दे स्थितान् मध्याह्न-सूर्यसम्भवान् स्वेद-बिन्दून् शोषयति। अत्र उपजाति-वृत्तम्।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

दानगन्धिः + त्रिमार्गगा = दानगन्धिस्त्रिमार्गगा - विसर्गसन्धिः, सत्वम्।

आकाशवायुः + दिनयौवनम् = आकाशवायुर्दिनयौवनम् - विसर्गसन्धिः, रुत्वम्।

दिनयौवन + उत्थान् = दिनयौवनोत्थान् - स्वर सन्धिः, गुणः।

**समास-परिचयः-**

महेन्द्र-द्विप-दानगन्धिः

(i) महेन्द्रस्य द्विपः इति – महेन्द्रद्विपः – षष्ठीतत्पुरुषः।

(ii) महेन्द्र-द्विपस्य दानस्य गन्धः यस्मिन् सः- इति बहुव्रीहिः।

त्रिमार्गगा वीचि विमर्द शीतः – त्रिमार्गगायाः वीचीनां विमर्देन शीतः इति – तृतीयातत्पुरुषः।

आकाशवायुः-आकाशस्य वायुः इति षष्ठीतत्पुरुषः।

दिनयौवनोत्थान् –

(i) दिनस्य यौवनम् इति दिनयौवनम् – षष्ठीतत्पुरुषः।

(ii) दिनयौवनेन उत्तिष्ठति इति दिनयौवनोत्थः, तान् इति – उपपद-तत्पुरुषः।

स्वेदलवान् – स्वदेस्य लवान् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

उत्थान् – उत् + स्था धातुः + क प्रत्ययः – पु. द्वि. ब. व.।

आचामति – आङ् + चम् धातुः + लट् – प्र. पु. ए. व.।

**प्रसङ्गः**- विमानस्थितायाः सीतायाः करस्पर्शमात्रेण विद्युद्-वलयं प्रकटयतः मेघस्य सुन्दरं वर्णनं करोति रामः यत्-

**करेण वातायन-लम्बितेन,**
**स्पृष्टस्त्वया चण्डि! कुतूहलिन्या।**
**आमुञ्चतीवाभरणं द्वितीयम्,**
**उद्भिन्न-विद्युद्वलयो घनस्ते ॥ 21 ॥**

**अन्वयः**- हे चण्डि! कुतूहलिन्या त्वया वातायन-लम्बितेन करेण स्पृष्टः उद्भिन्न-विद्युद्वलयः घनः ते द्वितीयम् आभरणम् आमुञ्चति इव।

**व्याख्या**- हे चण्डि = हे कोपने, हे कोपशीले इति। कुतूहलिन्या = कौतुकवत्या। त्वया = सीतया। वातायनलम्बितेन = वातायने विमानगवाक्षे लम्बितेन = आश्रितेन। करेण = हस्तेन। स्पृष्टः-लब्धसम्पर्कः। उद्भिन्न-विद्युद्वलयः = उद्भिन्नं प्रस्फुटितं, विद्युत्-तडित् एव वलयः – कटकं येन इति तादृशः। घनः = मेघः। ते = तुभ्यम्। द्वितीयम् = अपरम्। आभरणम् = अलङ्कारम्। आमुञ्चति इव = अर्पयति इव।

अयि प्रणयकोपने! अधुना पुष्पकविमानं मेघमार्गेण सञ्चरते। पश्य, यदा त्वया कौतुकात् पुष्पक-गवाक्षात् अवस्रंसितेन हस्तकमलेन स्फुट-तडिद्भूषणः मेघः संस्पृष्टः तदा सः वारिदः ते कोपनस्वभावं परिज्ञाय मन्ये भीतः सन् त्वत्कर-कमले अपरमेकं विद्युन्मयं कङ्कणं समर्पितवान्। अत्र चण्डीत्यनेन कोपनशीलत्वात् भीतो मेघः झटिति त्वामुपचरतीव इति व्यज्यते।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

वात + अयनम् = वातायनम् – स्वरसन्धिः, सवर्णदीर्घः।

स्पृष्टः + त्वया = स्पृष्टस्त्वया – विसर्गसन्धिः, सत्वम्।

आमुञ्चति + इव = आमुञ्चतीव – स्वरसन्धिः, सवर्णदीर्घः।

उत् + भिन्नम् – उद्भिन्नम् – व्यञ्जनसन्धिः, जश्त्वम्।

विद्युत् + वलयः = विद्युद्वलयः – व्यञ्जनसन्धिः, जश्त्वम्।

विद्युद्वलयः + घनः = विद्युद्वलयो घनः – विसर्गसन्धिः, उत्वम्।

घनः + ते = घनस्ते - घनस्ते - विसर्गसन्धिः, सत्वम्।

**समास-परिचयः-**

वातायन-लम्बितेन - वातायने लम्बितेन इति - सप्तमीतत्पुरुषः।

उद्भिन्नविद्युद्वलयः - उद्भिन्नः विद्युद्-वलयं येन सः इति- बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

लम्बितेन - लम्ब् + धातुः क्त - पु. तृ. ए. व.।

स्पृष्टः - स्पृश् धातुः + क्त - पुं. प्र. ए. व.।

आभरणम् - आङ् + भृ धातुः + ल्युट् - नपुं. प्र. ए. व.।

उद्भिन्नम् - उत् + भिद् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः**- राक्षस-भय-विनिर्मुक्ते जनस्थाने आश्रमान् विलोक्य रामः तन्मूलकारणं प्रकटयति यत्-

**अमी जनस्थानमपोढविघ्नम्,**
**मत्वा समारब्धनवोटजानि।**
**अध्यासते चीरभृतो यथास्वं,**
**चिरोज्झितान्याश्रममण्डलानि ॥ 22 ॥**

**अन्वयः**- अमी चीरभृतः जनस्थानम् अपोढविघ्नं मत्वा, समारब्ध-नव+उटजानि चिर +उज्झितानि आश्रम-मण्डलानि यथास्वम् अध्यासते।

**व्याख्या**- अमी = एते पुरः दृश्यमानाः। चीरभृतः = वल्कल-वस्त्रधारिणः तपस्विनः। जनस्थानम् = दण्डकारण्यस्य निवासयोग्यः स्थानविशेषः अथवा निवासयोग्यः अरण्यप्रदेशविशेषः इति तम्। अपोढविघ्नम् = विघ्नरहितम्। मत्वा = ज्ञात्वा। समारब्धनवोटजानि = समारब्धाः-निर्मातुम् आरब्धाः, नवाः-नूतनाः। उटजाः-कुटीराः येषु तानि। चिरोज्झितानि = चिरम्-बहुकालम् यावत् राक्षसभयात् उज्झितानि-त्यक्तानि। आश्रम-मण्डलानि = आश्रमविभागान्। यथास्वम् = यथाधिकारं, यथायोग्यम् अथवा स्वशक्तेः अनुसारं, शान्तिपूर्वकम् इति ।अध्यासते = अधितिष्ठन्ति, निवसन्ति इत्यर्थः।

सीते! सम्मुखे स्थितं पुण्यं जनस्थानं पश्य। पुरा राक्षसभयात् जनस्थाननिवासिनः तपस्विनः जनस्थानं परित्यज्य पलायिताः आसन्। यदा मया राक्षसकुलं विनाशितं तदा ते तपस्विनः स्थानमिदं विघ्नशून्यं परिज्ञाय पुनः प्रत्यावृत्ताः। अधुना ते अस्मिन् एव आश्रमे नव-कुटीरान् निर्माय शान्तिपूर्वकं निवसन्ति तपश्चरन्ति च। अत्र उपजातिवृत्तम्।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अप + ऊढः = अपोढः - स्वरसन्धिः, गुणः।

नव + उटजा = नवोटजाः - स्वरसन्धिः, गुणः।

अधि + आसते= अध्यासते - स्वरसन्धिः, यण्।

चीरभृतः + यथास्वम् = चीरभृतो यथास्वम् - विसर्गसन्धिः, उत्वम्।

चिर + उज्झितानि = चिरोज्झितानि - स्वरसन्धिः, गुणः।

उज्झितानि + आश्रममण्डलानि = उज्झितान्याश्रममण्डलानि - स्वरसन्धिः, यण्।

**समास-परिचयः-**

अपोढविघ्नम् - अपोढाः विघ्नाः यस्मात् इति तत्- बहुव्रीहिः।

समारब्ध-नवोटजानि -

(i) नवाः च ते उटजाः इति नवोटजाः - कर्मधारयः।

(ii) समारब्धाः नवोटजाः येषु तानि - समारब्धनवोटजानि इति- बहुव्रीहिः।

चीरभृतः- चीरं बिभर्त्ति इति चीरभृत्, ते इति- उपपदतत्पुरुषः।

यथास्वम् - स्वम् अनतिक्रम्य इति- अव्ययीभावः।

चिरोज्झितानि - चिरात् उज्झितानि इति अव्ययोपपद-तत्पुरुषः।

अथवा-पञ्चमीतत्पुरु षः।

आश्रममण्डलानि - आश्रमाणां मण्डलानि इति- षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अपोढः - अप + वह् धातुः + क्त - पुं. प्र. ए. व.।

मत्वा - मन् धातुः + क्त्वा - अव्ययप्रत्ययः।

समारब्धाः - सम् + आङ् + रभ् धातुः + क्त - पुं. प्र. ब. व.।

चीरभृतः - चीर + भृ धातुः + क्विप् - पुं. प्र. ब. व.।

उज्झितानि - उज्झ् धातुः + क्त - नपुं. द्वि. ब. व.।

अध्यासते - अधि + आस् धातुः + लट् - प्र. पु. ब. व.।

**प्रसङ्गः**- रामः नूपुर-प्राप्ति-वृत्तान्तं श्रावयति सीतां यत्-

> **सैषा स्थली यत्र विचिन्वता त्वां,**
> **भ्रष्टं मया नूपुरमेकमुर्व्याम्।**
> **अदृश्यत त्वच्चरणारविन्द-**
> **विश्लेषदुःखादिव बद्धमौनम् ॥ 23 ॥**

**अन्वयः**- (हे सीते!) एषा स्थली (वर्त्तते) यत्र त्वाम् विचिन्वता मया (रामेण) उर्व्याम् त्वत् + चरण + अरविन्द-विश्लेष-दुःखात् इव बद्धमौनम् एकम् भ्रष्टम् नूपुरम् अदृश्यत।

**व्याख्या**- एषा = इयम्, दृश्यमाना। सा = सा एव पूर्वतनी, पूर्वदृष्टा। स्थली = स्थानम्, भूमिः। विद्यते इति शेषः। यत्र = यस्यां स्थल्याम्, यस्मिन् स्थाने। त्वाम् = सीताम्। विचिन्वता = अन्वेषयता, गवेषयता। मया = रामेण। उर्व्याम् = पृथिव्याम्, धरायाम्। त्वच्चरणारविन्दविश्लेषदुःखात् इव = तव चरणकमल-वियोग-सन्तापात् इव तव (सीतायाः) पद-पद्म-विरह-व्यथाकरणात् इव। बद्धं मौनं येन तत् बद्धमौनम्, मौनम् आश्रितम्, निःशब्दम्, झङ्कार-रहितम्। भ्रष्टम् = अधः क्षिप्तम्। नूपुरम् = मञ्जीरः। नूपुरं नाम झङ्कृतिकरं चरणालङ्करणम् इति। अदृश्यत = दृष्टम्, विलोकितम्। प्राप्तम् इत्याशयः।

तव वियोगे न केवलम् अहमेव दुःखितः आसम्, अपितु तव नूपुरम् अपि दुःखितम् इव आसीत् इति भावः। 'चरणविश्लेषदुःखात् इव बद्धमौनम्' इत्यत्र उत्प्रेक्षा, नूपुरस्य मौन-कल्पनायां च समासोक्तिः अपि। उपजातिः छन्दः।

# व्युत्पत्ति-दर्शनम्

**सन्धिपरिचयः-**

सा + एषा = सैषा - स्वरसन्धिः, वृद्धिः।

चरण + अरविन्दम् = चरणारविन्दम्-स्वरसन्धिः, सवर्णदीर्घः।

त्वत् + चरणारविन्दम् =त्वच्चरणारविन्दम्-व्यञ्जनसन्धिः, श्चुत्वम्।

दुःखात् + इव = दुःखादिव-व्यञ्जनसन्धिः, जश्त्वम्।

**समास-परिचयः -**

त्वच्चरणारविन्दविश्लेषदुःखात् -

(i) चरणम् एव अरविन्दम् इति चरणारविन्दम् - रूपककर्मधारयः।

(ii) तव चरणारविन्दम् इति त्वच्चरणारविन्दम् - षष्ठीतत्पुरुषः।

(iii) त्वच्चरणारविन्दात् विश्लेषः इति त्वच्चरणारविन्दविश्लेषः पञ्चमीतत्पुरुषः।

(iv) त्वच्चरणारविन्दविश्लेषस्य दुःखम् इति त्वच्चरणारविन्दविश्लेषदुःखम्, तस्मात् इति षष्ठीतत्पुरुषः।

**विशेषनिर्देशः-** अनेक-पद-समास-दशायां प्रायशः अन्तिमपदस्य एव समासनाम व्यवहारे प्रसिध्यति इति सामान्यनियमः।

बद्धमौनम्- बद्धं मौनं येन तत् इति बहुव्रीहिः।

**प्रकृति-प्रत्यय-परिचयः-**

विचिन्वता= वि उपसर्ग + चि धातुः + शतृप्रत्ययः- पुँल्लिङ्गतृतीयैकवचनम्।

बद्धम् = बध् धातुः (बन्ध्)+ क्तप्रत्ययः - नपुं. प्रथमैकवचनम्।

भ्रष्टम् = भ्रंश् धातुः + क्तप्रत्ययः - नपुं. प्रथमैकवचनम्।

अदृश्यत = दृश् धातुः (कर्मणि यक्) + लङ् लकारः - प्रथमपुरुषैकवचनम्।

**प्रसङ्गः-** आत्मानं प्रति लतानां करुणभावं वर्णयति रामः यत्-

**त्वं रक्षसा भीरु! यतोऽपनीता,**
**तं मार्गमेताः कृपया लता मे।**
**अदर्शयन् वक्तुमशक्नुवत्यः,**
**शाखाभिरावर्जितपल्लवाभिः ॥ 24 ॥**

**अन्वयः-** भीरु ! त्वम् (सीता) रक्षसा यतः अपनीता, वक्तुम् अशक्नुवत्यः एताः लताः आवर्जितपल्लवाभिः शाखाभिः कृपया तम् मार्गम् मे अदर्शयन्।

**व्याख्या-** भीरु ! = हे कातरे !, त्रस्त-स्वभावशालिनि! त्वम् = सीता। यतः = यस्मात् मार्गात् अथवा येन मार्गेण। रक्षसा = राक्षसेन, रावणेन। अपनीता = अपहृता, बलपूर्वकं नीता। वक्तुम् = वदितुम्, उच्चारयितुम्, वाणीद्वारा प्रकटयितुम्। अशक्नुवत्यः = अप्रभवन्त्यः, अक्षममाणाः। अशक्ताः, असमर्थाः इत्यर्थः। एताः = इमाः दृश्यमानाः। लताः = प्रतानिन्यः, वीरुधः, मञ्जर्यः। आवर्जित-पल्लवाभिः = नमित-पत्राभिः, नमित-किसलयाभिः। शाखाभिः = अवयव-भूताभिः शाखाभिः। काण्डैः इति। कृपया = करुणया, कारुण्येन, अनुग्रहेण, दयाभावेन इति। मे = माम् अथवा मह्यम् (रामम् रामाय वा)। तम् मार्गम् = तं पन्थानम्। येन मार्गेण रावणः त्वाम् अपहृतवान् नीतवान् इति। अदर्शयन् = प्रदर्शितवत्यः, व्यलोकयन्। असूचयन् इत्याशयः।

लताः अपि मित्रतुल्य-व्यवहारेण मयि कृपां कृत्वा मार्गदर्शनम् अकुर्वन् इति भावः। लतानां

सखीतुल्य-व्यवहार-वर्णनात् समासोक्तिः। शाखासु भुजकल्पना-स्फुरणात्, पल्लवेषु च हस्त-कल्पना-स्फुरणात् लुप्तरूपकम्। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

यतः + अपनीता = यतोऽपनीता - विसर्गसन्धिः, उत्वम्, पूर्वरूपम्।

शाखाभिः + आवर्जित-पल्लवाभिः = शाखाभिरावर्जितपल्लवाभिः- विसर्गसन्धिः,रुत्वम्।

**समास-परिचयः-**

आवर्जित-पल्लवाभिः = आवर्जितानि पल्लवानि याभिः ताः आवर्जित-पल्लवाः (शाखाः) ताभिः इति- बहुव्रीहिः।

अशक्नुवत्यः = न शक्नुवत्यः नञ् तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अपनीता = अप उपसर्गः + नीधातुः + क्त प्रत्ययः + टाप्, प्रथमैकवचनम्।

वक्तुम् = वच् धातुः + तुमुन् प्रत्ययः - अव्ययप्रत्ययः।

अशक्नुवत्यः = नञ् (अ) + शक् धातुः + शतृप्रत्ययः ङीप्, प्रथमाबहुवचनम्।

आवर्जितानि = आङ् उपसर्गः + वृज् धातुः + क्तप्रत्ययः नपुं. प्रथमाबहुवचनम्।

अदर्शयन् = दृश् धातुः (णिजन्तः) + लङ्लकारः - प्रथमपुरुषबहुवचनम्।

**प्रसङ्गः**- हरिणीभिः कृतं मार्गसङ्केतं वर्णयति रामः यत्-

**मृग्यश्च दर्भाङ्कुर-निर्व्यपेक्षाः,**
**तवाऽगतिज्ञं समबोधयन् माम्।**
**व्यापारयन्त्यो दिशि दक्षिणस्याम्,**
**उत्पक्ष्मराजीनि विलोचनानि ॥ 25 ॥**

**अन्वयः**- दर्भ + अङ्कुर -निर्व्यपेक्षाः मृग्यः च उत्पक्ष्म-राजीनि विलोचनानि दक्षिणस्याम् दिशि व्यापारयन्त्यः, तव अगतिज्ञम् माम् समबोधयन्।

**व्याख्या**- दर्भाङ्कुर -निर्व्यपेक्षाः = कुशग्रास-निःस्पृहाः, कुशग्रासभक्षणाऽभिलाष-रहिताः इति। मृग्यः = हरिण्यः, कुरंग्यः, मृगाङ्गनाः। च = समुच्चयार्थकम् इदं पदम्, अपि- इत्यर्थः। उत्पक्ष्म-राजीनि-उन्नतपक्ष्माणि, उत्थित-नेत्र रोमाणि। विलोचनानि = नयनानि, नेत्राणि उत्पक्ष्मराजीनि इति विशेषणपदम्, विलोचनानि इति विशेष्यपदम्। उन्नताः पक्ष्मणां (नयन-रोम-समूहस्य इति) राजयः येषां तानि इति। दक्षिणस्याम् = दक्षिणायाम्, उत्तर-विपरीतायाम्। दिशि = दिशायाम्, ककुभि, आशायाम्। व्यापारयन्त्यः = प्रवर्त्तयन्त्यः, नियोजयन्त्यः। अर्थात् दक्षिणदिशि पश्यन्त्यः इति। तव = सीतायाः। अगतिज्ञम् = गमनाऽनभिज्ञम्, गतिज्ञानरहितम् इति। अत्र गतिशब्दः गमनप्रकारार्थे अथवा चाल-विन्यासाऽर्थे न प्रयुक्तः, अपितु गमन-मार्गाऽर्थे महाकविना प्रयुक्तः। 'सीता कुत्र गता' इति ज्ञानरहितम् = अगतिज्ञम् इत्यर्थः। माम् रामम्। समबोधयन् = अज्ञापयन्, अवेदयन्। दक्षिण-दिशं प्रति नयन-सङ्केतम् अकुर्वन् इत्यर्थः।

हरिण्यः अपि मम दुःखेन दुःखिता व्याकुलाः च अभवन्, यथाशक्ति च मे साहाय्यम् अकुर्वन् इति भावः। 'दर्भाङ्कुर-निर्व्यपेक्षाः' इत्यत्र परिकरः अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धिपरिचयः-**

मृग्यः + च = मृग्यश्च - विसर्गसन्धिः, श्चुत्वम्।

दर्भ + अङ्कुरः = दर्भाङ्कुरः - स्वरसन्धिः, सवर्णदीर्घः।

वि + अपेक्षा = व्यपेक्षा - स्वरसन्धिः, यण्।

व्यापारयन्त्यः + दिशि = व्यापारयन्त्यो दिशि- विसर्गसन्धिः, उत्वम्।

**समास-परिचयः-**

(i) निर्गताः व्यपेक्षा यासां ताः निर्व्यपेक्षाः इति - बहुव्रीहिः।

(ii) दर्भाङ्कुरनिर्व्यपेक्षाः- दर्भाङ्कुरेषु निर्व्यपेक्षाः इति सप्तमी तत्पुरुषः।

उत्पक्ष्मराजीनि- उन्नता पक्ष्मणां राजयः येषां, येषु वा तानि इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अगतिज्ञम् = न गति- उपपदम् + ज्ञा धातुः + क प्रत्ययः - पुं. द्वितीयैकवचनम्।

व्यापारयन्त्यः = वि आङ् + उपसर्गः + पृ धातुः णिजन्तः + शतृप्रत्ययः ङीप्- प्रथमा बहुवचनम्।

समबोधयन् = सम् उपसर्गः + बुध् धातुः (णिजन्तः)- + लङ् लकारः प्रथमपुरुषबहुवचनम्।

**प्रसङ्गः-** माल्यवति पर्वते अनुभूतपूर्वां वियोगपीडां प्रकटयति रामः यत्-

**एतद् गिरेः माल्यवतः पुरस्ताद्,**
**आविर्भवत्यम्बरलेखि शृङ्गम्।**
**नवं पयो यत्र घनैर्मया च,**
**त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ 26॥**

**अन्वयः-** माल्यवतः गिरेः एतत् अम्बरलेखि शृङ्गम् पुरस्तात् आविर्भवति, यत्र घनैः नवम् पयः, मया च त्वद् + विप्रयोग + अश्रु समम् विसृष्टम्।

**व्याख्याः-** (हे सीते!) माल्यवतः = माल्यवन्नामकस्य (माल्यवान् इत्यस्य)। गिरेः = पर्वतस्य, अद्रेः। एतत् = इदं दृश्यमानम्। अम्बर-लेखि - गगनलेखि, गगनचुम्बि। अत्युन्नतम् इत्यर्थः। शृङ्गम् = शिखरम्। पुरस्तात् = अग्रे, अभिमुखम्। आविर्भवति = प्रकटीभवति, दृष्टिपथम् उपैति। दृश्यते इत्यर्थः। यत्र = यस्मिन् शृङ्गे, पर्वतशिखरे। घनैः = मेघैः, जलधरैः। नवम् = नूतनम्, अभिनवम्। पयः = जलम्, सलिलम्। मया च =रामेण च। तव विप्रयोगेण यद् अश्रु तद् इति त्वद्विप्रयोगाश्रु। विप्रयोगः नाम वियोगः , विरहः वा। अश्रु नाम नयनजलम्, नयनवाष्पं वा। समम् = समकालम् एव। वृष्टिकाले अश्रूणि मया विमुक्तानि इत्यर्थः। विसृष्टम् =विमुक्तम्।

तव (सीतायाः) विरहे वृष्टिदर्शनाद् अहं (रामः) अत्यधिकं रुदितवान् इति भावः। घनानां जलविसर्जनस्य रामस्य अश्रुविसर्जनस्य च युगपद् वर्णनाद् अत्र सहोक्तिनामा अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

एतत् + गिरेः = एतद्गिरेः - व्यञ्जनसन्धिः, जश्त्वम्।

गिरेः + माल्यवतः = गिरेर्माल्यवतः - विसर्गसन्धिः रुत्वम्।

आविः + भवति = आविर्भवति – विसर्गसन्धिः, रुत्वम्।

पुरस्तात् + आविर्भवति = पुरस्तादाविर्भवति – व्यञ्जनसन्धिः, जश्त्वम्।

आविर्भवति + अम्बरलेखि = आविर्भवत्यम्बरलेखि – स्वरसन्धिः, यण्।

पयः + यत्र = पयो यत्र – विसर्गसन्धिः, उत्वम्।

घनैः + मया = घनैर्मया = विसर्गसन्धिः, रुत्वम्।

विप्रयोग + अश्रु = विप्रयोगाश्रु –स्वरसन्धिः सवर्णदीर्घः।

त्वत् + विप्रयोगाश्रु = त्वद्विप्रयोगाश्रु – व्यञ्जनसन्धिः, जश्त्वम्।

**समासपरिचयः–**

अम्बरलेखि – अम्बरं लिखति इति (णिनि प्रत्ययः)– उपपदतत्पुरुषः।

त्वद्विप्रयोगाश्रु–

(i) तव विप्रयोगः इति त्वद्विप्रयोगः– षष्ठीतत्पुरुषः।

(ii) त्वद्विप्रयोगेण अश्रु इति त्वद्विप्रयोगाश्रु– तृतीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः–**

आविर्भवति = आविः अव्ययपदम् + भू धातुः + लट् लकारः– प्रथमपुरुषैकवचनम्।

विसृष्टम् = वि उपसर्गः + सृज् धातुः + क्तप्रत्ययः– नपु. प्र. ए. व.।

**प्रसङ्गः**– पूर्वानुभूताम् असह्य-विरह- वेदनां वर्णयति यत्–

**गन्धश्च धाराहतपल्वलानाम्,**
**कादम्बमर्धोद्गतकेसरं च।**
**स्निग्धाश्च केकाः शिखिनां बभूवुः,**
**यस्मिन्नसह्यानि विना त्वया मे ॥ 27 ॥**

**अन्वयः**– यस्मिन् (शृङ्गे) च, धारा + आहत-पल्वलानाम् गन्धः, अर्ध + उद्गत-केसरम् च कादम्बम्, शिखिनां स्निग्धाः केकाः च (इति सर्वाणि अपि) त्वया विना मे असह्यानि बभूवुः।

**व्याख्या** – यस्मिन् च = यत्र, माल्यवत्पर्वतस्य शिखरे इति। धाराभिः आहतानां पल्वलानाम् इति धाराहतपल्वलानाम्। धारा नाम वृष्टिधारा, वर्षाप्रवाहः वा। आहतं नाम प्रताडितं, घट्टितं वा। पल्वलं नाम वेशन्तः, अल्पसरः लघु-तडागः वा। वृष्टिधारा-प्रताडित-लघुसरसाम् इत्यर्थः। गन्धः = सुगन्धः, आमोदः, परिमलः, (सौंधी महक) इति। अर्धम् उद्गतं केसरं यस्य इति अर्धोद्गत-केसरम्, कादम्बमित्यस्य विशेषणमिदम्। अर्धं नाम अपूर्णम् अल्पमात्रं वा। उद्गतं नाम उद्भूतं, रूढं, प्रकटितं वा। केसरं नाम कुसुमतन्तुः। अर्धप्रकटित-तन्तुकम् इत्यर्थः। कादम्बम् = कदम्बपुष्पं, नीपकुसुमम्। शिखिनाम् = मयूराणाम्, शिखण्डिनाम्। च = समुच्चयार्थकम् इदम् अव्ययपदम्। स्निग्धाः = कोमलाः, पेलवाः, मृदुभूताः (स्वर-दृष्ट्या) केकाः = रवाः, रुतानि, स्वराः इति । केका नाम मयूरध्वनिः, अत एव मयूरः केकी इत्यपि उच्यते। (इति सर्वाणि अपि)। त्वया विना = त्वया सीतया विना, तव विरहे इति। मे = मम रामस्य। असह्यानि = असहनीयानि, सोढुम् अशक्यानि। बभूवुः = अभवन्, अभूवन्।

सीता-वियोगे उपस्थितः मेघकालः रामाय अत्यधिकं कष्टप्रदः अभवत् इति भावः। 'सीतया विना असह्यानि बभूवुः' इति कारण-निर्देश-पूर्वकं वर्णनात् काव्यलिङ्गम् अलङ्कारः। इन्द्रवज्रा छन्दः।

# व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

गन्धः + च = गन्धश्च - विसर्गसन्धिः, सत्वं, श्चुत्वम्।

धारा + आहतम् = धाराहतम् - स्वरसन्धिः, सवर्णदीर्घः।

अर्ध + उद्गतम् = अर्धोद्गतम् - स्वरसन्धिः, गुणः।

स्निग्धाः + च = स्निग्धाश्च - विसर्गसन्धिः, सत्वम्, श्चुत्वम्।

बभूवुः + यस्मिन् = बभूवुर्यस्मिन् - विसर्गसन्धिः, रुत्वम्।

यस्मिन् + असह्यानि = यस्मिन्नसह्यानि - व्यञ्जनसन्धिः, नकारद्वित्वम् (ङमुट्)।

**समास-परिचयः-**

धाराहतपल्वलानाम्- धाराभिः आहतानि पल्वलानि इति धाराहतपल्वलानि, तेषाम् इति तृतीयातत्पुरुषः।

अर्धोद्गतकेसरम्- अर्धम् उद्गतं केसरं यस्य यस्मिन् वा इति बहुव्रीहिः।

असह्यानि - न सह्यानि असह्यानि- नञ् तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

स्निग्धः = स्निह्-धातुः + क्तप्रत्ययः + टाप् - प्रथमाबहुवचनम्।

असह्यानि = नञ् (अ) + सह् धातुः + यत्प्रत्ययः (कर्मणि), नपुं. प्र. ब.व.

बभूवुः = भूधातुः + लिट् लकारः - प्रथमपुरुषबहुवचनम्।

**प्रसङ्गः**- घनगर्जना-कालीनां स्वकीयव्यथां वर्णयति यत्-

**पूर्वाऽनुभूतं स्मरता च यत्र,**<br>
**कम्पोत्तरं भीरु! तवोपगूढम्।**<br>
**गुहाविसारीण्यतिवाहितानि,**<br>
**मया कथञ्चिद् घन-गर्जितानि ॥ 28 ॥**

**अन्वयः**- भीरु! यत्र च (शृङ्गे) पूर्व + अनुभूतम् कम्प + उत्तरम् तव उपगूढम् स्मरता मया गुहाविसारीणि घन-गर्जितानि कथञ्चिद् अतिवाहितानि।

**व्याख्या**- भीरु! = हे कातरस्वभावे! यत्र च = यस्मिन् च पर्वतशिखरे, माल्यवत्पर्वतस्य शिखरे इति। पूर्वाऽनुभूतम् = अनुभूतपूर्वम्, विदितपूर्वम्। कम्पोत्तरम् = वेपनपूर्वकम्, कम्पनप्रधानम्। तव = ते सीतायाः। उपगूढम् = उपगूहनम्, आलिङ्गनम्। स्मरता = अनुचिन्तयता, अनुध्यायता। मया = रामेण। गुहा-विसारीणि = कन्दरा-प्रसारीणि, कन्दरा-प्रतिध्वनितानि इत्यर्थः। घन-गर्जितानि = मेघ गर्जितानि, मेघगर्जनानि। कञ्चिद् = यथाकथम् अपि, येन केनाऽपि प्रकारेण। अतिवाहितानि = कष्टेन गमितानि, अर्थात् अतिकष्टपूर्वकं तत्सहनं कृतम्। मेघगर्जनकाले हि भयभीता सीता कम्पमाना रामस्य दृढम् आलिङ्गनं करोति स्म, रामस्य महत् सौख्यं च जनयति स्म। परन्तु वियोगदशायां पुनः तदेव मेघगर्जनं पूर्वतन-स्मृति-करणात् रामस्य कृते अतिमात्रं दुःसहनीयम् अभवत्।

सीता-विरहे घनगर्जितमपि रामस्य व्यथा-वर्धकम् अभवत् इति भावः।

पूर्वानुभूतस्य आलिङ्गनस्य स्मरणम् अत्र क्लेश-कारण-रूपेण वर्णितम्, अतः काव्यलिङ्गम् अलङ्कारः। भीरु! इति विशेषणपदस्य साभिप्राय-प्रयोगात् च परिकरः। छन्दस्तु उपजातिः।

# व्युत्पत्ति-दर्शनम्

**सन्धिः-परिचयः**

पूर्व + अनुभूतम् = पूर्वानुभूतम् - स्वरसन्धिः, सवर्णदीर्घः।

कम्प + उत्तरम् = कम्पोत्तरम् - स्वरसन्धिः, गुणः।

तव + उपगूढम् = तवोपगूढम् - स्वरसन्धिः, गुणः।

गुहाविसारीणि + अतिवाहितानि = गुहाविसारीण्यतिवाहितानि - स्वरसन्धिः, यण्।

**समास-परिचयः-**

पूर्वानुभूतम् = पूर्वम् अनुभूतम् इति कर्मधारयः।

कम्पोत्तरम् = कम्पः उत्तरं यस्मिन् इति कम्पोत्तरम्, तद् इति बहुव्रीहिः।

गुहा-विसारीणि = गुहासु विसरति इति गुहाविसारि तानि इति उपपदतत्पुरुषः।

घन-गर्जितानि = घनानां गर्जितानि इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अनुभूतम् = अनु उपसर्गः + भूधातु +क्तप्रत्ययः, नपुं द्वितीयैकवचनम्।

स्मरता = स्मृधातुः + शतृप्रत्ययः, पु. तृतीया एकवचनम्।

उपगूढम् = उप-उपसर्ग + गुह् धातुः + क्तप्रत्ययः (भावे), नपुं. प्र. ए.।

अतिवाहितानि = अति-उपसर्गः + वह् धातुः (णिजन्तः) + क्तप्रत्ययः नपुं. प्र. ब. व.।

गर्जितानि = गर्ज् धातु + क्तप्रत्ययः (भावे) नपुं. प्रथमा. ब. व.।

**प्रसङ्गः**- वियोग-दशायां नवकन्दल-कुसुमानां प्रभावं वर्णयति यत्-

**आसार-सिक्त-क्षितिवाष्पयोगात्,**
**मामक्षिणोद् यत्र विभिन्नकोशैः।**
**विडम्ब्यमाना नवकन्दलैस्ते,**
**विवाह-धूमाऽऽरुण-लोचनश्रीः ॥ 29 ॥**

**अन्वयः**- यत्र (शृङ्गे) विभिन्न-कौशैः नव-कन्दलैः आसार-सिक्त-क्षिति-वाष्प-योगात् विडम्ब्यमाना ते विवाह-धूम + लोचन-श्रीः माम् अक्षिणोत्।

**व्याख्या**- यत्र = यस्मिन् पर्वतशिखरे। विभिन्न-कोशैः = विकसित-कलिकैः, विदलितकुड्मलैः, प्रकटिताङ्कुरैः। इदं विशेषणपदम्। नव-कन्दलैः इति विशेष्यपदम्। नव-कन्दलैः = नवीनकन्दलीकुसुमैः, अभिनव-कन्दल-पुष्पैः। आसार-सिक्त-क्षिति-वाष्प-योगात् = तीव्रवृष्टि-द्रवित-भूमि-वाष्पकण-संयोगात्, धारा-सम्पात-क्लेदित-वसुधा-वाष्पकण-सम्पर्कात् इति। आसारः नाम धारासम्पातः, तीव्रवृष्टिः वा। विडम्ब्यमाना = अनुक्रियमाणा, तुल्यमाना। ते= तव सीतायाः। विवाह-धूमाऽऽरुण-लोचन-श्रीः = पाणिग्रहण-यज्ञधूम-रक्तवर्ण-नेत्र-शोभा, विवाह-यज्ञधूमेन रक्तवर्ण-नयन-सौन्दर्यम् इति। माम् = रामम्। अक्षिणोत् = अव्यथयत्, अपीडयत्, व्याकुलयत् इति।

अरुणवर्णानि नव-कन्दल-कुसुमानि विलोक्य तव (सीतायाः) नयनसौन्दर्यं स्मृतवान्, तेन स्मरणेन च वियोगकाले मम (रामस्य) पीडा इतोऽपि अवर्धत इत्याशयः।

सीतानयनसाम्य-कारणात् नव-कन्दलदर्शनमपि विरहिणः रामस्य कृते दुःसहनीयम् अभवत् इति भावः।

नवकन्दल-दर्शनेन नयन-सौन्दर्य-स्मरण-वर्णनात् अत्र स्मरण-नामकः अलङ्कारः। 'वाष्प-योगात्' इति कारणप्रदर्शनात् काव्यलिङ्गम् अपि। नवकन्दलानां नयनसाम्यात् उपमा चापि। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अक्षिणोत् + यत्र = अक्षिणोद्यत्र - व्यञ्जनसन्धिः, जश्त्वम्।

नवकन्दलैः + ते = नवकन्दलैस्ते - विसर्गसन्धिः, सत्वम्।

धूम + अरुणा= धूमारुणा - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

आसार-सिक्त-क्षिति-वाष्प-योगात्-

(i) आसारेण सिक्ता इति आसार-सिक्ता- तृतीया तत्पुरुषः।

(ii) आसारसिक्ता च सा क्षितिः इति आसारसिक्तक्षितिः कर्मधारयः।

(iii) आसारसिक्तक्षितेः वाष्पम् इति आसार-सिक्त-क्षिति-वाष्पम् इति षष्ठीतत्पुरुषः।

(iv) आसारसिक्तक्षितिवाष्पस्य योगः इति- आसारसिक्तक्षितिवाष्पयोगः, तस्मात् इति षष्ठीतत्पुरुषः।

विभिन्न-कोशैः - विभिन्नं कोशं यस्य इति विभिन्नकोशम्, तैः इति बहुव्रीहिः।

नव-कन्दलैः - नवानि च तानि कन्दलानि इति नवकन्दलानि, तैः इति कर्मधारयः।

विवाह-धूमाऽरुण-लोचन-श्रीः-

(i) विवाहस्य धूमः (यज्ञादिजन्यः) इति विवाहधूमः - षष्ठीतत्पुरुषः।

(ii) विवाह-धूमेन अरुणा इति विवाह-धूमाऽरुणा-तृतीयातत्पुरुषः।

(iii) लोचनयोः श्रीः इति लोचन-श्रीः- षष्ठीतत्पुरुषः।

(iv) विवाह-धूमाऽरुणा च सा लोचन-श्रीः= इति विवाह-धूमाऽरुण-लोचन-श्रीः- कर्मधारयः।

**प्रकृति-प्रत्ययादि-परिचयः-**

सिक्ता = सिच् धातुः + क्तप्रत्ययः + टाप्- प्रथमा एकवचनम्।

योगात् = युज् धातुः + घञ्प्रत्ययः - पुं. पञ्चमी एकवचनम्।

विभिन्नम् = वि-उपसर्गः + भिद्धातुः + क्तप्रत्ययः - नपुं. प्रथमा एकवचनम्।

विडम्ब्यमाना = वि-उपसर्ग + डम्ब् धातुः (कर्मणि यक्) + शानच् प्रत्ययः टाप्- प्र. व. ए. ।

अक्षिणोत् = क्षिणु-धातु + लङ् लकारः - प्रथमपुरुषैकवचनम्।

**प्रसङ्ग-** इदानीं विमानस्थितः श्रीरामः सीतां पम्पासरोवर-जलानि दर्शयति यत्-

**उपान्त-वानीर-वनोपगूढा-**
**न्यालक्ष्य-पारिप्लव-सारसानि।**
**दूराऽवतीर्णा पिबतीव खेदात्,**
**अमूनि पम्पासलिलानि दृष्टिः ॥ 30॥**

**अन्वयः-** उपान्त-वानीर-वन + उपगूढानि, आलक्ष्य-पारिप्लव- सारसानि,
अमूनि पम्पा-सलिलानि दूर+ अवतीर्णा (मे) दृष्टिः खेदात् पिबति इव।

**व्याख्या-** (हे सीते!) उपान्त-वानीर-वनोपगूढानि = पार्श्वभागस्थितवेतस-वन-परिवृतानि, प्रान्तभागस्थित-वेतस-विपिन-परियुक्तानि इति। उपान्तः नाम पार्श्वभागः, प्रान्तभागः, परितो भागः वा। वानीरः नाम वेतसः,

वेतसी, वञ्जुलः नडविशेषः वा (बेंत अथवा नरकुल या सरकण्डे) इति। वनं नाम विपिनम् अरण्यं वा। उपगूढानि = परिवृतानि। समन्तात् वेतस-विपिनैः समावृतानि इत्यर्थः। इदं विशेषणपदम्। पम्पासलिलानि- इति विशेष्यपदम्।

आलक्ष्याः पारिप्लवाः सारसाः येषु (सलिलेषु) इति तानि- आलक्ष्य-पारिप्लव-सारसानि। इदम् अपि पम्पासलिलानां विशेषणम्। आलक्ष्याः नाम ईषद् दृश्याः, अस्पष्टं दृश्याः। पारिप्लवाः नाम चञ्चलाः, चपलाः। सारसाः नाम पक्षिविशेषाः, हंसभेदविशेषाः वा। ईषद्दृश्यचञ्चल-सारसानि इत्यर्थः। अमूनि = तानि। पम्पासलिलानि = पम्पासरो-जलानि, पम्पासरोवर-नीराणि वा। दूराऽवतीर्णा = सुदूर-विस्तीर्णा, दूरपर्यन्तम् अवनता। (मे रामस्य)। दृष्टिः = विलोकनम्, दृक्, नयने वा। खेदात् = परिश्रान्ति-वशात्, खिन्नता-वशात् वा। पिबति इव = आस्वादयति इव, रसयति इव।

यथा कश्चित् पिपासितः सुदूरं परिभ्रम्य जलं लब्ध्वा तत् त्यक्तुं न शक्नोति, तथैव मे दृष्टिः पम्पासलिलानि न जहाति (त्यजति) इत्याशयः। ध्यानविशेषेण निरन्तरम् अवलोकनम् अपि पान-शब्देन व्यवहरन्ति कवयः।

पम्पासरोवरस्य महान् विस्तारः महती रमणीयता च आसीत् इति भावः।

पिबति इव इत्यत्र पानक्रियायाः सम्भावनात् उत्प्रेक्षा अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

वन + उपगूढानि = वनोपगूढानि- स्वरसन्धिः, गुणः।

उपगूढानि + आलक्ष्याः = उपगूढान्यालक्ष्याः - स्वरसन्धिः यण्।

दूर + अवतीर्णा = दूरावतीर्णा - स्वरसन्धिः, सवर्णदीर्घः।

पिबति + इव = पिबतीव - स्वरसन्धिः, सवर्णदीर्घः।

खेदात् + अमूनि = खेदादमूनि - व्यञ्जनसन्धिः, जश्त्वम्।

**समास-परिचयः-**

उपान्त-वानीर-वनोपगूढानि-

(i) वानीरस्य वनम् इति वानीर वनम् - षष्ठीतत्पुरुषः।

(ii) उपान्तं वानीर-वनम् इति उपान्तवानीर वनम् - कर्मधारयः।

(iii) उपान्त-वानीर-वनैः उपगूढानि इति उपान्तवानीरवनोपगूढानि तृतीयातत्पुरुषः।

आलक्ष्य-पारिप्लव-सारसानि-

आलक्ष्याः पारिप्लवाः सारसाः येषु तानि इति बहुव्रीहिः।

दूरावतीर्णा = दूराद् अवतीर्णा इति पञ्चमीतत्पुरुषः।

पम्पासलिलानि = पम्पायाः सलिलानि इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

उपगूढानि = उप गुह् + क्तप्रत्ययः - नपुं. द्वितीया बहुवचनम्।

आलक्ष्याः = आङ् + लक्ष् + ण्यत् प्रत्ययः - पुं. प्र. ब. व.।

अवतीर्णा = अव + तॄ + क्तप्रत्ययः + टाप् - प्रथमा एकवचनम्।

दृष्टिः = दृश् + क्तिन् प्रत्ययः-(स्त्री.)प्रथमा एकवचनम्।

**प्रसङ्गः**- पम्पा-सरोवरे पूर्वदृष्टानि चक्रवाक-युगलानि वर्णयति रामः यत्-

**अत्राऽवियुक्तानि रथाङ्गनाम्नाम्,**
**अन्योऽन्यदत्तोत्पल-केसराणि।**
**द्वन्द्वानि दूरान्तर-वर्त्तिना ते,**
**मया प्रिये सस्पृहमीक्षितानि ॥ 31 ॥**

**अन्वयः**- प्रिये! ते दूर + अन्तर-वर्त्तिना मया अत्र (पम्पा-सरसि) रथाङ्गनाम्नाम् अन्योऽन्य-दत्त + उत्पल-केसराणि अवियुक्तानि द्वन्द्वानि सस्पृहम् ईक्षितानि।

व्याख्या- प्रिये! = हे प्राणवल्लभे! प्रियतमे! ते = तव, सीतायाः। दूरान्तर-वर्त्तिना = दूरदेशवर्त्तिना, दूरदेशस्थितेन। मया = रामेण, वियुक्तप्रियेण इत्याशयः। अत्र = अस्मिन् पम्पा-सरोवरे। रथाङ्गनाम्नाम्=चक्रवाकानाम्। अन्योऽन्य-दत्तोत्पल-केसराणि = परस्पर-समर्पित-कमल-तन्तुकानि, परस्पर-प्रदत्त-पद्म-तन्तुसूत्राणि इति। अवियुक्तानि = वियोगरहितानि, सङ्गतानि इत्यर्थः। द्वन्द्वानि = युगलानि, मिथुनानि। सस्पृहम् = स्पृहापूर्वकम्, साभिलाषम् इति। ईक्षितानि = विलोकितानि, निर्वर्णितानि दृष्टानि इति।

चक्रवाक-मिथुनानि विलोक्य अहं (रामः) तव (सीतायाः) अतितरां स्मरणं कृतवान् इति भावः। अत्र दूरान्तरस्थितिः सस्पृहम् ईक्षणस्य कारणरूपेण वर्णिता, अतः काव्यलिङ्गम् अलङ्कारः। 'अवियुक्तानि' 'दूरान्तवर्तिना', इत्यादिपदेषु अभिप्राय-विशेष-प्रकटनात् परिकराऽलङ्कारोऽपि विद्यते। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

अत्रावियुक्तानि = अत्र + अवियुक्तानि - स्वरसन्धिः, सवर्णदीर्घः।

दत्तोत्पलकेसराणि = दत्त + उत्पल-केसराणि - स्वरसन्धिः, गुणः।

दूरान्तरवर्त्तिना = दूर + अन्तरवर्तिना - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः**-

दूरान्तर-वर्त्तिना-

(i) दूरम् च तद् अन्तरम् इति दूरान्तरम् - कर्मधारयः।

(ii) दूरान्तरे वर्त्तते इति दूरान्तर-वर्त्ती, तेन इति उपपदतत्पुरुषः।

रथाङ्ग-नाम्नाम्- रथाङ्ग इति नाम यस्य सः रथाङ्गनामा, तेषाम् इति बहुव्रीहिः।

अन्योन्यदत्तोत्पलकेसराणि = अन्योन्यस्मै दत्तानि उत्पलानां केसराणि यैः तानि इति बहुव्रीहिः।

अवियुक्तानि - न वियुक्तानि इति - नञ्तत्पुरुषः।

सस्पृहम् - स्पृहया सह इति अव्ययीभावः।

**प्रकृति-प्रत्ययादि-परिचयः**-

दत्तानि - दा धातुः + क्तप्रत्ययः - नपुं. प्रथमाबहुवचनम्।

अवियुक्तानि - नञ् (अ) + वि उपसर्ग + युज् धातुः + क्तप्रत्ययः - नपुं. प्र. ब. व.।

ईक्षितानि - ईक्ष् धातुः + क्तप्रत्ययः- नपुं. प्रथमाबहुवचनम्।

**प्रसङ्गः**-अशोक-लताम् अवलोक्य आत्मनः पूर्वतनं विमोहं (भ्रान्तिम्) वर्णयति यत्-

**इमां तटाशोकलतां च तन्वीम्,**
**स्तनाऽभिराम-स्तबकाऽभिनम्राम्।**
**त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः,**
**सौमित्रिणा साश्रुरहं निषिद्धः ॥ 32 ॥**

**अन्वयः**- इमाम् च स्तन + अभिराम - स्तबक + अभिनम्राम् तन्वीम् तट + अशोक -लताम् (विलोक्य) त्वत्-प्राप्ति-बुद्ध्या स + अश्रुः परिरब्धु-कामः अहम् (रामः) सौमित्रिणा निषिद्धः।

**व्याख्या**- इमाम् च = एतां च, पुरतः दृश्यमानाम् इति। स्तनौ इव अभिरामौ इति स्तनाऽभिरामौ, स्तनाऽभिरामौ च तौ स्तबकौ इति स्तनाऽभिरामस्तबकौ, स्तनाभिरामस्तबकाभ्याम् अभिनम्रा इति-स्तनाभिरामस्तबकाऽभिनम्रा, ताम् इति। स्तनः नाम पयोधरः, वक्षोजः वा। अभिरामः नाम सुन्दरः, रम्यः रमणीयः वा। स्तबकः नाम गुच्छः, पुष्पपुञ्जः वा। अभिनम्रः नाम नतः, अवनतः वा। पयोधरतुल्यरमणीय-पुष्पगुच्छाऽवनताम् इत्यर्थः। 'अशोक-लताम्' इत्यस्य विशेषणम् इदम्। तन्वीम् = कृशाङ्गीम्, मृदुलाङ्गीम्, मृदुलाम् इति। तटाऽशोक-लताम् = तटस्थिताऽशोकवृक्षशाखाम्, कूलस्थिताऽशोकतरु-व्रततिम् इति। (विलोक्य) त्वत्प्राप्तिबुद्ध्या = तव लब्धि-धिया, 'त्वं प्राप्ता' इति विचारेण। साश्रुः = अश्रुपूरितनयनः नयनजलाकुलः इति। चिर-वियुक्तं प्रियजनं विलोक्य अपि भावावेशात् अश्रूणि प्रवहन्ति। अत्र स एव अभिप्रायः। परिरब्धुकामः = परिरब्धुं कामः यस्य सः, आलिङ्गितु-कामः, आलिङ्गन-तत्परः। अहम् = रामः, तदा भावावेग-व्याकुलः इत्याशयः। सौमित्रिणा = सुमित्रानन्दनेन, लक्ष्मणेन। निषिद्धः = वर्जितः, निवारितः, अवरोधितः। अर्थात् लक्ष्मणः माम् बोधितवान् यत् इयं सीता न वर्त्तते, अपितु तत्सदृश-दर्शना अशोक-लता वर्त्तते इति।

सीता-वियोग-व्याकुलः रामः वस्तु-विवेचने अपि शिथिलशक्तिः अभवत् इति भावः।
स्तनसादृश्यात् अत्र उपमा अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**- तट + अशोक-लताम् = तटाशोक-लताम् - स्वरसन्धिः, सवर्णदीर्घः।
स्तन + अभिरामः = स्तनाभिरामः- स्वरसन्धिः सवर्णदीर्घः।
स्तबक + अभिनम्राम् = स्तनाभिनम्राम् - स्वरसन्धिः, सवर्णदीर्घः।
साश्रुः + अहम् = साश्रुरहम् - विसर्गसन्धिः, रुत्वम्।

**समास-परिचयः**-
स्तनाभिरामस्तबकाभिनम्राम्- स्तनाभ्याम् इव अभिराम-स्तबकाभ्याम् अभिनम्राम् इति तृतीयातत्पुरुषः।
तटाशोक-लताम् -
(i) तटे स्थितः अशोक इति तटाशोकः इति मध्यपदलोपी समासः।
(ii) तटाशोकस्य लता इति तटाशोक-लता, ताम् इति षष्ठीतत्पुरुषः।
त्वत्प्राप्तिबुद्ध्या- तव प्राप्तेः बुद्ध्या इति षष्ठीतत्पुरुषः।
परिरब्धुकामः - परिरब्धुं कामः यस्य सः इति बहुव्रीहिः।
साश्रुः- सह अश्रुभिः यः सः इति उपसर्जन-बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः**-
तन्वीम् - तनु + ङीप् (स्त्रीत्वविवक्षायाम्) - द्वितीयैकवचनम्।

परिरब्धुम् - परि उपसर्ग + रभ् धातुः + तुमुन् प्रत्ययः अव्यय-प्रत्ययः।
प्राप्तिः- प्र उपसर्गः + आप् धातुः + क्तिन् प्रत्ययः -स्त्री. प्र. ए. व.।
बुद्धिः- बुध् धातुः + क्तिन् प्रत्ययः - स्त्री. प्र. ए. व.।
निषिद्धः - नि-उपसर्ग + सिध् धातुः + क्तप्रत्ययः- पुं. प्र. ए. व.।

**प्रसङ्गः**- अथ रामः सारस-पङ्क्तीः दर्शयति सीतां यत्-

**अमूर्विमानान्तरलम्बिनीनाम्,**
**श्रुत्वा स्वनं काञ्चन-किङ्किणीनाम्।**
**प्रत्युद्व्रजन्तीव खमुत्पतन्त्यः,**
**गोदावरी-सारस-पङ्क्तयस्त्वाम् ॥ 33 ॥**

**अन्वयः**- विमान + अन्तर - लम्बिनीनाम्, काञ्चन-किङ्किणीनाम् स्वनम् श्रुत्वा खम् उत्पतन्त्यः अमूः गोदावरी-सारस-पङ्क्तयः त्वाम् प्रत्युद्व्रजन्ति इव।

**व्याख्या**- विमानस्य अन्तरे लम्बते (या) इति विमानान्तरलम्बिनी, तासाम्, इति। काञ्चनकिङ्किणीनां विशेषणमिदम्। विमानं नाम वायुयानं, पवन-रथः वा। पुष्पकनामकं प्रसिद्धम् इति। अन्तरं नाम मध्यभागः, अवकाशः, अन्तरालं, रिक्तस्थानं वा। पुष्पक-विमानमध्य-लम्बितानाम्, वायुयानाऽवकाशस्थान-लग्नानाम् इत्यर्थः। काञ्चन-किङ्किणीनाम् = सुवर्ण-घण्टिकानाम्, हेमघण्टिकानाम् इति। स्वनम् = शब्दम्, ध्वनिम्। श्रुत्वा = आकर्ण्य, निशम्य। खम् = आकाशम्, गगनम्, नभः। उत्पतन्त्यः = उड्डयमानाः उड्डीयमानाः, उद्गच्छन्त्यः इति। अमूः = ताः,पुरतः दृश्यमानाः इति। गोदावरी- सारस-पङ्क्त्यः = गोदावरी-नदी-हंसविशेष-समूहाः। त्वाम् = सीताम्। प्रत्युद्व्रजन्ति-इव = प्रत्युद्गच्छन्ति वा। प्रत्युद्गमनं नाम स्वागत-सत्कार-भावनया अग्रे गमनम् इति। अत्र इव पदम् उत्प्रेक्षायां प्रयुक्तम्।

काञ्चनकिङ्किणीनां शब्दं श्रुत्वा निज-यूथ-शब्द-भ्रमात् सारसपङ्क्तयः आकाशम् उत्पतन्ति इत्याशयः।

तासां सारसपङ्क्तीनाम् आगमनं च सीतायाः स्वागतार्थम् (इव) प्रतीयते इति भावः।

सारसपङ्क्तीनाम् आगमने सीतायाः कृते स्वागत-व्याहार-प्रयोजनस्य सम्भावनात् अत्र उत्प्रेक्षाऽलङ्कारः। छन्दस्तु उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

विमान + अन्तरम् = विमानान्तरम् - स्वरसन्धिः, सवर्णदीर्घः।
अमूः + विमानान्तरम् = अमूर्विमानान्तरम् - विसर्गसन्धिः, रुत्वम्।
व्रजन्ति + इव = व्रजन्तीव - स्वरसन्धिः, सवर्णदीर्घः।
उत् + व्रजन्ति - उद्व्रजन्ति - व्यञ्जनसन्धिः, जश्त्वम्।
प्रति + उद्व्रजन्ति = प्रत्युद्व्रजन्ति - स्वरसन्धिः, यण्।
पङ्क्तयः + त्वाम् = पङ्क्तयस्त्वाम् - विसर्गसन्धिः, सत्वम्।

**समास-परिचयः-**

विमानान्तर-लम्बिनीनाम्-
(i) विमानस्य अन्तरम् इति विमानान्तरम्- षष्ठीतत्पुरुषः।

(ii) विमानान्तरे लम्बते इति विमानान्तर-लम्बी, स्त्रीलिङ्गे च- विमानान्तर-लम्बिनी, तासाम् इति- उपपदतत्पुरुषः।

काञ्चन-किङ्किणीनाम् - काञ्चनी च सा किङ्किणी इति काञ्चन-किङ्किणी, तासाम् इति - कर्मधारयः।

गोदावरी-सारस-पङ्क्तयः- गोदावर्याः सारसानां पङ्क्तयः इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

श्रुत्वा - श्रु धातुः + क्त्वा प्रत्ययः - अव्ययप्रत्ययः।

उत्पतन्त्यः - उत् उपसर्गः + पत् धातुः + शतृ प्रत्ययः + ङीप् - प्र. ब. व.।

प्रत्युद्व्रजन्ति - प्रति + उत् उपसर्गौ + व्रज् धातुः + लट् लकारः- प्र. पु. ब. व.।

**प्रसङ्गः**- विमानात् पञ्चवटी-दर्शनं क्रियते यत्-

**एषा त्वया पेशलमध्ययाऽपि,**
**घटाम्बु-संवर्धित-बालचूता।**
**आनन्दयत्युन्मुख-कृष्णसारा,**
**दृष्टा चिरात्पञ्चवटी मनो मे ॥ 34 ॥**

**अन्वयः**- पेशल- मध्यया अपि त्वया घट + अम्बु - संवर्धित-बालचूता, उन्मुख-कृष्णसारा, चिरात् दृष्टा एषा पञ्चवटी मे मनः आनन्दयति।

**व्याख्या**-पेशलः मध्यः यस्याः सा पेशलमध्या, तया इति। सीतायाः विशेषणमिदं तृतीयान्तम् (त्वया) इति। पेशलः नाम कोमलः, सुकुमारः, कृशः वा। मध्यः नाम मध्यभागः, कटिप्रदेशः, कटिस्थलं वा। कृशकटिस्थलया इत्यर्थः। भार-वहने असमर्थया इति आशयः। अपि = तथापि, (यद्यपि कोमल-कटिः तथापि इत्याशयः)। त्वया= सीतया। घटस्य अम्बु इति घटाम्बु, घटाम्बुभिः संवर्धितः इति घटाम्बुसंवर्धितः, घटाम्बुसंवर्धिता: बालचूताः यस्याम् इति सा घटाम्बुसंवर्धितबालचूता। पञ्चवट्याः। विशेषणामिदं प्रथमान्तम्। घटः नाम कुम्भः, कलशः, जलपात्रविशेषः वा। अम्बु नाम जलं, नीरं, सलिलम्, अम्भः वा। संवर्धितः नाम परिपोषितः, समेधितः वा। बालचूतः नाम नवीनः आम्रपादपः, लघुः आम्रवृक्षः वा। कलश-सलिल-परिवर्धित-नवाम्रा इत्यर्थः। सीता यद्यपि जलपूर्ण-कुम्भ-वहने असमर्था आसीत् तथापि सा पञ्चवटीमध्ये जलसेचनैः आम्रपादपान् पोषितवती-इत्याशयः। एतादृशी पञ्चवटी इति। उन्मुखाः कृष्णसाराः यस्याम् इति सा उन्मुख-कृष्णसारा। इदमपि पञ्चवट्याः विशेषणम्। उन्नतं मुखं यस्य सः उन्मुखः, ते उन्मुखाः इति। अर्थात् ऊर्ध्वमुखाः। कृष्णसारः नाम मृगविशेषः। ऊध्वमुख-कृष्णसारमृगा इत्यर्थः। यस्यां पञ्चवट्यां कृष्णसारमृगाः मुखम् ऊर्ध्वं कृत्वा साम्प्रतम् अस्माकं विमानं प्रति पश्यन्ति इति सा (पञ्चवटी)।

चिरात् = बहुकालाऽनन्तरम्, दीर्घकालात्। दृष्टा = विलोकिता, वीक्षिता, दृष्टिपथम् उपयाता इति। पञ्चवटी = वनविशेषभागः, दण्डकारण्यस्य भागविशेषः, स्थानभेदः वा। (वनवास-काले सीतारामाभ्याम् अस्यां पञ्चवट्याम् एव निवासः कृतः, इदानीं च प्रत्यागमन-वेलायां मार्गे सा पुनः दृष्टा इति।) मे = मम, रामस्य। मनः = हृदयं चेतः। आनन्दयति = आह्लादयति, सुखयति, हर्षयति इति। अहं (रामः) अतीव प्रसन्नः अस्मि इति तात्पर्यम्। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पेशलमध्यया + अपि = पेशलमध्ययापि - स्वरसन्धिः, सवर्णदीर्घः।

घट + अम्बु = घटाम्बु – स्वरसन्धिः, सवर्णदीर्घः।

उत् + मुखः = उन्मुखः – व्यञ्जनसन्धिः, अनुनासिक-परसवर्णः।

आनन्दयति + उन्मुखः = आनन्दयत्युन्मुखः = स्वरसन्धिः, यण्।

मनः + मे = मनो मे – विसर्गसन्धिः, उत्वम्।

**समास-परिचयः-**

पेशलमध्यया- पेशलः मध्यः यस्याः सा, तया इति – बहुव्रीहिः।

घटाम्बु-संवर्धित-बालचूता-

(i) घटस्य अम्बु इति घटाम्बु – षष्ठीतत्पुरुषः।

(ii) घटाम्बुभिः संवर्धित इति घटाम्बु संवर्धिताः – तृतीयातत्पुरुषः।

(iii) बालः च असौ चूतः इति बालचूतः- कर्मधारयः।

(iv) घटाम्बुसंवर्धिताः बालचूताः यस्याम् इति सा- घटाम्बुसंवर्धित-बालचूता बहुव्रीहिः। उन्मुख-कृष्णसारा-

(i) उन्नतम् , ऊर्ध्वं मुखं यस्य सः- उन्मुखः इति बहुव्रीहिः।

(ii) उन्मुखाः कृष्णसाराः यस्यां सा- उन्मुख-कृष्णसारा इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

संवर्धितः- सम् उपसर्ग + वृध् धातुः (णिजन्तः) + क्तप्रत्ययः – पुं. प्र. ए. व.।

दृष्टा = दृश् धातुः + क्तप्रत्ययः (स्त्रियाम्)+ टाप् – प्र. ए. व.।

आनन्दयति = आङ् उपसर्ग + नन्द् धातुः (णिजन्तः) + लट् लकारः प्र. पु. ए. व.।

**प्रसङ्गः**- रामः पञ्चवट्यां वञ्जुल-निकुञ्जेषु सीतया सह यापितानि दिनानि स्मरति यत्-

**अत्रानुगोदं मृगया-निवृत्तः,**
**तरङ्ग-वातेन विनीतखेदः।**
**रहस्त्वदुत्सङ्ग-निषण्णमूर्धा,**
**स्मरामि वानीर-गृहेषु सुप्तः ॥ 35॥**

**अन्वयः**-अत्र (पञ्चवट्याम्)अनुगोदम् मृगया-निवृत्तः, तरङ्ग-वातेन विनीतखेदः, वानीर-गृहेषु रहः त्वद् + उत्सङ्ग-निषण्ण-मूर्धा (अहम्) सुप्तः (इति एतत्) स्मरामि।

**व्याख्या**- अत्र = अस्यां पञ्चवट्याम्। अनुगोदम् = गोदा- नदी- समीपे, गोदावरी-निकटे इति। मृगयायाः निवृत्तः इति मृगयानिवृत्तः। रामस्य विशेषणमिदं प्रथमान्तम्। मृगया नाम आखेटः। निवृत्तः नाम प्रत्यागतः। आखेटक्रीडा-निवृत्तः, सम्पादिताखेटः, आखेटं कृत्वा इत्यर्थः। तरङ्ग-वातेन = वीचि-पवनेन, ऊर्मि-समीरेण। गोदावरी-तरङ्ग-शीतल-वायुना इत्यर्थः। विनीतः खेदः यस्य सः विनीतखेदः। इदमपि रामस्य विशेषणं प्रथमान्तम्। निवारित-श्रमः, अपसारित-क्लान्तिः। श्रान्ति-रहितः इत्यर्थः वानीरगृहेषु = वेतसनिकुञ्जेषु। रहः = रहसि, निभृतम्, एकान्तक्षणेषु इत्यर्थः। त्वदुत्सङ्ग- निषण्ण-मूर्धा = तव (सीतायाः) उत्सङ्गे निषण्णः मूर्धा यस्य सः (अहं रामः इति)। उत्सङ्गः नाम क्रोडः अङ्कः वा। निषण्णः नाम स्थितः, विन्यस्तः वा। मूर्धा नाम शिरः, मस्तकं वा। त्वदङ्क-विन्यस्त-मस्तकः, त्वत्क्रोडस्थित-शिराः इत्यर्थः। तव (सीतायाः) उत्सङ्गे स्वकीयं शिरः निधाय इत्याशयः। (अहं रामः)। सुप्तः = शयितः सुप्तवान्, शयनं कृतवान्। ससुखं निद्रां प्राप्तवान् इत्याशयः। (इति एतत् अतीत-वृत्तम्) स्मरामि = अनुचिन्तयामि, अनुध्यायामि।

अस्यामेव पञ्चवट्यां सुखमयाः दिवसाः आवाभ्यां (राम-सीताभ्यां)यापिताः, अत एव इयं प्रिया (पञ्चवटी) आनन्दयति इति भावः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अत्रानुगोदम् =अत्र + अनुगोदम् - स्वरसन्धिः, सवर्णदीर्घः।

निवृत्ततरङ्गवातेन = निवृत्तः + तरङ्गवातेन - विसर्गसन्धिः, सत्वम्।

त्वदुत्सङ्गे = त्वत् + उत्सङ्गे -व्यञ्जनसन्धिः, जश्त्वम्।

रहस्त्वदुत्सङ्गे = रहः + त्वदुत्सङ्गे - विसर्गसन्धिः, सत्वम्।

**समास-परिचयः-**

अनुगोदम् = गोदायाः समीपम् (अनु)इति - अव्ययीभावः।

मृगयानिवृत्तः = मृगयायाः निवृत्तः इति पञ्चमीतत्पुरुषः।

तरङ्गवातेन = तरङ्गाणां वातेन इति षष्ठी-तत्पुरुषः।

विनीत-खेदः = विनीतः खेदः यस्य सः इति बहुव्रीहिः।

त्वदुत्सङ्ग-निषण्ण-मूर्धा -

(i) तव उत्सङ्गः इति त्वदुत्सङ्गः- षष्ठीतत्पुरुषः।

(ii) निषण्णः मूर्धा यस्य सः-निषण्णमूर्धा इति- बहुव्रीहिः।

(iii) त्वदुत्सङ्गे निषण्णः मूर्धा यस्य सः त्वदुत्सङ्ग-निषण्णमूर्धा इति बहुव्रीहिः।

वानीर-गृहेषु- वानीर-निर्मितेषु गृहेषु इति मध्यमपदलोपी समासः।

**प्रकृति-प्रत्ययादि-परिचयः-**

निवृत्तः - नि उपसर्ग + वृत् धातुः + क्तप्रत्ययः पुं. प्र. ए. व.।

विनीतः - वि उपसर्गः + नी-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

खेदः- खिद् धातुः + घञ् प्रत्ययः (भावे)- पुं. प्र. ए. व.।

निषण्णः- नि-उपसर्ग + सद् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

सुप्तः - स्वप् धातुः + क्तप्रत्ययः- पुं. प्र. ए. व.।

स्मरामि - स्मृधातुः + लट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- विमानात् सीताम् ऋषेः अगस्त्यस्य आश्रमं दर्शयति यत्-

**भ्रूभङ्ग-मात्रेण पदान्मघोनः,**
**प्रभंशयां यो नहुषं चकार।**
**तस्याविलाम्भःपरिशुद्धिहेतोः,**
**भौमो मुनेः स्थानपरिग्रहोऽयम् ॥ 36 ॥**

**अन्वयः**- यः (ऋषिः अगस्त्यः) भ्रूभङ्गमात्रेण नहुषम् मघोनः पदात् प्रभंशयाञ्चकार, आविल+अम्भः-परिशुद्धि-हेतोः तस्य मुनेः अयम् भौमः स्थान-परिग्रहः (विद्यते)।

**व्याख्या-** यः = महर्षिः अगस्त्यः। भ्रूभङ्गमात्रेण = भ्रुकुटि-सङ्केतमात्रेण, भ्रुकुटि-सञ्चालन-मात्रेण। नहुषम् = एतन्नामकं राजानम्, गर्वोद्धतं नहुषम् इति। (चन्द्रवंशी अयं राजा नहुषः गर्वात् सप्तर्षीणाम् अपमानं कृतवान्, ऋषेः अगस्त्यस्य च शाप-भाजनम् अभवत् इति पौराणिकी कथा।) मघोनः = इन्द्रस्य, देवराजस्य। पदात् = उपाधेः, पदव्याः, पदवीतः। प्रभ्रंशयाञ्चकार = अभ्रंशयत्, प्रभंशितवान्, अपातयत् इति। इन्द्रपदात् विच्युतं कृतवान् इत्यर्थः। शापं दत्तवान् इत्याशयः।

आविलं च तत् अम्भः इति आविलाम्भः, आविलाम्भसां परिशोद्धिः इति आविलाम्भःपरिशुद्धिः , आविलाम्भःपरिशद्धेः हेतोः इति आविलाम्भःपरिशुद्धिहेतोः इति। आविलं नाम मलिनम्, कलुषं, अस्वच्छं वा। अम्भः नाम जलम्, अम्बु, सलिलं वा। परिशुद्धिः नाम परिष्कारः, विशोधनं, निर्मलीकरणं वा। हेतुः नाम प्रयोजनं, निमित्तम् उद्देश्यं वा। कलुषित-जल-विशोधन-प्रयोजनस्य इत्यर्थः। (सप्तर्षि-मण्डलं हि नक्षत्ररूपं गगने विराजते, तत्र अगस्त्य-नक्षत्रस्य उदये सति शरदि सर्वत्र जलं स्वच्छं परिशुद्धं च भवति। अस्मिन् पद्ये इदमेव तथ्यम् उपन्यस्तम्।) मुनेः = ऋषेः, अगस्त्यस्य इति। तस्य = तादृशस्य, तपःशक्तिसम्पन्नस्य इति। अयम् = एषः, पुरतः दृश्यमानः इति। भौमः = भूमिस्थितः, पृथिवीस्थितः, पार्थिवः इति। स्थान-परिग्रहः = स्थानरूपः परिग्रहः, आश्रमः विद्यते।

एषः पुरतः महर्षे अगस्त्यस्य पुण्यः आश्रमः वर्त्तते इति भावः। 'परिशुद्धि-हेतोः' इति कारण-निर्देशात् काव्यालिङ्गम् अलङ्कारः। छन्दः इन्द्रवज्रा।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पदात् + मघोनः = पदान्मघोनः - व्यञ्जनसन्धिः, अनुनासिकपरसवर्णः।

यः + नहुषम् = यो नहुषम् - विसर्गसन्धिः, उत्वम्।

आविल + अम्भः = आविलाम्भः - स्वरसन्धिः, सवर्णदीर्घः।

तस्य + आविलाम्भः = तस्याविलाम्भः - स्वरसन्धिः, सवर्णदीर्घः।

हेतोः + भौमः = हेतोर्भौमः - विसर्गसन्धिः, रुत्वम्।

भौमः + मुनेः = भौमो मुनेः - विसर्गसन्धिः, उत्वम्।

परिग्रहः + अयम् = परिग्रहोऽयम् - विसर्गसन्धिः, उत्वं पूर्वरूपम्।

**समास-परिचयः-**

भ्रूभङ्गमात्रेण- भ्रुवोः भङ्गमात्रेण इति षष्ठीतत्पुरुषः।

आविलाम्भःपरिशुद्धिहेतोः-

(i) आविलं च तत् अम्भः इति आविलाम्भः - कर्मधारयः।

(ii) आविलाम्भसां परिशुद्धिः इति आविलाम्भःपरिशुद्धिः - षष्ठीतत्पुरुषः।

(iii) आविलाम्भःपरिशुद्धेः हेतुः इति आविलाम्भःपरिशुद्धिहेतुः तस्य इति षष्ठीतत्पुरुषः।

स्थान-परिग्रह - स्थानम् एव परिग्रहः इति रूपककर्मधारयः।

**प्रकृति-प्रत्ययादि-परिचयः-**

परिशुद्धिः - परि-उपसर्ग + शुध्-धातुः + क्तिन् प्रत्यये (भावे) - स्त्री. प्र. ए. व.।

भौमः- भूमौ भवः इति भौमः। भूमि + अण् (तद्धितप्रत्ययः)- पुं. प्र. ए. व.।

प्रभ्रंशयाञ्चकार- प्र-उपसर्ग + भ्रंश् धातुः (णिजन्तः)+ लिट् लकारः (कृ धातोः अनुप्रयोगः)- प्र. पुं. ए. व.।

**प्रसङ्गः**- अगस्त्याश्रमात् उत्थितं पवित्रधूमं वर्णयति यत्-

**त्रेताग्नि-धूमाग्रमनिन्द्यकीर्त्तेः,**
**तस्येदमाक्रान्तविमानमार्गम्।**
**घ्रात्वा हविर्गन्धि रजोविमुक्तः,**
**समश्नुते मे लघिमानमात्मा ॥ 37 ॥**

**अन्वयः**- अनिन्द्य-कीर्त्तेः तस्य (मुनेः अगस्त्यस्य) इदम् आक्रान्त-विमान-मार्गम्, हविर्गन्धि, त्रेता + अग्नि - धूम + अग्रम् घ्रात्वा रजः + विमुक्तः मे आत्मा लघिमानम् समश्नुते।

**व्याख्या**- अनिन्द्या कीर्त्तिः यस्य सः अनिन्द्यकीर्त्तिः तस्य इति। अनिन्दनीय-यशसः अनवद्य-प्रतिष्ठस्य इत्यर्थः। तस्य=अगस्त्यस्य। इदम् =एतत्। आक्रान्तः विमानस्य मार्गः येन इति आक्रान्त-विमानमार्गम्। धूमाग्रस्य विशेषणम् इदम्। आवृत-पुष्पक-पथम्, व्याप्त-वायुयान-पथम् इत्यर्थः। हविर्गन्धि= हविषां गन्धः यस्मिन् इति हविर्गन्धि। इदमपि धूमाग्रस्य विशेषणम्। आहुति-सुगन्ध-युक्तम् इत्यर्थः। त्रेताग्निधूमाग्रम् = अग्नित्रय-जन्यः धूमपुञ्जः। (यज्ञ कर्मणि त्रयः अग्नयः प्रसिद्धाः-गार्हपत्यः, दाक्षिणात्यः, आहवनीयः चेति। एषां त्रयाणां समाहार-कारणाद् एव 'त्रेता' इति नामकरणं प्रसिध्यति।)

त्रेताग्निधूमाग्रं नाम यज्ञाग्निधूमरेखाः इति। घ्रात्वा = आघ्राय, तद्घ्राणं कृत्वा, अनुभूय इत्यर्थः। श्वसनेषु सञ्चारितं कृत्वा इत्याशयः। रजो-विमुक्तः = रजोगुण-निष्प्रभावितः, क्षीण-रजोगुणः इति। मे = मम, रामस्य। आत्मा = अन्तःकरणम्, आत्मतत्त्वम् इति। लघिमानम् = लघुत्वगुणम्, विशदभावम्। सत्त्वगुण-प्रकर्षम् इत्यर्थः। सत्त्वगुणजन्यं पुण्यम् आनन्दम् इत्याशयः। समश्नुते = प्राप्नोति, अधिगच्छति। अनुभवति- इत्याशयः।

आश्रम-यज्ञ-धूमम् आघ्राय मम आत्मा पावनम् आनन्दम् अनुभवति इति भावः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

त्रेताग्निः = त्रेता + अग्निः - स्वरसन्धिः, सवर्णदीर्घः।

धूमाग्रम् = धूम + अग्रम् - स्वरसन्धिः, सवर्णदीर्घः।

अनिन्द्यकीर्त्तेस्तस्य = अनिन्द्यकीर्त्तेः + तस्य - विसर्गसन्धिः, सत्वम्।

तस्येदम् = तस्य + इदम् - स्वरसन्धिः, गुणः।

हविर्गन्धि = हविः + गन्धि - विसर्गसन्धिः, रुत्वम्।

रजोविमुक्तः = रजः + विमुक्तः - विसर्गसन्धिः, उत्वम्।

**समास-परिचयः**-

त्रेताग्नि-धूमाग्रम् - त्रेताग्नीनाम् धूमस्य अग्रम् इति षष्ठीतत्पुरुषः।

अनिन्द्यकीर्त्तेः- अनिन्द्या कीर्त्तिः यस्य सः बहुव्रीहिः।

आक्रान्त-विमान-मार्गम् - आक्रान्तः विमानस्य मार्गः येन तद् बहुव्रीहिः।

रजोविमुक्तः = रजसा विमुक्तः इति तृतीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

अनिन्द्या- नञ् (अ) + निन्द् धातुः + ण्यत् प्रत्ययः - स्त्री.प्र. ए. व.।

आक्रान्तः- आङ् उपसर्गः + क्रम् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

घ्रात्वा - घ्रा धातुः + क्त्वाप्रत्ययः - अव्ययप्रत्ययः।

विमुक्तः - वि उपसर्गः + मुच् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.

लघिमानम्- लघु + इमनिच् प्रत्ययः (तद्धितः)- द्वि. ए. व.।

समश्नुते- सम्-उपसर्गः + अश् धातुः (आत्मने पदे) + लट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- अथ मुनेः शातकर्णेः क्रीडा-सरोवरं दर्शयति यत्-

**एतन्मुनेर्मानिनि! शातकर्णेः,**
**पञ्चाप्सरो नाम विहार-वारि।**
**आभाति पर्यन्तवनं विदूरात्,**
**मेघान्तरालक्ष्यमिवेन्दु-बिम्बम् ॥ 38 ॥**

**अन्वयः**- मानिनि! शातकर्णेः (मुनेः) 'पञ्चाप्सरः' नाम पर्यन्तवनम् एतद् विहारवारि विदूरात् मेघ+अन्तर+आलक्ष्यम् इन्दुबिम्बम् इव आभाति।

**व्याख्या**- मानिनि! = हे मान-शीले! हे मानवति! शातकर्णेः = शातकर्णि-नामकस्य मुनेः इति। पञ्चाप्सरः नाम = एतन्नामकम्। पञ्च अप्सरसः यस्मिन् इति 'पञ्चाप्सरः'। विहार-वारिणः नाम-विशिष्टं पदम् इदम्। पर्यन्त-वनम् = पर्यन्तेषु वनानि यस्य तत् पर्यन्तवनम्, अर्थात् परितः वनैः, विपिनैः व्याप्तम् इति। एतद् = इदम्, दृश्यमानम्। विहार-वारि = क्रीडा सरोवरः, केलि-सरः। विदूरात् = सुदूरस्थानात्। आकाशात् इत्याशयः। मेघानाम् अन्तरम् इति मेघान्तरम्, मेघान्तरे आलक्ष्यम् इति मेघान्तरालक्ष्यम्। मेघः नाम जलधरः, घनः वा। अन्तरं नाम मध्यम्, अन्तरालं वा। आलक्ष्यं नाम ईषद् दृश्यम्, अस्पष्ट-दृश्यं वा। इन्दु-बिम्बम् = चन्द्रबिम्बं, चन्द्र-मण्डलम्। इव = उपमार्थकम् इदं पदम्। आभाति = विभाति, शोभते इति। यथा मेघसमूहमध्ये चन्द्रमण्डलं विराजते तथैव वनसमूहमध्ये क्रीडासरोवरः शोभते इत्याशयः। इन्दुबिम्बेन सादृश्य-कल्पनात् उपमा अलङ्कारः। इन्द्रवज्रा छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

एतत् + मुनेः = एतन्मुनेः - व्यञ्जनसन्धिः, अनुनासिकपरसवर्णः।
मुनेः + मानिनि = मुनेर्मानिनि - विसर्गसन्धिः, रुत्वम्।
पञ्च + अप्सरः = पञ्चाप्सरः - स्वरसन्धिः, सवर्णदीर्घः।
पञ्चाप्सरः + नाम = पञ्चाप्सरो नाम - विसर्गसन्धिः, उत्वम्।
विदूरात् + मेघानाम् = विदूरान्मेघानाम् - व्यञ्जनसन्धिः, अनुनासिकपरसवर्णः।
मेघ + अन्तरम् = मेघान्तरम् - स्वरसन्धिः, सवर्णदीर्घः।
मेघान्तर + आलक्ष्यम् = मेघान्तरालक्ष्यम् - स्वरसन्धिः, सवर्णदीर्घः।
इव + इन्दुबिम्बम् = इवेन्दुबिम्बम् - स्वरसन्धिः, गुणः।

**समास-परिचयः**-

पर्यन्तवनम् - पर्यन्तेषु वनानि यस्य तत् - बहुव्रीहिः।
मेघान्तरालक्ष्यम् - मेघानाम् अन्तरम् इति मेघान्तरम् - षष्ठीतत्पुरुषः।
मेघान्तरे आलक्ष्यम् इति मेघान्तरालक्ष्यम् - सप्तमीतत्पुरुषः।
इन्दुबिम्बम् - इन्दोः बिम्बम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

आलक्ष्यम् - आङ् उपसर्गः + लक्ष् धातुः + ण्यत् प्रत्ययः - नपुं. प्र. ए. व.।
आभाति - आङ्-उपसर्गः + भा धातुः + लट् लकारः- प्र. पु. ए. व.।

**प्रसङ्गः**- ऋषेः शातकर्णेः तपस्यावृत्तान्तं श्रावयति यत्-

**पुरा स दर्भाङ्कुरमात्रवृत्तिः,**
**चरन् मृगैः सार्धमृषिर्मघोना।**
**समाधिभीतेन किलोपनीतः,**
**पञ्चाप्सरोयौवनकूटबन्धम् ॥ 39 ॥**

**अन्वयः-** पुरा दर्भ+अङ्कुरमात्रवृत्तिः, मृगैः सार्धं चरन् सः ऋषिः समाधि-भीतेन मघोना किल पञ्च+अप्सरः+यौवन-कूटबन्धम् उपनीतः।

**व्याख्या-** पुरा = पूर्वकाले, पूर्वसमये। दर्भाङ्कुरमात्र-वृत्तिः = कुश-भक्षण-मात्र-निर्वाहः, कुशग्रासमात्र-जीवितः। जीवन-निर्वाहार्थं केवलं दर्भाङ्कुरान् एव भक्षयति स्म तपस्याविशेषनियमात् इत्याशयः। मृगैः = हरिणैः, कुरङ्गैः। सार्धम् = सह, समं, साकम्। चरन् = विचरन्, विहरन्, इति। सः ऋषिः = असौ शातकर्णिः महर्षिः इति। समाधि-भीतेन = तपस्योत्कर्ष-त्रस्तेन, तपः प्रकर्ष-व्याकुलेन इति। (ऋषीणां तपस्या-प्रकर्षं विलोक्य इन्द्रस्य भयाऽनुभूतिः खलु प्रसिद्धा।) मघोना = इन्द्रेण, सुरेन्द्रेण, देवराजेन इति। किल = एवम्। यथायोग्यम् इत्यर्थः। पञ्चाप्सरो-यौवन-कूट-बन्धम् = पञ्चाप्सरःसौन्दर्य-कपट-यन्त्रम्, अप्सरःपञ्चक-सम्मोहन-जालम् इति। उपनीतः = प्रापितः, गमितः। यथा कूटयन्त्रेण मृगाः बाध्यन्ते तथैव पञ्चसुराङ्गनारूप-कूटपाशेन इन्द्रः अमुम् (शातकर्णिम्) अपि बद्धवान् इत्यर्थः। ऋषेः तपोभङ्गं कृतवान् इत्याशयः।

'पञ्चाप्सरो-यौवन-कूटबन्धम्' इत्यत्र रूपकम् अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धिः-परिचयः-**

दर्भ + अङ्कुरः = दर्भाङ्कुरः - स्वरसन्धिः, सवर्णदीर्घः।
सः + दर्भाङ्कुरः = स दर्भाङ्कुरः - विसर्गसन्धिः, विसर्गलोपः।
ऋषिः + मघोना = ऋषिर्मघोना - विसर्गसन्धिः, रुत्वम्।
किल + उपनीतः = किलोपनीतः - स्वरसन्धिः, गुणः।
पञ्च + अप्सरः = पञ्चाप्सरः - स्वरसन्धिः, सवर्णदीर्घः।
पञ्चाप्सरः + यौवनम् = पञ्चाप्सरोयौवनम् - विसर्गसन्धिः, उत्वम्।

**समास-परिचयः-**

दर्भाङ्कुर-मात्रवृत्तिः - दर्भाङ्कुरमात्रेण वृत्तिः यस्य सः- बहुव्रीहिः।
समाधि-भीतेन - समाधेः भीतः इति समाधि-भीतः, तेन इति पञ्चमी-तत्पुरुषः।
पञ्चाप्सरो-यौवन-कूटबन्धम् -
(i) पञ्चानाम् अप्सरसां समाहारः इति पञ्चाप्सरः - द्विगुः।
(ii) पञ्चानाम् अप्सरसां यौवनम् इति पञ्चाप्सरोयौवनम् - षष्ठीतत्पुरुषः।
(iii) पञ्चाप्सरोयौवनम् एव कूटबन्धः इति पञ्चाप्सरो-यौवन-कूटबन्धः, तम् इति-रूपककर्मधारयः।

**प्रकृति-प्रत्ययादि-परिचयः-**

चरन् - चर् धातुः + शतृप्रत्ययः - पुं. प्र. ए. व.।
समाधिः - सम् + आङ् -उपसर्गौ + धा-धातुः + कि-प्रत्ययः पुं. प्र. ए. व.।
भीतेन - भी-धातुः + क्तप्रत्ययः - पुं. तृ. ए. व.।

उपनीतः - उप-उपसर्गः + नी-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
बन्धम् - बन्ध् धातुः + घञ् प्रत्ययः (भावे) - पुं. द्वि. ए. व.।
**प्रसङ्गः** - तत्रैव श्रूयमाणस्य मृदङ्गध्वनेः विषये वर्णनं करोति यत्-

**तस्यायमन्तर्हितसौधभाजः,**
**प्रसक्त सङ्गीत-मृदङ्गघोषः।**
**वियद्गतः पुष्पकचन्द्रशालाः,**
**क्षणं प्रतिश्रुन्मुखराः करोति ॥ 40 ॥**

**अन्वयः**- अन्तर्हित-सौध-भाजः तस्य (शातकर्णेः) अयम् प्रसक्त-सङ्गीत-मृदङ्गघोषः वियद्-गतः पुष्पक-चन्द्रशालाः क्षणम् प्रतिश्रुत् + मुखराः करोति।

**व्याख्या**- अन्तर्हित- सौध-भाजः = जलान्तर्गत-भवन-निवासिनः, सलिलान्तर्गत-प्रासाद-स्थितस्य। शातकर्णेः विशेषणमिदम्। तस्य= ऋषेः शातकर्णेः। अयम् = एषः श्रूयमाणः इति। प्रसक्त-सङ्गीत-मृदङ्गघोष= प्रवर्त्तित-सङ्गीत-मुरज-ध्वनिः, वाद्यमान-सङ्गीत-मृदङ्ग-ध्वनिः इति। वियद्गतः = गगनप्राप्तः, आकाशगतः। प्रसारेण आकाशे व्याप्तः मृदङ्गादिध्वनिः इत्यर्थः। पुष्पक-चन्द्रशालाः = पुष्पक-विमान-शिरोगृहाणि, पुष्पक-वायुयान-शिरःस्थानानि। क्षणम् = क्षणमात्रेण, अनुक्षणम् एव, तत्कालम् इत्यर्थः। प्रतिश्रुन्मुखराः = प्रतिध्वनि-मुखराः, प्रतिध्वनि-गुञ्जिताः, प्रतिगुञ्जिताः वा। करोति = विधत्ते, विदधाति।
शातकर्णेः ऋषेः मृदङ्ग-ध्वनिः एव विमान-चन्द्रशालासु प्रतिगुञ्जति इति तात्पर्यम्। छन्दस्तु उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-
अन्तः + हितम् = अन्तर्हितम् - विसर्गसन्धिः, रुत्वम्।
तस्य + अयम् = तस्यायम् - स्वरसन्धिः, सवर्णदीर्घः।
वियत् + गतः = वियद्गतः - व्यञ्जनसन्धिः, जश्त्वम्।
प्रतिश्रुत् + मुखराः = प्रतिश्रुन्मुखराः - व्यञ्जनसन्धिः, अनुनासिकत्वम्।
**समास-परिचयः**-
अन्तर्हित-सौध-भाजः-
(i) अन्तर्हितं च तत् सौधम् इति अन्तर्हितसौधम् - कर्मधारयः।
(ii) अन्तर्हितं सौधं भजति अन्तर्हित-सौधभाक्, तस्य इति उपपद-तत्पुरुषः।
प्रसक्त-सङ्गीत-मृदङ्ग-घोषः-
(i) सङ्गीते प्रयुक्तः मृदङ्गः इति सङ्गीतमृदङ्गः- मध्यमपदलोपी तत्पुरुषः।
(ii) सङ्गीतमृदङ्गस्य घोषः इति सङ्गीतमृदङ्गघोषः- षष्ठी-तत्पुरुषः।
(iii) प्रसक्तः च असौ सङ्गीतमृदङ्गघोषः- प्रसक्तसङ्गीतमृदङ्गघोषः- कर्मधारयः।
वियद्गतः- वियत् गतः इति द्वितीया-तत्पुरुषः।
पुष्पक-चन्द्रशालाः -पुष्पकस्य चन्द्रशालाः इति- षष्ठीतत्पुरुषः।
प्रतिश्रुन्मुखराः- प्रतिश्रुद्भिः मुखराः इति तृतीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अन्तर्हितम् = अन्तः अव्ययम् + धा-धातु; + क्तप्रत्ययः – नपुं. प्र. ए. व.।

सौधभाजः = सौध-उपपदम् + भज् धातुः + क्तप्रत्ययः – पुं. प्र. ए. व.।

प्रसक्तः = प्र-उपसर्गः + सज् धातुः + क्तप्रत्ययः – पुं. प्र. ए. व.।

सङ्गीतम् = सम् उपसर्गः + गै-धातुः + क्तप्रत्ययः – नपुं. प्र. ए. व.।

घोषः = घुष् धातुः + घञ् प्रत्ययः (भावे)- पुं. प्र. ए. व.।

गतः = गम् धातुः + क्तप्रत्ययः – पुं. प्र. ए. व.।

करोति = कृ-धातुः + लट् लकारः – प्र. पु. ए. व.।

**प्रसङ्गः**- अथ विमानात् सीतां सुतीक्ष्ण-नामकं तपस्विनं दर्शयति यत् –

**हविर्भुजामेधवतां चतुर्ण्णाम्,**
**मध्ये ललाटन्तप-सप्तसप्तिः।**
**असौ तपस्यत्यपरस्तपस्वी,**
**नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ 41 ॥**

**अन्वयः**- एधवताम् चतुर्ण्णाम् हविर्भुजाम् मध्ये, ललाटन्तप-सप्तसप्तिः नाम्ना सुतीक्ष्णः चरितेन (च) दान्तः, असौ अपरः तपस्वी तपस्यति।

**व्याख्या**- एधवताम् = एधयुक्तानाम्, इन्धनयुक्तानाम्। चतुर्ण्णाम् = चतुःसङ्ख्यकानाम्। हविर्भुजाम् = पावकानाम्, अग्नीनाम्। मध्ये = अभ्यन्तरम्, अवकाशे। ललाटन्तपः सप्तसप्तिः यस्य सः ललाटन्तप-सप्तसतिः। ललाटन्तपः नाम सूर्यः, ललाटे ताप-दायकः इत्यर्थः। अत्र च प्रचण्डतापः इत्याशयः। सप्तसप्तिः नाम सूर्यः। ललाटन्तपः इति विशेषणरूपप्रयोगः। सप्तसप्तिः इति च नामनिर्देश-प्रयोगः। अर्थात् यस्य मस्तके (ललाटे) प्रचण्डसूर्यः तापम् आतनोति इति तादृशः (तपस्वी)। असौ = सः, दृश्यमानः। अपरः = अन्यः। तपस्वी = तपश्चारी, तपस्यामग्रः, तपःशीलः। तपस्यति = तपस्यां करोति, तपः आचरति। नाम्ना = नामकरणेन, संज्ञया, नामनिर्देशेन। सुतीक्ष्णः = एतन्नामकः। (किन्तु) चरितेन = आचरणेन, व्यवहारेण, चरित्रेण इति। दान्तः = उदारः, सौम्यस्वभावः इति।

कठिनतपस्या-निरतः सुतीक्ष्ण-नामा असौ अपरः तपस्वी दृष्टिगोचरीभवति इत्यभिप्रायः। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धिः-परिचयः-**

तपस्यति + अपरः = तपस्यत्यपरः = स्वरसन्धिः, यण्।

अपरः + तपस्वी = अपरस्तपस्वी – विसर्गसन्धिः, सत्वम्।

सुतीक्ष्णः + चरितेन = सुतीक्ष्णश्चरितेन – विसर्गसन्धिः, सत्वं, श्चुत्वम्।

**समास-परिचयः-**

हविर्भुजाम् – हविः भुङ्क्ते इति हविर्भुक्, तेषामिति-उपपद-तत्पुरुषः।

ललाटन्तप-सप्तसप्तिः –

(i) ललाटं तपति इति ललाटन्तपः – उपपद-तत्पुरुषः।

(ii) ललाटन्तपः सप्तसप्तिः यस्य सः इति – बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

हविर्भुजाम् - हविः-उपपदम् + भुज् धातुः + क्विप् प्रत्ययः (कर्त्तरि) - पुं. ष. ब. व.।

एधवताम् - एध-शब्दः + मतुप् प्रत्ययः (तद्धितः)- पुं. ष. ब. व.।

ललाटन्तपः - ललाट-उपपदम् + तप् धातु + खश् प्रत्ययः (कत्तरि) - पुं. प्र. ए. व.।

तपस्वी - तपस् शब्दः + विनिप्रत्ययः (तद्धितः) - पुं. प्र. ए. व.।

चरितेन - चर् धातुः + क्तप्रत्ययः (भावे) - पुं. प्र. ए. व.।

दान्तः - दम् धातुः + क्तप्रत्ययः (कर्त्तरि) - पुं. प्र. ए. व.।

तपस्यति - तपस् + क्यङ् प्रत्ययः = नाम धातुः लट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- तपस्विनः सुतीक्ष्णस्य जितेन्द्रियत्व-शक्तिं वर्णयति यत्-

**अमुं सहास-प्रहितेक्षणानि,**
**व्याजार्धसन्दर्शित-मेखलानि।**
**नालं विकर्त्तुं जनितेन्द्रशङ्कम्,**
**सुराङ्गना-विभ्रम-चेष्टितानि ॥ 42 ॥**

**अन्वयः**- जनित + इन्द्र-शङ्कम् अमुम् (सुतीक्ष्णम्) सहास-प्रहित+ईक्षणानि, व्याज+अर्ध-सन्दर्शित-मेखलानि, सुराङ्गना-विभ्रम-चेष्टितानि विकर्त्तुम् अलम् न (अभवन्)।

**व्याख्या**- जनिता इन्द्रस्य शङ्का येन सः-जनितेन्द्रशङ्कः, तमिति। उद्भावित-देवराज-सन्देहम्, उत्पादित-सुरेन्द्र-संशयम् इत्यर्थः। तपसा इति शेषः। अर्थात् इन्द्रः अपि यस्य कठोर-तपस्याम् अवलोक्य स्वपदवी-विषये शङ्काग्रस्तः अभवत् इति। अमुम् = तम् सुतीक्ष्णम् इति। सहासं प्रहितानि ईक्षणानि येषु तानि - सहासप्रहितेक्षणानि इति। 'सुराङ्गना-विभ्रम-चेष्टितानि' इत्यस्य विशेषणमिदं प्रथमान्तम्। सहासं नाम हासपूर्वकं, स्मितपूर्वकं वा। प्रहितं नाम प्रस्तुतम्, उपस्थापितम्, उपन्यस्तम् वा। ईक्षणं नाम दृष्टिः, नयनं वा। हासपूर्वक-प्रस्तुत-दृष्टिपातानि, सस्मित-विन्यस्तनयनानि इत्यर्थः। इन्द्रेण प्रेषिताः देवाङ्गनाः (रम्भाप्रमुखाः) तपस्विनं सुतीक्ष्णम् आकर्ष्टुं सहासं चञ्चल-लोचनैः पश्यन्ति स्म-इत्यभिप्रायः।

व्याजेन अर्धं सन्दर्शिताः मेखलाः येषु तानि-व्याजार्धसन्दर्शितमेखलानि इति। इदमपि चेष्टितानां विशेषणम्। व्याजः नाम व्यपदेशः, मिषः, कृत्रिम-कारणं वा। अर्धं नाम ईषद् अस्पष्टं वा। सन्दर्शितं नाम प्रदर्शितं, प्रकटितं वा। मेखला नाम रशना, कटिसूत्रं वा। व्यपदेशार्ध-प्रकटित-कटिसूत्राणि, मिषेण अर्ध-प्रदर्शित-रशनानि इत्यर्थः। येन केनाऽपि व्यपदेशेन देवाङ्गनाः सुतीक्ष्णस्य समक्षं कटिसूत्रं प्रदर्शयन्ति स्म तं लोभयितुम् इत्यभिप्रायः।

सुराङ्गनानां विभ्रमचेष्टितानि इति सुराङ्गना-विभ्रम-चेष्टितानि। सुराङ्गना नाम देवाङ्गना, स्वर्गाङ्गना, अप्सराः वा। विभ्रमः नाम विलासः, भावप्रदर्शनं वा। देवाङ्गनानां विलास-चेष्टा-कृत्यानि इत्यर्थः। संयम-विखण्डनार्थम् उन्मादक-प्रयासाः इति भावः। विकर्त्तुम् = विचालयितुम्, सम्मोहयितुम्, लोभयितुम् इति। अलम् = समर्थानि, शक्तानि। न = न आसन्, न अभवन्। विविधैः उन्मादक-प्रलोभनैः अपि अप्सरसः सुतीक्ष्णस्य तपोभङ्गं कर्त्तुं समर्थाः न अभवन् इति तात्पर्यम्। छन्दः उपजातिरिति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

प्रहित + + ईक्षणानि = प्रहितेक्षणानि - स्वरसन्धिः, गुणः।

व्याज + अर्धम् - व्याजार्धम् - स्वरसन्धिः, सवर्णदीर्घः।

न + अलम् = नालम् - स्वरसन्धिः, सवर्णदीर्घः।

जनित + इन्द्रशङ्कम् = जनितेन्द्रशङ्कम् - स्वरसन्धिः, गुणः।

**समास-परिचयः-**

जनितेन्द्रशङ्कम् -जनिता इन्द्रस्य शङ्का येन सः, तमिति- बहुव्रीहिः।

सहासप्रहितेक्षणानि - सहासं प्रहितानि ईक्षणानि येषु, तानि इति बहुव्रीहिः।

व्याजार्धसन्दर्शित-मेखलानि-व्याजेन अर्धं सन्दर्शिताः मेखलाः येषु तानि इति-बहुव्रीहिः।

सुराङ्गना-विभ्रमचेष्टितानि - सुराङ्गनानां विभ्रमरूपचेष्टितानि इति षष्ठी-तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रहितानि - प्र-उपसर्ग + धा-धातुः + क्तप्रत्ययः - नपुं. प्र. ब. व.।

ईक्षणानि - ईक्ष्-धातुः + ल्युट् प्रत्ययः - नपुं. प्र. ब. व.।

सन्दर्शिता - सम्-उपसर्गः + दृश् धातुः (णिजन्तः) + क्तप्रत्ययः + टाप् -स्त्री.प्र. ब. व.।

चेष्टितानि- चेष्ट्-धातुः + क्तप्रत्ययः - नपुं. प्र. ब.व.।

जनिता - जन् -धातुः (णिजन्तः)+ क्तप्रत्ययः + टाप् - स्त्री.प्र.ए. व.।

विकर्त्तुम् - वि-उपसर्ग + कृ धातुः + तुमुन् प्रत्ययः - अव्ययप्रत्ययः।

**प्रसङ्गः-** तपस्विना सुतीक्ष्णेन क्रियमाणम् अभिनन्दनं वर्णयति यत्-

**एषोऽक्षमाला-वलयं मृगाणाम्,**
**कण्डूयितारं कुशसूचिलावम्।**
**स भाजने मे भुजमूर्ध्वबाहुः,**
**सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥ 43 ॥**

**अन्वयः-** ऊर्ध्वबाहुः एषः (सुतीक्ष्णः) अक्ष-माला-वलयम्, मृगाणाम् कण्डूयितारम्, कुशसूचिलावम्, सव्य+इतरम् भुजम् मे सभाजने इतः प्राध्वम् प्रयुङ्क्ते।

**व्याख्या-** ऊर्ध्वौ बाहू यस्य सः ऊर्ध्वबाहुः अर्थात् उन्नतभुजः, उत्थापितभुजः, उद्भुजः इति। एषः = अयं दृश्यमानः तपस्वी सुतीक्ष्णः इति। अक्षमालावलयम् = अक्षमाला एव वलयं यस्य इति तम्। भुजस्य विशेषणमिदं द्वितीयान्तम्। रुद्राक्षादि-माल्य-कङ्कणम् इत्यर्थः। मृगाणाम् = हरिणानाम्, कुरङ्गाणाम्। कण्डूयितारम् = कण्डूयन-कर्त्तारम्। कुशसूचिलावम् = यज्ञनिमित्ते कुशग्रास-लावकं, कुशादिच्छेदकं वा। सव्येतरम् = दक्षिणम् इति। भुजम् = बाहुम्। मे = मम रामस्य इति। सभाजने = सम्माने, समादरे, अभिनन्दने वा। इतः = विमानात्, पुष्पकात्। विदूरात्, इत्याशयः। प्राध्वम् = अनुकूलम्, आनुकूल्येन। प्रयुङ्क्ते = प्रवर्त्तयति, नियुङ्क्ते, नियोजयति वा। पृथिव्याः आकाशपर्यन्तम् अतिदूरम् अभिनन्दनार्थं भुजः एव अनुकूलः तत्कारणात् इति।

मां (रामं) विलोक्य अयं सुतीक्ष्णः सानन्दं भुजम् उत्थाप्य अभिनन्दयति इत्यभिप्रायः। परिकरः अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

एषः + अक्षमालाम् = एषोऽक्षमालाम् - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।

सव्य + इतरम् = सव्येतरम् - स्वरसन्धिः, गुणः।

**समास-परिचयः-**

अक्षमाला-वलयम् - अक्षमाला एव वलयं यस्य, तमिति - बहुव्रीहिः।

कुशसूचिलावम् - कुशसूचीः लुनाति इति, तम्- उपपद-तत्पुरुषः।

ऊर्ध्व-बाहुः - ऊर्ध्वौ बाहू यस्य सः - बहुव्रीहिः।

सव्येतरम् - सव्यात् इतरम् इति - पञ्चमीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

कण्डूयितारम् - कण्डू-धातुः + तृच् प्रत्ययः (कर्त्तरि)- पुं. द्वि. ए. व.।

कुशसूचिलावम् - कुशसूचि-उपपदम् + लू-धातुः + अण् प्रत्ययः (कर्त्तरि) पुं. द्वि. ए. व.।

प्रयङ्क्ते- प्र-उपसर्गः + युज् धातुः (आत्मने) + लट् लकारः- प्र. पु. ए. व.।

**प्रसङ्गः**- सुतीक्ष्णं प्रति विहितं नमस्कारं वर्णयति रामः यत्-

**वाचंयमत्वात् प्रणतिं ममैषः,**
**कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः।**
**दृष्टिं विमान-व्यवधान-मुक्ताम्,**
**पुनः सहस्रार्चिषि संनिधत्ते ॥ 44 ॥**

**अन्वयः**- एषः (सुतीक्ष्णः) वाचंयमत्वात् मम (रामस्य) प्रणतिम् किञ्चित् मूर्ध्नः कम्पेन प्रतिगृह्य, विमान-व्यवधान-मुक्ताम् दृष्टिम् पुनः सहस्र + अर्चिषि संनिधत्ते।

**व्याख्या**- एषः = पुरतः दृश्यमानः अयं सुतीक्ष्णः इति। वाचंयमत्वात् = मौनव्रत-कारणात्, मौनव्रताचरणात्। मम = मे, रामस्य। प्रणतिम्, प्रणामं, नमस्कारम्, अभिवादनम् इति। किञ्चित् = स्वल्पमात्रम्, ईषत्। मूर्ध्नः = शिरसः, मस्तकस्य। कम्पेन = कम्पनेन, चालनेन इति। प्रतिगृह्य = स्वीकृत्य, अङ्गीकृत्य। विमानेन व्यवधानम् इति विमान-व्यवधानम्, विमानव्यवधानात् मुक्ताम् इति विमानव्यवधानमुक्ताम्। दृष्टेः विशेषणम् इदं द्वितीयान्तम्। पुष्पक-जन्य-व्यवधान-रहिताम् इत्यर्थः। असौ सुतीक्ष्णः, सूर्यदेवं प्रति दृष्टिं साधयति स्म, परन्तु विमानेन क्षणमात्रं मध्ये व्यवधानम् उत्पादितम्, अग्रे गते हि विमाने तद्व्यवधानमपि गतम् इति-इदम् एव तात्पर्यम् अत्र वर्त्तते- विमान-व्यवधान-मुक्ताम् इति। दृष्टिम् = दृशम्, नेत्रयुगलम् इति। पुनः = मुहुः, व्यवधानाऽनन्तरम् इति। सहस्रार्चिषि = सूर्यदेवे, सहस्रकिरणे इति। संनिधत्ते = सम्यक् नियोजयति, सम्यक् निबध्नाति।

मम (रामस्य) नमस्कारं स्वीकृत्य सुतीक्ष्णः पुनः साधनायां निमग्नः इति भावः। 'वाचंयमत्वात्' इति कारणनिर्देशात् काव्यलिङ्गम् अलङ्कारः। 'सहस्रार्चिषि' इति अभिप्राय-विशेष-प्रकटनात् परिकरः अपि। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

मम + एषः = ममैष - स्वरसन्धिः, वृद्धिः।

एषः + कम्पेन = एष कम्पेन - विसर्गसन्धिः, विसर्गलोपः।

वि + अवधानम् = व्यवधानम् - स्वरसन्धिः, यण्।

सहस्र + अर्चिषि = सहस्रार्चिषि - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

वाचंमयः - वाचं यच्छति इति (खच् प्रत्ययः)- उपपद-तत्पुरुषः।

विमानव्यवधानमुक्ताम् –

(i) विमानेन (कृतं) व्यवधानम् इति विमान-व्यवधानम् – तृतीयातत्पुरुषः।

(ii) विमान-व्यवधानात् मुक्ता इति विमानव्यवधानमुक्ता, तामिति पञ्चमी-तत्पुरुषः।

सहस्रार्चिषि – सहस्रम् अर्चींषि यस्य सः सहस्रार्चिः तस्मिन्निति – बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

वाचंयमत्वात् – वाचंयम + त्वप्रत्ययः (तद्धितः भावार्थे) – नपुं. पञ्चमी ए. व.।

प्रणतिम् – प्र-उपसर्ग + नम्-धातुः + क्तिन् प्रत्ययः (भावे)- स्त्री. द्वि. ए. व.।

कम्पेन – कम्प् धातुः + घञ् प्रत्ययः (भावे) – पुं. तृ. ए. व.।

प्रतिगृह्य – प्रति-उपसर्ग + ग्रह् धातुः + ल्यप् प्रत्ययः – अव्ययप्रत्ययः।

दृष्टिम् – दृश् धातुः + क्तिन् प्रत्ययः (भावे) – स्त्री. द्वि. ए. व.।

व्यवधानम् – वि + अव-उपसर्गौ + धा-धातुः + ल्युट् प्रत्ययः (भावे) – नपुं. प्र. ए. व.।

मुक्ताम् – मुच् धातुः + क्तप्रत्ययः + टाप् (स्त्रियाम्) – द्वि. ए. व.।

संनिधत्ते- सम् + नि-उपसर्गौ + धा-धातुः (आत्मनेपद) + लट् लकारः – प्र. पु. ए. व.।

**प्रसङ्गः**- अथ ऋषेः शरभङ्गस्य तपोवनं दर्शयति यत्-

**अदः शरण्यं शरभङ्ग-नाम्नः,**
**तपोवनं पावनमाहिताग्नेः।**
**चिराय सन्तर्प्य समिद्भिरग्निम्,**
**यो मन्त्रपूतां तनुमप्यहौषीत् ॥ 45 ॥**

**अन्वयः**- अदः शरण्यम् पावनम्, तपोवनम्, आहित + अग्नेः शरभङ्ग-नाम्नः (मुनेः विद्यते इति)। यः चिराय अग्निम् समिद्भिः सन्तर्प्य (अन्ते च) मन्त्रपूताम् तनुम् अपि अहौषीत्।

**व्याख्या**- अदः = तत् पुरतः दृश्यमानम् इति। शरण्यम् = शरणदायकम्, शरणागत-रक्षणं वा। पावनम् = पुण्यं, पवित्रं, विशुद्धम् इति। तपोवनम् = तपोऽरण्यम्, मुनिवनम्। आहिताग्नेः = अग्निहोतुः, यज्ञाग्नि-पूजकस्य इति। शरभङ्ग-नाम्नः = शरभङ्ग-नामकस्य मुनेः इति। विद्यते इति शेषः। यः = यः मुनिः शरभङ्गः। चिराय = चिरम्, दीर्घकाल-पर्यन्तम्। अग्निम् = पावकम्, अनलम्, अग्निदेवम् इति। समिद्भिः = समिधाभिः, समिधा-समर्पणैः। सन्तर्प्य = तर्पयित्वा, तोषयित्वा। (ततश्च अन्ते)। मन्त्रपूताम् = मन्त्रैः पूताम् अर्थात् मन्त्रपवित्राम्। मन्त्रशक्त्या विशुद्धाम् इत्यर्थः। तनुम् अपि = शरीरम् अपि, देहम् अपि। अहौषीत् = आहुतवान् इत्यभिप्रायः। 'आहिताग्नेः' इत्यत्र परिकरः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

नाम्नः + तपोवनम् = नाम्नस्तपोवनम् – विसर्गसन्धिः, सत्वम्।

आहित + अग्निः = आहिताग्निः – स्वरसन्धिः, सवर्णदीर्घः।

अपि + अहौषीत् = अप्यहौषीत् – स्वरसन्धिः, यण्।

**समास-परिचयः-**

शरभङ्ग-नाम्नः – शरभङ्ग इति नाम यस्य सः-शरभङ्गनामा, तस्य इति-बहुव्रीहिः।

आहिताग्नेः - आहितः अग्निः येन सः-आहिताग्निः, तस्य इति-बहुव्रीहिः।
मन्त्रपूताम् - मन्त्रैः पूता इति मन्त्रपूता, तामिति-तृतीया-तत्पुरुषः।
तपोवनम् - तपसे वनम् इति तपोवनम्-चतुर्थीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

आहितः - आङ् -उपसर्गः + धा-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
सन्तर्प्य - सम्-उपसर्गः + तृप् धातुः (णिजन्तः) + ल्यप् प्रत्ययः - अव्ययप्रत्ययः।
पूताम् - पू-धातुः + क्तप्रत्ययः + टाप् प्रत्यययः (स्त्रियाम्) - द्वि. ए. व.।
शरण्यम् - शरण-शब्द यत् प्रत्ययः (तद्धितः) - नपुं. प्र. ए. व.।
अहौषीत् - हु-धातुः लुङ् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- ऋषेः शरभङ्गस्य आश्रम-वृक्षाणां विशेषं वर्णयति यत्-

**छाया-विनीताध्व-परिश्रमेषु,**
**भूयिष्ठ-सम्भाव्य-फलेष्वमीषु।**
**तस्यातिथीनामधुना सपर्या,**
**स्थिता सुपुत्रेष्विव पादपेषु ॥ 46 ॥**

**अन्वयः**- तस्य (शरभङ्गस्य) अतिथीनाम् सपर्या अधुना छाया-विनीत+अध्व-परिश्रमेषु, भूयिष्ठ-सम्भाव्य-फलेषु, अमीषु पादपेषु पुत्रेषु इव स्थिता (वर्त्तते)।

**व्याख्या**- तस्य = मुनेः शरभङ्गस्य इति। अतिथीनाम् = अभ्यागतानाम्, आगन्तुकानां, प्राघुणिकानां वा। सपर्या = पूजा, स्वागतसत्कारः, आतिथ्य-सत्कारः इति। अधुना = इदानीम्, साम्प्रतम्। 'पादपेषु स्थिता' इति वाक्य-परिसमाप्तिः। कीदृशेषु पादपेषु इत्याह-

छाया-विनीताध्व-परिश्रमेषु = छायाभिः विनीतः अध्वपरिश्रमः यैः ते- छायाविनीताध्वपरिश्रमाः, तेषु इति। पादपानां विशेषणम् इदं सप्तम्यन्तम्। छाया नाम अनातपः, आतपाऽभावः वा। विनीतः नाम अपनीतः, निवारितः, दूरीकृतः वा। यद्यपि विनीतशब्दः 'विनयवान्' विनम्रः वा इत्यर्थेऽपि प्रयुज्यते तथापि अत्र प्रसङ्गवशात् निवारणार्थे अपसारणार्थे वा अस्य प्रयोगः। अध्वा नाम मार्गः, पन्थाः वा। परिश्रमः नाम क्लान्तिः, खेदः वा। छाया-निवारित-मार्ग-खेदेषु इत्यर्थः।

भूयिष्ठानि सम्भाव्यानि फलानि येषाम् इति भूयिष्ठ-सम्भाव्यफलाः, तेषु इति। इदम् अपि पादपानां विशेषणम्। भूयिष्ठं नाम अधिकतमं, बहुतमम्, अत्यधिकं वा। सम्भाव्यं नाम श्ल ाघ्यं, प्रशंसनीयं वा। फलानां प्रशंसा च- पौष्टिकता, सरसता, मधुरता चैव इति, अतः फल-सन्दर्भे सम्भाव्यं नाम पौष्टिकं, सरसं, मधुरं वा इति ग्रहणीयम्। अत्यधिक-मधुर-फल-युक्तेषु, बहुतम-सरस-फलमयेषु इत्यर्थः। अमीषु = एतेषु दृश्यमानेषु इव, सत्सुतेषु इव, सुतनयेषु इव। स्थिता = विद्यमाना, वर्त्तमाना।

यथा सुयोग्याः पुत्राः पितुः अतिथीनां यथाशक्यं स्वागत-सत्कारं कुर्वन्ति, तथैव एते तपोवनवृक्षाः अपि अतिथीनाम् आगन्तुकानां वा छायाफलादिप्रदानैः यथोचितं यथाशक्ति च सत्कारं (सपर्याम्) निर्वहन्ति इति भावः।

तेन मुनिना शरभङ्गेण तपोवनवृक्षाः पुत्रवत् परिपालिताः इति निगूढः अभिप्रायः। पादपानां पुत्र-साम्य-वर्णनात् उपमा अलङ्कारः। छन्दः उपजातिः।

# व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

विनीत + अध्वपरिश्रमः = विनीताध्वपरिश्रमः - स्वरसन्धिः, सवर्णदीर्घः।

फलेषु + अमीषु = फलेष्वमीषु - स्वरसन्धिः, यण्।

तस्य + अतिथीनाम् = तस्यातिथीनाम् - स्वरसन्धिः, सवर्णदीर्घः।

सुपुत्रेषु + इव = सुपुत्रेष्विव- स्वरसन्धिः, यण्।

**समास-परिचयः-**

छाया-विनीताध्व-परिश्रमेषु-

(i) अध्वना परिश्रमः इति अध्वपरिश्रमः - तृतीयातत्पुरुषः।

(ii) छायाभिः विनीतः इति छायाविनीतः - तृतीयातत्पुरुषः।

छायाभिः विनीतः अध्वपरिश्रमः यैः ते छाया विनीताध्वपरिश्रमाः, तेषु इति-बहुव्रीहिः।

भूयिष्ठ-सम्भाव्य-फलेषु-

भूयिष्ठानि सम्भाव्यानि फलानि येषां ते भूयिष्ठ-सम्भाव्य-फलाः तेषु इति-बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विनीतः - वि-उपसर्गः + नी-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

परिश्रमः - परि-उपसर्ग + श्रम् धातुः + घञ् प्रत्ययः -पुं. प्र. ए. व.।

भूयिष्ठम् - बहु-शब्दः (भू-आदेशः) + इष्ठन् प्रत्ययः (तद्धितः)- नपुं. प्र. ए. व.।

सम्भाव्यम् - सम्-उपसर्ग + भू-धातुः + ण्यत् प्रत्ययः- नपुं. प्र. ए. व.।

स्थिता - स्था-धातुः + क्तप्रत्ययः + टाप् (स्त्रियाम्)- प्र. ए. व.।

**प्रसङ्गः**- अथ विमानात् दृश्यमानं चित्रकूट-पर्वतं वर्णयति यत्-

> **धारा-स्वनोद्गारि-दरीमुखौऽसौ,**
> **शृङ्गाग्र-लग्नाम्बुद-वप्रपङ्कः।**
> **बध्नाति मे बन्धुरगात्रि! चक्षुः,**
> **दृप्तः ककुद्मानिव चित्रकूटः ॥ 47 ॥**

**अन्वयः**- बन्धुरगात्रि! धारा-स्वन + उद्गारि-दरी-मुखः, शृङ्ग+अग्र-लग्न+अम्बुद-वप्र-पङ्कः, असौ चित्रकूटः (पर्वतः) दृप्तः ककुद्मान् इव मे चक्षुः बध्नाति।

**व्याख्या**- बन्धुर-गात्रि! हे उन्नतानत-गात्रि! हे उन्नतानताङ्गि! हे सुन्दराङ्गि! हे सर्वाङ्गसुन्दरि सम्बोधनमिदम्। 'असौ चित्रकूटः दृप्तः ककुद्मान् इव मे चक्षुः बध्नाति' इति वाक्य-निबन्धनम्। 'कीदृशः खलु चित्रकूटपर्वतः' इत्याह- धारा-स्वनोद्गारि-दरीमुखः इति। धाराणां स्वनः इति धारास्वनः, धारास्वनैः उद्गारिणी दरी इति धारास्वनोद्गारि-दरी, धारास्वनोद्गारि-दरी एव मुखं यस्य सः धारास्वनोद्गारिदरीमुखः इति। धारा नाम जलधारा, निर्झरधारा, निर्झरप्रवाहः वा। स्वनः नाम स्वरः, शब्दः, ध्वनिः वा। कल-कल-नादः इत्यर्थः। उद्गारः नाम कण्ठध्वनिः, गम्भीर-नादः, कण्ठगर्जनं वा। अथवा डक्कार-ध्वनिः (वृषभ-पक्षे)। उद्गारः अस्य अस्ति इति- उद्गारी। स्त्रीलिङ्गे च उद्गारिणी, परन्तु समास-दशायां पुनः पुंवद्भावः (पुँल्लिङ्ग-प्रयोगः इति)। दरी नाम गुहा, कन्दरा वा। मुखं नाम वदनम्, आमुखभागः वा। दरी एव मुखम् इति दरीमुखम्, अत्र रूपककल्पना वर्त्तते। निर्झर-ध्वनि-गर्जन-युक्त-कन्दरा-मुखः, निर्झर-झरझर-ध्वनि-गम्भीर-नाद-पूर्ण-गुहामुखः इत्यर्थः। यथा हि

कश्चिद् वृषभः (ककुद्मान्) गम्भीर-ध्वनिं (रेभणम्) करोति तथैव असौ चित्रकूटः अपि गम्भीर-नादं करोति इति भावः। अन्यद् अपि साम्यं दर्शयति यत्-

शृङ्गाग्र-लग्नाम्बुद-वप्र-पङ्कः इति। शृङ्गस्य अग्रम् इति शृङ्गाग्रलग्नः, शृङ्गाग्रलग्नः च असौ अम्बुदः इति शृङ्गाग्रलग्नाम्बुदः, वप्रस्य पङ्कः इति वप्रपङ्कः इति। इदमपि चित्रकूटस्य विशेषणं प्रथमान्तम्। अम्बुदे वप्रपङ्क-कल्पानायाः निरूपणात् रूपकम्। शृङ्गं नाम शिखरं विषाणं वा। पर्वतपक्षे शिखरं, वृषभपक्षे च विषाणम् इति। लग्नः नाम सक्तः, संश्लि ष्टः वा। अम्बुदः नाम जलदः, जलधरः, मेघः वा। वप्रं नाम मृत्तिकाभित्तिः, मृत्तिकापुञ्जः, वल्मीक-मृत्तिका वा (बांबी की मिट्टी अथवा मिट्टी का ढेर) इति। पङ्कः नाम कर्दमः, आर्द्रमृत्तिकाद्रवं वा। शिखराग्र-संसक्त-मेघरूपि-वप्रकलङ्कः, विषाणाग्र-संश्लि ष्ट-जलधररूपि-वप्रकर्दमः इत्यर्थः।

असौ = सः, पुरतः दृश्यमानः इति। चित्रकूटः = चित्रकूटनामकः पर्वतः। दृप्तः = दर्पयुक्तः, मदोन्मत्तः, मद-गर्वितः इति। ककुद्मान् इव = वृषभः इव, वृषः इव, महोक्षः इव। इव = उपमार्थकं पदम् इदम्। मे = मम, रामस्य। चक्षुः = नयनं, दृष्टिम् इत्यर्थः। बध्नाति = निगृह्णाति अर्थात् आकर्षति।

'दरीमुखः,' 'अम्बद-वप्रपङ्कः' इत्यत्र रूपकम्। ,

वृषभसाम्यवर्णनात् च उपमा। अस्मिन् पद्ये रूपकालङ्कारः उपमायाः अन्तर्गतः वर्त्तते, अतः सम्पूर्णतया अत्र रूपकगर्भिता उपमा विद्यते। बन्धुर-गात्रि! इति सम्बोधनपदे परिकरोऽलङ्कारः। स्वाभाविक-सुन्दर-वर्णनात् च स्वभावोक्तिः अपि विराजते। सुतरां रमणीयम् इदं पद्यं खलु। छन्दः इन्द्रवज्रा।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

स्वन + उद्गारी - स्वनोद्गारी - स्वरसन्धिः, गुणः।

दरीमुखः + असौ = दरीमुखौऽसौ - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।

शृङ्गः + अग्रम् = शृङ्गाग्रम् - स्वरसन्धिः, सवर्णदीर्घः।

लग्न + अम्बुदः = लग्नाम्बुदः - स्वरसन्धिः, सवर्णदीर्घः।

चक्षुः + दृप्तः = चक्षुर्दृप्तः - विसर्गसन्धिः, रुत्वम्।

**समास-परिचयः-**

बन्धुरगात्रि! - बन्धुराणि गात्राणि यस्याः सा बन्धुरगात्री, सम्बोधने-बन्धुरगात्रि! -बहुव्रीहिः।

धारास्वनोद्गारिदरीमुखः- धाराणां स्वनैः उद्गारिणी दरी एव मुखं यस्य सः इति बहुव्रीहिः।

शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः- शृङ्गाग्रे लग्नः अम्बुद एव वप्रपङ्कः यस्य सः इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

उद्गारिणी- उत्-उपसर्गः + गृधातुः + णिनिप्रत्ययः + ङीप् (स्त्रियाम्) - प्र. ए. व.।

अथवा - उद्गार-शब्दः + इनि प्रत्ययः (तद्धितः) + ङीप् (स्त्रियाम्)- प्र. ए. व.।

लग्नः - लग् धातु + क्तप्रत्ययः - पुं. प्र. ए. व.।

अम्बुदः - अम्बु-उपपद + दा-धातुः + कप्रत्ययः -पु. प्र. ए. व.।

दृप्तः - दृप्-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

बध्नाति - बध्-धातुः + लट्लकारः- प्र. पु. ए. व.।

**प्रसङ्गः**- अथ चित्रकूट-निकटे प्रवहन्तीं गङ्गां विलोक्य वर्णयति यत्-

**एषा प्रसन्नस्तिमिति-प्रवाहा,**
**सरिद्विदूरान्तर-भावतन्वी।**
**मन्दाकिनी भाति नगोपकण्ठे,**
**मुक्तावली कण्ठगतेव भूमेः ॥ 48 ॥**

**अन्वयः-** प्रसन्न-स्तिमित-प्रवाहा, विदूर + अन्तर-भाव-तन्वी, एषा मन्दाकिनी सरित् नग + उपकण्ठे, भूमेः कण्ठ-गता मुक्ता+आवली इव भाति।

**व्याख्या-** प्रसन्नः स्तिमितः च प्रवाहः यस्याः सा प्रसन्नस्तिमितप्रवाहा। गङ्गायाः (मन्दाकिन्याः) विशेषणमिदं प्रथमान्तम्। प्रसन्नः नाम निर्मलः, स्वच्छः, विशदः वा। स्तिमितः नाम निष्पन्दः, मन्दः वा। प्रवाहः नाम स्रोतः, ओघः, धारा वा। निर्मल-निष्पन्द-धारा, विशद-मन्द-स्रोताः इत्यर्थः। विदूरस्य अन्तरम् इति विदूरान्तरम्, विदूरान्तरस्य भावः इति विदूरान्तरभावः, विदूरान्तरभावात् तन्वी इति विदूरान्तर-भाव-तन्वी। इदमपि गङ्गायाः विशेषणम्। विदूरं नाम दूरस्थितिः, अनिकटता इति। अन्तरं नाम मध्यस्थितिः, अन्तरालम्, अवकाशः वा। भावः नाम विद्यमानता, स्थितिः वा। तन्वी नाम कृशा, लघ्वी, वा। सुदूराऽन्तराल-कारणात् कृशा इत्यर्थः। विमानात् सुदूरस्थितिवशात् गङ्गा अतीव कृश-प्रवाह-शालिनी दृश्यते इत्याशयः।

एषा = इयम्, पुरतो दृश्यमाना। मन्दाकिनी = गङ्गा, भागीरथी। सरित् = नदी, तरङ्गिणी, स्रोतस्विनी। नगोपकण्ठे = पर्वत-समीपे। चित्रकूट-निकटे प्रवहन्ती इत्यर्थः। भूमेः = पृथिव्याः, वसुधायाः। कण्ठ-गता = कण्ठस्थिता, ग्रीवा-संस्थिता इति। मुक्तावली इव = मुक्तामाला इव, मौक्तिकमाला इव, मौक्तिक-स्रक् इव। इव इति उपमार्थकम्। भाति = प्रतीयते, सुशोभते, विराजते इति।

गङ्गायाः मुक्तावली-साम्य-वर्णनात् उपमा अलङ्कारः। भूमेः नायिकारूपकल्पनायाः स्फुरणात् समासोक्तिः अलङ्कारः अपि। मन्दाकिन्याः सहजसुन्दर-वर्णनात् स्वभावोक्तिः चापि विराजते। उपजातिनाम छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

सरित् + विदूरम् = सरिद्विदूरम् - व्यञ्जनसन्धिः, जश्त्वम्।
विदूर + अन्तरम् = विदूरान्तरम् - स्वरसन्धिः, सवर्णदीर्घः।
नग + उपकण्ठे = नगोपकण्ठे - स्वरसन्धिः, गुणः।
मुक्त + आवली = मुक्तावली - स्वरसन्धिः, सवर्णदीर्घः।
कण्ठगता + इव = कण्ठगतेव - स्वरसन्धिः, गुणः।

**समास-परिचयः-**

नगोपकण्ठे - नगस्य उपकण्ठे इति षष्ठीतत्पुरुषः।
मुक्तावली - मुक्तानाम् आवली इति षष्ठीतत्पुरुषः।
कण्ठगता - कण्ठं गता इति द्वितीया-तत्पुरुषः।
प्रसन्नस्तिमितप्रवाहा - प्रसन्नः स्तिमितः च प्रवाहः यस्याः सा- बहुव्रीहिः।
विदूरान्तरभावतन्वी - विदूरस्य अन्तरभावात् तन्वी इति- पञ्चमीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रसन्नः - प्र-उपसर्गः + सद् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

स्तिमितः - स्तिम् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
प्रवाहः - प्र-उपसर्ग + वह् धातुः + घञ् प्रत्ययः - पुं. प्र. ए. व.।
तन्वी - तनु-शब्दः + ङीष् प्रत्ययः (स्त्रियाम्) - प्र. ए. व.।
भावः- भू-धातुः + घञ् प्रत्ययः - पुं. प्र. ए. व.।
भाति - भा-धातुः + लट्लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- चित्रकूट-निकटे एव तमाल-वृक्षम् अवलोक्य पुनः अतीत-वृत्तान्तं स्मरति स्मारयति च रामः यत्-

**अयं सुजातोऽनुगिरं तमालः,**
**प्रवालमादाय सुगन्धि यस्य।**
**यवाङ्कुरापाण्डु-कपोल-शोभी,**
**मयावतंसः परिकल्पितस्ते ॥ 49 ॥**

**अन्वयः**- अनुगिरम् सुजातः अयम् (सः) तमालः (दृश्यते), यस्य सुगन्धि प्रवालम् आदाय मया ते यव+अङ्कुर+आपाण्डु-कपोल-शोभी अवतंसः परिकल्पितः।

**व्याख्या**- अनुगिरम् = गिरेः समीपम्, चित्रकूट-पर्वत-निकटे इति। सुजातः = उत्पन्नः, उपजातः, प्ररूढः, उद्भूतः इति। अयम् = एषः, पुरतः दृश्यमानः इति। तमालतरुः, तमालवृक्षः। सः विद्यते इति शेषः। यस्य = यस्य तमाल-वृक्षस्य। सुगन्धि = शोभनगन्धयुक्तं सौरभ-पूर्णं, परिमल-परिपूर्णम् इति। प्रवालम् = पल्लवं, किसलयं, पत्रम् इति। आदाय = गृहीत्वा, अवचित्य। मया= मया रामेण। ते = तव, सीतायाः। यवस्य अङ्कुरः इति यवाङ्कुरः, यवाङ्कुर इव आपाण्डुः इति यवाङ्कुरापाण्डुः, यवाङ्कुरापाण्डुः च असौ कपोलः इति यवाङ्कुरापाण्डुकपोलः, तस्मिन् शोभते इति-यवाङ्कुरापाण्डु-कपोल-शोभी इति। अवतंसस्य विशेषणमिदं प्रथमान्तम्। यवः नाम धान्यविशेषः। अङ्कुरः नाम प्ररोहः, केसरः वा। आपाण्डुः नाम ईषत् पाण्डुः, ईषत् पीतवर्णः, किञ्चित् पिङ्गलप्रभः इति। कपोलः नाम गण्डस्थलम्। शोभी नाम विराजमानः शोभमानः वा। यवप्ररोह-तुल्ये किञ्चित्पिङ्गल-प्रभे गण्डस्थले शोभावर्धकः इत्यर्थः। अवतंसः कर्णाभूषणम्, श्रवणाऽलङ्करणम्, श्रवणमण्डनम् इति। परिकल्पितः = विरचितः, विहितः निर्मितः इति।

अयं तमालवृक्षः सः एव वर्त्तते-यस्य पल्लवेन अहं (रामः) तव (सीतायाः) श्रवणावतंसं विरचितवान् इति भावः। 'यवाङ्कुरापाण्डु' इत्यत्र उपमा अलङ्कारः। इन्द्रवज्रा छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

सुजातः + अनुगिरम् = सुजातोऽनुगिरम् - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।
यव + अङ्कुरः = यवाङ्कुरः - स्वरसन्धिः, सवर्णदीर्घः।
यवाङ्कुरः + आपाण्डुः = यवाङ्कुरापाण्डुः - स्वरसन्धिः, सवर्णदीर्घः।
मया + अवतंसः = मयावतंसः - स्वरसन्धिः, सवर्णदीर्घः।
परिकल्पितः + ते = परिकल्पितस्ते - विसर्गसन्धिः, सत्वम्।

**समास-परिचयः-**

अनुगिरम् - गिरेः समीपम् इति अव्ययीभावः।
सुगन्धि - शोभनः (सु) गन्धः यस्य तत् सुगन्धि इति बहुव्रीहिः।

यवाङ्कुरापाण्डुकपोलशोभी -

(i) यवस्य अङ्कुरः इति यवाङ्कुरः - षष्ठीतत्पुरुषः।

(ii) यवाङ्कुरः इव आपाण्डुः इति यवाङ्कुरापाण्डुः इति उपमानपूर्वः कर्मधारयः।

यवाङ्कुरापाण्डुकपोले शोभते यः सः इति यवाङ्कुरापाण्डुकपोलशोभी इति उपपद-तत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

सुजातः - सु-उपसर्गः + जन् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

आदाय - आङ्-उपसर्गः + दा-धातुः + ल्यप् प्रत्ययः - अव्ययप्रत्ययः।

शोभी - शुभ्-धातुः + णिनि प्रत्ययः - पुं. प्र. ए. व.।

परिकल्पितः - परि-उपसर्गः + क्लृप् धातुः (णिजन्तः) + क्तप्रत्ययः - पुं. प्र. ए. व.।

**प्रसङ्गः**- अथ विमानात् महर्षेः अत्रेः तपोवनं दर्शयति यत्-

**अनिग्रह-त्रास-विनीतसत्त्वम्,**
**अपुष्प-लिङ्गात् फलबन्धिवृक्षम्।**
**वनं तपःसाधनमेतदत्रे-**
**राविष्कृतोदग्रतर-प्रभावम् ॥ 50 ॥**

**अन्वयः**- अनिग्रह-त्रास-विनीत-सत्त्वम्, अपुष्प-लिङ्गात् फलबन्धि-वृक्षम्, आविष्कृत+उदग्रतर-प्रभावम् एतत् अत्रेः (ऋषेः) तपःसाधनम् वनम् (विद्यते)।

**व्याख्या**- निग्रहात् त्रासः इति निग्रह-त्रासः, नास्ति निग्रहत्रासः येषां ते अनिग्रह-त्रासाः, अनिग्रह-त्रासाः अपि विनीताः सत्त्वाः यस्मिन् तत् अनिग्रह-त्रास-विनीत-सत्त्वम्। वनस्य विशेषणमिदं प्रथमान्तम्। निग्रहः नाम दण्डः, नियन्त्रणं वा। त्रासः नाम भयम् आतङ्कः वा। विनीतः नाम विनम्रः, अनुशिष्टः वा। सत्त्वः नाम जन्तुः, वन्य-प्राणी वा। अदण्डभयाऽनुशिष्ट-जन्तुकम्, अनियन्त्रणाऽतङ्कविनम्र-जीवम् इत्यर्थः। अर्थात् तस्मिन् तपोवने दण्डभयं विना अपि वन्य जीवाः स्वयम् अनुशासिताः तिष्ठन्ति स्म। उपद्रवं न कुर्वन्ति स्म इत्याशयः।

अपुष्प-लिङ्गात् = पुष्प-निमित्तं विना एव, कुसुम-प्रतीकं विना एव। फलबन्धिनः वृक्षाः यस्मिन् तत् फलबन्धिवृक्षम् इति। इदमपि वनस्य विशेषणम्। फलदायक-द्रुमम्, फलोत्पादक-पादपम् इत्यर्थः। अर्थात् कुसुमानि विना अपि तस्मिन् तपोवने वृक्षाः फलानि प्रकटयन्ति स्म इति (अत एव-)

आविष्कृतः उदग्रतरः प्रभावः यस्मिन् इति तत् आविष्कृतोदग्रतरप्रभावम् इति। इदम् अपि वनस्य विशेषणम्। आविष्कृतः नाम प्रकटितः, उद्भावितः प्रदर्शितः वा। उदग्रतरः नाम प्रखरतरः, प्रगुणतरः, प्रचण्डतरः वा। उत्तरोत्तरम् अधिकः इत्याशयः। प्रभावः = प्रतापः, अनुभावः, वर्चस्वं वा। प्रकटित-प्रगुणतर-प्रतापम्, अभिव्यक्त-प्रखररतर-वर्चस्वम् इत्यर्थः। उत्तरोत्तरं वर्धमानः तस्य तपोवनस्य पुण्यप्रभावः ज्ञायते इत्याशयः।

एतत् = इदम्, पुरतः दृश्यमानम् इति। अत्रेः= अत्रि-नामकस्य महर्षेः इति। तपः साधनम् = तपस्यासाधनभूतम्, तपःसाधनास्थलम्। वनम् = तपोवनम्, तपोऽरण्यम्। विद्यते इति शेषः। अस्मिन् तपोवने महर्षेः अत्रेः महान् तपःप्रभावः लक्ष्यते इति भावः।

अत्र कारणं विनाऽपि कार्यदर्शन-वर्णनात् विभावना-अलङ्कारः वर्त्तते। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

एतत् + अत्रेः = एतदत्रेः - व्यञ्जनसन्धिः, जश्त्वम्।

अत्रेः + आविष्कृतः = अत्रेराविष्कृतः - विसर्गसन्धिः, रुत्वम्।

उत् + अग्रतर: = उदग्रतर: - व्यञ्जनसन्धि:, जश्त्वम्।

आविष्कृत + उदग्रतर: = आविष्कृतोदग्रतर: - स्वरसन्धि:, गुण:।

**समास-परिचय:-**

अनिग्रह-त्रास-विनीत-सत्त्वम्

निग्रहात् त्रास: इति निग्रहत्रास: - पञ्चमीतत्पुरुष:।

नास्ति निग्रह-त्रास: येषां ते अनिग्रह-त्रासा:, बहुव्रीहि:।

अनिग्रहत्रासा अपि विनीता: सत्त्वा: यस्मिन् इति तत् - अनिग्रह-त्रास-विनीतसत्त्वम् इति बहुव्रीहि:।

अपुष्पलिङ्गात्-

(i) पुष्पस्य लिङ्गम् इति पुष्प-लिङ्गम् - षष्ठीतत्पुरुष:।

(ii) न पुष्पलिङ्गम् इति अपुष्पलिङ्गम्, तस्मात् इति नञ् तत्पुरुष:।

फलबन्धिवृक्षम् - फलबन्धिन: वृक्षा: यस्मिन् तत् - बहुव्रीहि:।

तप:साधनम् = तपसां साधनम् इति षष्ठीतत्पुरुष:।

अथवा तपसां साधना यस्मिन् इति तत् तप:साधनम् - बहुव्रीहि:।

आविष्कृतोदग्रतर-प्रभावम् -

(i) उदग्रतर: च असौ प्रभाव: इति उदग्रतर-प्रभाव:, कर्मधारय:।

(ii) आविष्कृत: उदग्रतरप्रभाव: यस्य यस्मिन् वा इति-आविष्कृतोदग्रतरप्रभावम् - बहुव्रीहि:।

**प्रकृति-प्रत्ययादि-परिचय:-**

अनिग्रह: नञ् (अ) + नि-उपसर्ग: + ग्रह्धातु: + अप् प्रत्यय: - पुं. प्र. ए. व.।

त्रास: - त्रस् धातु: + घञ् प्रत्यय: - पुं. प्र. ए. व.।

विनीत: - वि-उपसर्ग + नी-धातु: + क्तप्रत्यय: - पुं. प्र. ए. व.।

साधनम् - साध्-धातु: + ल्युट् प्रत्यय: - नपुं. प्र. ए. व.।

आविष्कृत: - आवि: (अव्ययपदम्) + कृ धातु: + क्तप्रत्यय: - पुं. प्र. ए. व.।

प्रभाव: - प्र-उपसर्ग: + भू-धातु: + घञ् प्रत्यय: - पुं. प्र. ए. व.।

उदग्रतर: - उदग्र-शब्द: + तरप् प्रत्यय: (तद्धित:) - पुं. प्र. ए. व.।

**प्रसङ्ग:**- तपोवन-प्रसङ्गवशात् मुने: अत्रे: पत्न्या: अनसूयाया: महिमानं वर्णयति यत्-

> **अत्राभिषेकाय तपोधनानाम्,**
> **सप्तर्षि-हस्तोद्धृत-हेमपद्माम्।**
> **प्रवर्त्तयामास किलानसूया**
> **त्रिस्रोतसं त्र्यम्बकमौलिमालम् ॥ 51 ॥**

**अन्वय:**- अत्र (तपोवने) किल तपोधनानाम् अभिषेकाय अनसूया सप्तर्षि-हस्त+उद्धृत-हेमपद्माम्, त्र्यम्बक-मौलि-मालाम् त्रिस्रोतसम् प्रवर्त्तयामास।

**व्याख्या-** अत्र = अस्मिन् दृश्यमाने तपोवने इति। किल = एवं श्रूयते यत्। तपोधनानाम् = ऋषीणां, तपस्विनां वा। अभिषेकाय = स्नानाय, स्नानकृत्याय। अनसूया = अत्रि-पत्नी, सती अनसूया देवी इति। त्रिस्रोतसं (गङ्गाम्) प्रवर्त्तयामास इति वाक्य-निबन्धनम्। कीदृशीं गङ्गाम्? इत्याह-सप्तर्षि-हस्तोद्धृत-हेमपद्माम् इति। सप्तर्षीणां हस्तै: उद्धृतानि हेम-पद्मानि यस्या: इति सप्तर्षिहस्तोद्धृतहेमपद्मा तामिति। गङ्गाया: विशेषणमिदं द्वितीयान्तम्।

सप्त च ते ऋषयः इति सप्तर्षयः। मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः चेति प्रसिद्धाः। हस्तः नाम पाणिः, करः, शयः वा। उद्धृतं नाम अवचितम्, आहृतम्, उद्गृहीतं वा। हेमपद्मं नाम स्वर्णकमलं, स्वर्णपङ्कजं वा। सप्तर्षि-पाणि-सञ्चित-स्वर्णकमलाम् इत्यर्थः। सप्तर्षयः हि गङ्गायाः स्वर्णकमलानि चिन्वन्ति स्म इत्याशयः।

त्र्यम्बकस्य मौलेः मालाम् इति त्र्यम्बकमौलिमालाम् इति। त्र्यम्बकः नाम भगवान् शिवः, शङ्करः, शम्भुः हरः वा। मौलिः नाम शिरः, मस्तकम्, उत्तमाङ्गं वा। माला नाम स्रक्, माल्यं, मालिका वा। शङ्कर-शिरः-माल्यरूपाम्, शिव-मस्तक-स्रजम् इत्यर्थः।

गङ्गा हि भगवतः शङ्करस्य शिरसि मालावत् विराजते इति प्रसिद्धम्। त्रिस्रोतसम् = त्रिपथगाम्, गङ्गां, मन्दाकिनीम् इति। प्रवर्त्तयामास = प्रवाहयामास, प्रवाहितवती इति।

देवी अनसूया स्वतपःप्रभावात् गङ्गाम् अपि तपोवन-भूमौ प्रावाहयत् इति भावः। 'त्रिस्रोतसं त्र्यम्बक-मौलिमालाम्' इत्यत्र परिकरः अलङ्कारः। छन्दस्तु उपजातिरेव।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

अत्र + अभिषेकाय = अत्राभिषेकाय - स्वरसन्धिः, सवर्णदीर्घः।

तपः + धनानाम् = तपोधनानाम् - विसर्गसन्धिः, उत्वं पूर्वरूपम्।

सप्त + ऋषयः = सप्तर्षयः - स्वरसन्धिः, गुणः।

हस्त + उद्धृतानि = हस्तोद्धृतानि - स्वरसन्धिः, गुणः।

किल + अनसूया = किलानसूया - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

तपोधनानम् - तपः एव धनं यस्य इति तपोधनः, तेषामिति- बहुव्रीहिः।

सप्तर्षि-हस्तोद्धृत-हेमपद्माम् - सप्तर्षिहस्तैः उद्धृतानि पद्मानि यस्याः सा सप्तर्षि- हस्तोद्धृतहेमपद्मा, तामिति- बहुव्रीहिः।

त्रिस्रोतसम् -त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः, ताम् इति बहुव्रीहिः।

त्र्यम्बक-मौलि-मालाम्

(i) मौलेः माला इति मौलिमाला -षष्ठीतत्पुरुषः।

(ii) त्र्यम्बकस्य मौलिमाला इति त्र्यम्बकमौलिमाला-तामिति- षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अभिषेकः - अभि-उपसर्गः + सिच् धातुः + घञ् प्रत्ययः - पुं. प्र. ए. व.।

उद्धृतानि - उत्-उपसर्गः + धृ-धातुः + क्तप्रत्ययः - नपुं. प्र. ब. व.।

प्रवर्त्तयामास - प्र-उपसर्ग + वृत् धातुः (णिजन्तः) + लिट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- तपोवन-वृक्षाणां विशेषं वर्णयति यत्-

**वीरासनैर्ध्यानजुषामृषीणाम्,**<br>
**अमी समध्यासित-वेदि-मध्याः।**<br>
**निवात-निष्कम्पतया विभान्ति,**<br>
**योगाधिरूढा इव शाखिनोऽपि ॥ 52 ॥**

**अन्वयः**- ध्यानजुषाम् ऋषीणाम् वीरासनैः समध्यासित- वेदि-मध्याः अमी शाखिनः अपि निवात- निष्कम्पतया योग+अधिरूढाः इव विभान्ति।

**व्याख्याः**- ध्यानजुषाम् = ध्यानं कुर्वताम्, अन्तर्ध्यानानाम्, ध्यानमग्नानाम्। ऋषीणाम् = तपस्विनाम्, मुनीनाम्,। वीरासनैः = योगासनविशेषैः, संयमसाधनैः इति। समध्यासित-वेदि-मध्याः= सम्यक् अध्यासितानि वेदि-मध्यानि (मध्य भागाः इति) येषां ते इति। इदं वृक्षाणां (शाखिनां) विशेषणम्। (सम्+अध्यासितम् = ) समध्यासितं नाम सम्यक् उपविष्टम्, आस्थितं वा। वेदिः नाम उपवेशन-भूमिः, उपवेश-पीठं वा। मध्यं नाम अन्तर्भागः, अभ्यन्तर-भागः वा। सम्यगुपविष्ट-पीठमध्याः इत्यर्थः। वृक्षाणाम् अधः ध्यानमग्नाः मुनयः योगासनविशेषैः वेदिमध्ये उपविशन्ति स्म इत्याशयः। अपि च, वृक्षाः स्वयमपि वेदिमध्ये-स्वस्थानमध्ये अर्थात् आलवालरूप वेदिमध्ये वीरासनैः स्थिताः इव प्रतीयन्ते। उत्थाय (न तु उपविश्य) ऋजुस्थितौ एकं चरणं जङ्घायां विन्यस्य संस्थितिः खलु वीरासनम् उच्यते योगविधौ। अत्र वृक्षाणां स्थितौ महाकविः वीरासन-कल्पनाम् उत्पश्यति।

अमी = ते, तादृशाः वीरासनस्थिताः इव इति। शाखिनः अपि = तरवः अपि, द्रुमाः अपि, वृक्षाः अपि। अत्र अपि-पदं विशेष-निदर्शनार्थं प्रयुक्तम्- ऋषयः तु योगसाधनं कुर्वन्ति एव सामान्यतः, परम् अत्र तावत् वृक्षाः अपि तथा प्रतीयन्ते इति। निवात-निष्कम्पतया= समीर-स्थैर्य-निश्चलतया, पवनस्थिरतावशात् कम्परहिताः इत्यर्थः। योगाधिरूढाः = योगसाधना-तत्पराः, योगमार्गप्रवृत्ताः, योगविधान-निमग्नाः इति। इव = उत्प्रेक्षार्थकं पदमिदम्। विभान्ति = प्रतीयन्ते, शोभन्ते, विराजन्ते।

वृक्षाणां योगमार्ग-प्रवृत्ति-सम्भावनात् उत्प्रेक्षा अलङ्कारः विद्यते। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

वीर + आसनैः = वीरासनैः - स्वरसन्धिः, सवर्णदीर्घः।

वीरासनैः + ध्यानजुषाम् = वीरासनैर्ध्यानजुषाम् - विसर्गसन्धिः, रुत्वम्।

अधि + आसितम् = अध्यासितम् - स्वरसन्धिः, यण्।

निः + कम्पतया = निष्कम्पतया - विसर्गसन्धिः, सत्वं, षत्वम्।

योग + अधिरूढाः = योगाधिरूढाः - स्वरसन्धिः, सवर्णदीर्घः ।

योगाधिरूढाः + इव = योगाधिरूढाः - विसर्गसन्धिः, विसर्गलोपः।

शाखिनः + अपि = शाखिनोऽपि - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।

**समास-परिचयः-**

ध्यानजुषाम् - ध्यानं जुषन्ते इति ध्यानजुषः, तेषामिति - उपपदतत्पुरुषः।

योगाधिरूढाः - योगम् अधिरूढाः इति द्वितीयातत्पुरुषः।

समध्यासितवेदिमध्याः - सम्यक् (सम्) अध्यासितं वेदिमध्यं यैः अथवा येषाम् ते इति- बहुव्रीहिः।

निवातनिष्कम्पतया - निवातेन निष्कम्पता, तया इति - तृतीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

समध्यासितम् - सम् + अधि-उपसर्गः + आस् धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

निष्कम्पतया - निः -उपसर्गः + कम्प्धातुः + घञ् प्रत्ययः + तल् प्रत्ययः - स्त्री. तृ. ए. व.।

अधिरूढाः - अधि-उपसर्गः + रुह् धातुः + क्तप्रत्ययः- पुं. प्र. ब. व.।

विभान्ति- वि-उपसर्गः + भा-धातुः + लट् लकारः - प्र. पु. ब. व.।

**प्रसङ्गः**- अथ विशिष्टं वटवृक्षं दर्शयति यत्-

**त्वया पुरस्तादुपयाचितो यः,**
**सोऽयं वटः श्याम इति प्रतीतः।**
**राशिर्मणीनामिव गारुडानाम्,**
**सपद्मरागः फलितो विभाति ॥ 53 ॥**

**अन्वयः**- (हे सीते!) त्वया पुरस्तात् यः उपयाचितः, 'श्यामः' इति प्रतीतः सः अयम् वटः (वृक्षविशेषः) फलितः (सन्) सपद्मरागः, गारुडानाम् मणीनाम् राशिः इव विभाति।

**व्याख्याः**- (हे सीते!) त्वया = सीतया। पुरस्तात् = पूर्वम्, पुरा। सम्मुखे वा। उपयाचितः = अभ्यर्थितः, सम्प्रार्थितः यस्य पुरस्तात् त्वम् उपयाचनां कृतवती इत्यर्थः। (पुरा हि सीता वटवृक्षं प्रार्थयामास यत् मे पतिः निर्बाधं स्वप्रतिज्ञाव्रतं निर्वहतु इति-रामायणे कथा।) कीदृशः सः वृक्षः? इत्याह- श्यामः इति = कृष्णवर्णः इति, असित-वर्णः इति। प्रतीतः = प्रतीयमानः, दृश्यमानः। सः अयम् = सः एव विशेषः, अनन्यः। अन्यवृक्षेभ्यः भिन्नः, अनन्यतमः इति। वटः = वटवृक्षः प्लक्षवृक्षः, न्यग्रोधवृक्षः इति। फलितः = फलपूर्णः, फलवान्, फलभरितः इति। (सन्)।

सपद्मरागः = पद्मरागसहितः, पद्मरागमणिमिश्रितः इति। गारुडानां मणीनाम् = मरकतमणीनां, गारुड-मणीनाम्। राशिः इव = समुच्चयः इव, पुञ्जः इव। विभाति = विराजते, प्रतीयते इति।

वटवृक्षस्य मरकत-मणि-राशि-सम्भावनाद् उत्प्रेक्षा अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

पुरस्तात् + उपयाचितः = पुरस्तादुपयाचितः - व्यञ्जनसन्धिः, जश्त्वम्।
उपयाचितः + यः = उपयाचितो यः - विसर्गसन्धिः, उत्वम्।
सः + अयम् = सोऽयम् - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।
श्यामः + इति = श्याम इति - विसर्गसन्धिः, विसर्गलोपः।
राशिः + मणीनाम् = राशिर्मणीनाम् - विसर्गसन्धिः, रुत्वम्।
फलितः + विभाति = फलितो विभाति - विसर्गसन्धिः, उत्वम्।

**समास-परिचयः**-

सपद्मरागः = पद्मरागैः सह इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः**-

उपयाचितः - उप-उपसर्गः + याच्-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
प्रतीतः - प्रति-उपसर्गः + इण् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।
गारुडानाम् - गरुडस्य अयम्, इति गरुडशब्दः + अण् प्रत्ययः (तद्धितः) - पुं. ष. ब. व.।
फलितः - फल् धातुः + क्तप्रत्यः - पुं. प्र. ए. व.।
विभाति - वि-उपसर्गः + भा-धातुः + लट्लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- अथ प्रयागे गङ्गा-यमुना-सङ्गमं वर्णयति पद्यचतुष्टयेन यत्-

**क्वचित्प्रभालेपिभिरिन्द्रनीलैः,**
**मुक्तामयी यष्टिरिवानुविद्धा।**
**अन्यत्र माला सितपङ्कजानाम्,**
**इन्दीवरैरुत्खचितान्तरेव ॥ 54 ॥**

**क्वचित्खगानां प्रियमानसानाम्,**
**कादम्बसंसर्गवतीव पङ्क्तिः।**
**अन्यत्र कालागुरुदत्तपत्रा,**
**भक्तिर्भुवश्चन्दनकल्पितेव ॥ 55 ॥**

**क्वचित् प्रभा चान्द्रमसी तमोभिः,**
**छायाविलीनैः शबलीकृतेव।**
**अन्यत्र शुभ्रा शरदभ्रलेखा,**
**रन्ध्रेष्विवालक्ष्य-नभःप्रदेशा ॥ 56 ॥**

**क्वचिच्च कृष्णोरग-भूषणेव,**
**भस्माङ्गरागा तनुरीश्वरस्य।**
**पश्यानवद्याङ्गि! विभाति गङ्गा,**
**भिन्नप्रवाहा यमुना-तरङ्गैः ॥ 57 ॥**

**विशेष-निर्देशः-** चतुर्ण्णां श्लोकानाम् एकत्र अन्वयः 'कलापकम्' इति उच्यते। यद्यपि एकैकम् अपि श्लोकम् आदाय विभागशः अन्वयः कर्त्तुं शक्यते, परन्तु एवंकरणे मुख्यवाक्यस्य पुनः पुनः आवृत्तिः अपेक्षिता भवति, सम्पूर्णभावबोधनं चापि खण्डितं भवति। अतः कलापक-प्रसङ्गे चतुर्ण्णाम् अपि श्लोकानाम् एकश्लोकवत् अन्वयनम् एव उचितः मार्गः इति।

**अन्वयः-** (हे) अनवद्याङ्गि ! पश्य, यमुना-तरङ्गैः भिन्न प्रवाहा (इयम्)
गङ्गा क्वचित् प्रभालेपिभिः इन्द्रनीलैः अनुविद्ध-मुक्तामयी यष्टिः इव (विभाति)। अन्यत्र इन्दीवरैः उत्खचित+अन्तरा सित-पङ्कजानाम् माला इव (विभाति।)
क्वचित् कादम्बसंसर्गवती प्रियमानसानाम् खगानाम् पङ्क्तिः इव (विभाति)। अन्यत्र काल+अगुरु-दत्त-पत्रा भुवः चन्दनकल्पिता भक्तिः इव (विभाति)।
क्वचित् छाया-विलीनैः तमोभिः शबलीकृता चान्द्रमसी प्रभा इव (विभाति)। अन्यत्र रन्ध्रेषु आलक्ष्य-नभःप्रदेशा शुभ्रा शरद्+अभ्रलेखा इव (विभाति)।
क्वचित् च कृष्ण + उरग-भूषणा, भस्म+अङ्गरागा, ईश्वरस्य तनुः इव विभाति।

**व्याख्या-** अनवद्याङ्गि ! = हे सुन्दरगात्रि !, हे सर्वाङ्गसुन्दरि ! (सीते !)। पश्य = विलोकय, वीक्षस्व, प्रेक्षस्व। लोचनयोः आनन्दो लभ्यताम्-इत्याशयः। यमुना-तरङ्गैः = कालिन्दी-लहरिभिः, कलिन्दकन्या-वीचिभिः। भिन्नप्रवाहा = मिश्रितधारा, व्यामिश्र-स्रोताः, मिलित-जलधारा इति। गङ्गायाः विशेषणम् इदं प्रथमान्तम्। गङ्गा = सुरनदी, मन्दाकिनी, जाह्नवी। विभाति = सुशोभते, विलसति, विराजते, रमते इति। कथमिव विभाति? इत्याह क्रमशः-

1. क्वचित् = कस्मिंश्चित् स्थाने, कुत्रचित्। प्रभालेपिभिः = कान्तिलेपिभिः, कान्तिप्रसारकैः। इन्द्रनीलैः = इन्द्रनील-मणिभिः। अनुविद्धा= गुम्फिता, ग्रथिता। मुक्तामयी यष्टिः इव = मुक्ता-निर्मित-माला इव, मौक्तिक-

हारावली इव। इव इत्युपमार्थकं पदमत्र। विभाति इत्यन्वयः। शोभते इत्यर्थः। यमुनाजलं कृष्णं, गङ्गाजलं च शुभ्रम् इति, अत एव उपमाकौतुकं प्रस्तौति साम्यात्। अन्यत्र = अन्यप्रदेशे, अन्यस्थाने च। क्वचित् इत्याशयः। इन्दीवरैः = नीलकमलैः, नीलोत्पलैः। उत्खचितान्तरा = ग्रथितमध्या, गुम्फित-मध्यभागा, भरितान्तराला इति। सित-पङ्कजानाम् = श्वेत-कमलानाम्, शुभ्रकमलानाम्, पुण्डरीकाणाम् इति। माला इव = मालिका इव, स्रक् इव, माल्यम् इव। विभाति इति।

**2.** क्वचित् = कस्मिंश्चित् स्थाने, कुत्रचित् इति। कादम्ब-संसर्ग-वती = नीलहंस-सङ्गता, नील हंस-सम्मिलिता इति। प्रियमानसानाम् = मानसरोवर-प्रियाणाम्। खगानाम् = विहङ्गानां, पक्षिणाम् इति। अर्थात् राजहंसानाम्। राजहंसाः हि शुभ्रवर्णाः भवन्ति। (तेषां) पङ्क्तिः इव = श्रेणिः इव, शृङ्खला इव। विभाति इति।

अन्यत्र = क्वचित् च। कालागुरुदत्तपत्रा = मकरिका-कृत-पत्ररचना, रचित-मकरिका-पत्रा। अगरु- इति प्रसिद्धो द्रव्यविशेषः, चन्दनस्य एव कश्चित् कृष्णवर्णः प्रकारः। अगरुवर्त्तिका-धूपादिषु प्रयुज्यमानं द्रव्यम् इति, तदेव कालागुरु अथवा मकरिका इति कथ्यते। अगरुः, अगरु ःवा इति उभयथाऽपि लिख्यते। यमुनातरङ्गमिश्रणात् शुभ्रसलिला गङ्गा एवं प्रतीयते यथा श्वेतचन्दनमध्ये कालागुरुद्रव्येण पत्राकार-रचना स्यात् इत्याशयः। तदेव आह- भुवः = धरायाःपृथिव्याः, वसुधायाः। चन्दन-कल्पिता = चन्दन-विरचिता, मलयज-चित्रिता, चन्दनचित्रिता इति। भक्तिः इव = विभाजनरेखा इव, विभागरेखा इव। अत्र भक्तिपदं विभक्त्यर्थकं वर्त्तते, विभागः इति। विभाति इति।

**3.** क्वचित् = कुत्रचित्। छायाविलीनैः = छायास्थितैः, गहनस्थितैः इति। तमोभिः = अन्धकारैः, ध्वान्तैः। शबलीकृता = कर्बुरीकृता, मिश्रितवर्णीकृता। चान्द्रमसी प्रभा इव = चन्द्रस्य कान्तिः इव, चन्द्रिका इव, ज्योत्स्ना इव, कौमुदी इव। विभाति इति।

अन्यत्र = कुत्रचित् च। रन्ध्रेषु = विवरेषु, छिद्रेषु, रिक्तभागेषु इति। आलक्ष्य-नभःप्रदेशा = ईषद्दृश्यगगनस्थाना, ईषद्दृश्यमान-गगन-देशा इति। शरदभ्रलेखा इव = शारदघनरेखा इव, शरन्मेघमाला इव, शुभ्रमेघसमूहमध्ये क्वचित् क्वचित् नीलवर्णं नभः दृश्यते, तथैव गङ्गायाः शुभ्रजलमध्ये यमुनायाः नीलवर्णं जलं विराजते इति आशयः।

**4.** क्वचित् = कुत्रचित्। कृष्णोरगभूषणा = कृष्णसर्पविभूषिता, कृष्णभुजङ्ग-मण्डिता। भस्माङ्गरागा = भस्मलेपना, विभूति-लेपयुक्ता। ईश्वरस्य = शिवस्य, शङ्करस्य शरीरं हि भस्मच्छुरितं (भस्मलिप्तं) वर्त्तते, तत्र च कृष्णसर्पाः शोभन्ते। तादृशी एव शोभा गङ्गायमुनासङ्गमस्य अपि विद्यते इत्याशयः।

गङ्गायमुनासङ्गमस्य सप्त उपमाः उत्प्रेक्षा-मिश्रिताः अत्र महाकविना रमणीयतया निबद्धाः। उपमा अत्र मालारूपेण विराजते अतः मालोपमा अलङ्कारः। उपमोत्प्रेक्षयोः सङ्करः विलसति। उपजातिच्छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

प्रभालेपिभिः + इन्द्रनीलैः = प्रभालेपिभिरिन्द्रनीलैः - विसर्गसन्धिः, रुत्वम्।

इन्द्रनीलैः + मुक्तामयी = इन्द्रनीलैर्मुक्तामयी - विसर्गसन्धिः, रुत्वम्।

यष्टिः + इव = यष्टिरिव - विसर्गसन्धिः, रुत्वम्।

इव + अनुविद्धाः = इवानुविद्धा - स्वरसन्धिः, सवर्णदीर्घः।

इन्दीवरैः + उत्खचितम् = इन्दीवरैरुत्खचितम् - विसर्गसन्धिः, रुत्वम्।

उत्खचितम् + अन्तरम् = उत्खचितान्तरम् – स्वरसन्धिः, सवर्णदीर्घः।

उत्खचितान्तरा + इव = उत्खचितान्तरेव – स्वरसन्धिः, गुणः।

संसर्गवती + इव = संसर्गवतीव – स्वरसन्धिः, सवर्णदीर्घः।

काल + अगुरुः = कालागुरुः – स्वरसन्धिः, सवर्णदीर्घः।

भक्तिः + भुवः = भक्तिर्भुवः – विसर्गसन्धिः, रुत्वम्।

भुवः + चन्दनकल्पिता = चन्दनकल्पितेव – विसर्गसन्धिः, सत्वं, श्चुत्वम्।

चन्दनकल्पिता + इव = चन्दनकल्पितेव – स्वरसन्धिः, गुणः।

तमोभिः + छायाविलीनैः = तमोभिश्छायाविलीनैः – विसर्गसन्धिः, सत्वं श्चुत्वम्।

शबलीकृता + इव = शबलीकृतेव – स्वरन्धिः, गुणः।

शरत् + अभ्रलेखा = शरदभ्रलेखा = व्यञ्जनसन्धिः, जश्त्वम्।

रन्ध्रेषु + इव = रन्ध्रेष्विव – स्वरसन्धिः, यण्।

इव + आलक्ष्यम् = इवालक्ष्यम् – स्वरसन्धिः, सवर्णदीर्घः।

क्वचित् + च = क्वचिन्व – व्यञ्जनसन्धिः, श्चुत्वम्।

कृष्ण + उरगः = कृष्णोरगः – स्वरसन्धिः, गुणः।

उरगभूषणा + इव = उरगभूषणेव – स्वरसन्धिः, गुणः।

भस्म + अङ्गरागा = भस्माङ्गरागा – स्वरसन्धिः, सवर्णदीर्घः।

तनुः + ईश्वरस्य = तनुरीश्वरस्य – विसर्गसन्धि,ः, रुत्वम्।

अनवद्य + अङ्गी = अनवद्याङ्गी – स्वरसन्धिः, सवर्णदीर्घः।

पश्य + अनवद्याङ्गि = पश्यानवद्याङ्गि – स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

प्रभालेपिभिः – प्रभया लिम्पति इति प्रभालेपी, तैः इति – उपपदतत्पुरुषः।

सितपङ्कजानाम् – सितं च तत् पङ्कजम् इति सितपङ्कजम्, तेषाम्, इति कर्मधारयः।

उत्खचितान्तरा – उत्खचितम् अन्तरं यस्याः सा इति – बहुव्रीहिः।

प्रियमानसानाम् – प्रियं मानसं (सरः) येषां ते प्रियमानसाः, तेषाम् इति – बहुव्रीहिः।

कालागुरुदत्तपत्रा – कालागुरुणा दत्तं पत्रं यस्याम् सा इति- बहुव्रीहिः।

चन्दनकल्पिता – चन्दनेन कल्पिता – तृतीयातत्पुरुषः।

छायाविलीनैः- छायासु विलीनैः इति सप्तमीतत्पुरुषः।

शरदभ्रलेखा – शरद् + अभ्राणां लेखा इति षष्ठीतत्पुरुषः।

आलक्ष्यनभःप्रदेशा – आलक्ष्य नभसः प्रदेशः यस्याम् इति सा- बहुव्रीहिः।

कृष्णोरगभूषणा – कृष्णः उरगः भूषणं यस्याः यस्यां वेति सा – बहुव्रीहिः।

भस्माङ्गरागा – भस्म एव अङ्गरागः यस्याः सा- बहुव्रीहिः।

यमुनातरङ्गैः – यमुनायाः तरङ्गैः – षष्ठीतत्पुरुषः।

भिन्नप्रवाहा – भिन्नः प्रवाहः यस्याः सा- बहुव्रीहिः।

अनवद्याङ्गि – अनवद्यानि अङ्गानि यस्याः सा, सम्बोधने इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अनुविद्धा -अनु-उपसर्गः + व्यध्-धातुः + क्तप्रत्ययः + टाप् (स्त्रियाम्) प्र. ए. व.।

उत्खचितम् - उत्-उपसर्गः + खच् धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

दत्तम् - दा-धातुः + क्तिन् प्रत्ययः - स्त्री. प्र. ए. व.।

भक्तिः - भज् धातुः + क्तिन् प्रत्ययः - स्त्री. प्र. ए. व.।

कल्पिता- क्लृप् धातुः (णिजन्तः) + क्तप्रत्ययः + टाप् (स्त्रियाम्) - प्र. ए. व.।

विलीनैः- वि-उपसर्गः + ली धातुः + क्तप्रत्ययः - पुं. तृ. ब. व.।

शबलीकृता - शबल + च्विप्रत्ययः + कृ धातुः + क्तप्रत्ययः + टाप् स्त्री. तृ. ए. व.।

आलक्ष्यम् - आङ्-उपसर्गः + लक्ष् धातुः + ण्यत् प्रत्ययः - नपुं. प्र. ए. व.।

पश्य - दृश् धातुः + लोट् लकारः - म. पु. ए. व.।

विभाति - वि-उपसर्गः + भा-धातुः + लट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- गङ्गा-यमुना-सङ्गमस्थलस्य (प्रयागराजस्य) महिमानं प्रकटयति यत्-

**समुद्रपत्न्योर्जलसंनिपाते,**<br>
**पूतात्मनामत्र किलाभिषेकात्।**<br>
**तत्त्वावबोधेन विनापि भूयः,**<br>
**तनुत्यजां नास्ति शरीरबन्धः ॥ 58 ॥**

**अन्वयः** - अत्र (प्रयाग-तीर्थे) समुद्र-पत्न्योः जलसंनिपाते अभिषेकात् पूत+आत्मनाम् तनुत्यजाम् तत्त्व+अवबोधेन विना अपि भूयः शरीरबन्धः न अस्ति किल।

**व्याख्या**- अत्र = अस्मिन् पुण्यसङ्गमस्थले इति। समुद्रपत्न्योः = सागर-कामिन्योः, गङ्गा-यमुनयोः इति। जल-संनिपाते = सङ्गमस्थले, सङ्गम-तीर्थे इति। अभिषेकात् = स्नानात्, स्नानकरणात्। पूतात्मनाम् = पुण्यात्मनाम्, पवित्रात्मनाम्, विशुद्धात्मनाम् इति। तनुत्यजाम् = शरीरत्यागिनाम्, देहत्यागिनाम्। तत्त्वावबोधेन = परमार्थज्ञानेन, तत्त्वज्ञानेन इति। विना अपि = अभावे अपि, राहित्ये अपि। भूयः = पुनः, मुहुः, आवृत्त्या इति। शरीरबन्धः = देहबन्धः, शरीरयोगः। न अस्ति = न वर्त्तते, न विद्यते। पुनर्जन्म न विद्यते इत्याशयः। किल = एवं श्रूयते इति।

अत्र स्नानं कृत्वा तत्त्वज्ञानं विनापि मोक्षः लभ्यते इत्यभिप्रायः। अन्यत्र ज्ञानाद् एव मुक्तिः परन्तु अत्र स्नानादेव मुक्तिः इति भावः। 'तत्त्वावबोधेन विनापि मुक्तिः' इत्यस्मिन् निरूपणे विभावना अलङ्कारः। 'समुद्रपत्न्योः' इत्यत्र च समासोक्तिः। छन्दः उपजातिरिति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

समुद्रपत्न्योः + जलसंनिपाते = समुद्रपत्न्योर्जलसंनिपाते - विसर्गसन्धिः, रुत्वम्।

पूत + आत्मनाम् = पूतात्मनाम् - स्वरसन्धिः, सवर्णदीर्घः।

किल + अभिषेकात् = किलाभिषेकात् - स्वरसन्धिः, सवर्णदीर्घः।

तत्त्व + अवबोधेन = तत्त्वावबोधेन - स्वरसन्धिः, सवर्णदीर्घः।

विना + अपि = विनापि - स्वरसन्धिः, सवर्णदीर्घः।

भूयः + तनुत्यजाम् = भूयस्तनुत्यजाम् - विसर्गसन्धिः, सत्वम्।

न + अस्ति = नास्ति - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

समुद्रपत्न्योः-समुद्रस्य पत्नी इति समुद्रपत्नी, तयोः इति षष्ठीतत्पुरुषः।

जलसंनिपाते - जलानां संनिपाते इति षष्ठीतत्पुरुषः।

पूतात्मनाम् - पूतः आत्मा यस्य सः पूतात्मा, तेषामिति बहुव्रीहिः।

तत्त्वावबोधेन - तत्त्वस्य अवबोधेन इति षष्ठीतत्पुरुषः।

तनुत्यजाम् - तनुं त्यजति इति तनुत्यक्, तेषाम् इति - उपपदतत्पुरुषः।

शरीरबन्धः - शरीरस्य बन्धः इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

संनिपाते - सम् + नि-उपसर्गौ + पत् धातुः + घञ् प्रत्ययः - पुं. स. ए. व.।

पूतः - पू-धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

अभिषेकात् - अभि-उपसर्गः + सिच् धातुः + घञ् प्रत्ययः - पुं. प. ए. व.।

तत्त्वस्य - तत् + त्वप्रत्ययः (तद्धितः) - नपुं. ष. ए. व.।

अवबोधने - अव-उपसर्गः + बुध् धातुः + घञ् प्रत्ययः - पुं. स. ए. व.।

बन्धः- बन्ध् धातुः + घञ् प्रत्ययः - पुं. प्र. ए. व.।

अस्ति - अस् धातुः + लट्लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- अथ विमानात् निषाद-पुरं दर्शयति यत्-

**पुरं निषादाधिपतेरिदं तद्,**
**यस्मिन् मया मौलिमणिं विहाय।**
**जटासु बद्धास्वरुदत्सुमन्त्रः।**
**कैकेयि! कामाः फलितास्तवेति ॥ 59 ॥**

**अन्वयः**- निषाद + अधिपतेः इदम् तत् पुरम् (वर्त्तते) यस्मिन् मया मौलिमणिम् विहाय जटासु बद्धासु सुमन्त्रः 'कैकेयि! तव कामाः फलिताः' इति अरुदत्।

**व्याख्या**- (हे सीते!) निषादाधिपतेः = निषादराजस्य, गुहस्य इति। इदम् = एतद् दृश्यमानम्। तत् पुरम् = तत् नगरम्, तद् अधिष्ठानम्। वर्त्तते इति शेषः। यस्मिन् = यस्मिन् पुरे, यत्र इति। मया = रामेण। मौलिमणिम् = मुकुटमणिम्, शिरोमुकुटं वा। विहाय = त्यक्त्वा, अपहाय, अवतार्य। जटासु = सटासु, तपस्विवत् केशेषु इति। बद्धासु = रचितासु, कृतासु, विन्यस्तासु। यदा अहं (रामः) मुकुटं विहाय जटाबन्धनं कृतवान् तदा इति। सुमन्त्रः = दशरथस्य अमात्यः सारथिः च। (अरुदत् इति )। कैकेयि! = हे कैकेयनन्दिनि! भरत-मातः। तव = ते, कैकेय्याः। कामाः = कामनाः, अभिलाषाः, मनोरथाः। फलिताः इति = सफलाः जाताः इति, साफल्यम् अवाप्ताः इति, पूर्णाः जाताः इति। इत्येवंप्रकारेण, अरुदत् = रुदितवान् अश्रूणि अमुञ्चत् इति।

मम तपस्विवेषम् आलोक्य अत्रैव सुमन्त्रः आत्मनः आक्रोशं प्रकटितवान् इत्याशयः। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

निषाद + अधिपतेः = निषादाधिपतेः - स्वरसन्धिः, सवर्णदीर्घः।

अधिपतेः + इदम् = अधिपतेरिदम् - विसर्गसन्धिः, रुत्वम्।

तत् + यस्मिन् = तद् यस्मिन् – व्यञ्जनसन्धिः, जश्त्वम्।

बद्धासु + अरुदत् = बद्धास्वरुदत् – स्वरसन्धिः, यण्।

फलिताः + तव = फलितास्तव – विसर्गसन्धिः, सत्वम्।

तव + इति = तवेति – स्वरसन्धिः, गुणः।

**समास-परिचयः-**

निषादाधिपतेः – निषादानाम् अधिपतेः इति षष्ठीतत्पुरुषः।

मौलिमणिम् – मौलेः मणिम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विहाय – वि-उपसर्गः + हा-धातुः +ल्यप् प्रत्ययः – अव्ययप्रत्ययः।

फलिताः – फल् धातुः + क्तप्रत्ययः – पुं. प्र. ब. व.।

बद्धासु – बन्ध् (बध्) + धातुः क्तप्रत्ययः टाप् – स. ब. व.।

अरुदत् – रुद्धातुः + लुङ् लकारः – प्र. पु. ए. व.।

**प्रसङ्गः-** अथ सरयूनदी-वृत्तान्तं वर्णयितुं प्रारभते यत्-

**पयोधरैः पुण्यजनाङ्गनानाम्,**
**निर्विष्ट-हेमाम्बुज-रेणु यस्याः।**
**ब्राह्मं सरः कारणमाप्तवाचः,**
**बुद्धेरिवाव्यक्तमुदाहरन्ति ॥ 60 ॥**

**अन्वयः-** पुण्यजन+अङ्गनानाम् पयोधरैः निर्विष्ट-हेम+अम्बुज-रेणु, ब्राह्मम् सरः यस्याः (सरयूनद्याः) बुद्धेः अव्यक्तम् इव कारणम् आप्तवाचः उदाहरन्ति। (सा जननी इव माम् उपगूहति इव-इत्यनेन वाक्यनिबन्धनम्।)

**व्याख्या-** पुण्यजनाङ्गनानाम् = यक्षस्त्रीणाम्, यक्षसुन्दरीणाम् इति। पुण्यजनः नाम यक्षः अपि, सज्जनः चापि। अत्र यक्षार्थे प्रयोगः। पयोधरैः = स्तनैः, वक्षोजैः। निर्विष्टाः हेमाम्बुजानां रेणवः यस्य तत् निर्विष्ट-हेमाम्बुजरेणु। ब्रह्मसरोवरस्य विशेषणमिदम्। निर्विष्टः नाम उपभुक्तः, उपयुक्तः लेपितः वा। हेमाम्बुजं नाम स्वर्णकमलं, स्वर्णपङ्कजं वा। रेणुः नाम परागः, रजःकणः वा। उपभुक्तस्वर्णकमलपरागम् इत्यर्थः। यक्षकामिन्यः ब्रह्मसरोवरे जलक्रीडां स्नानादिकं च कुर्वन्ति, येन तत्र स्थितानां सुवर्णकमलानां परागकणाः तासां स्तनेषु संश्लिष्टाः भवन्ति इत्यभिप्रायः। (तादृशं) ब्राह्मं सरः = ब्रह्मसरोवरः, मानस-नामकं सरः, मानसरोवरः इति। यस्याः = सरयूनद्याः कारणं कथ्यते। कथमिव कारणम्? इत्यत्र उपमाद्वारा आह-

बुद्धेः = महत्तत्त्वस्य, महत्-नामकतत्त्वस्य इति। अव्यक्तम् इव = प्रधानम् इव प्रकृतिः इव इति। साङ्ख्य-शास्त्रे हि प्रकृतिः प्रधानतत्त्वं स्वीक्रियते, सा एव अव्यक्त-नाम्ना अपि व्यवह्रियते। तस्मात् प्रधानतत्त्वात् यद्वा अव्यक्तात् बुद्धेः उत्पत्तिः स्वीक्रियते। इयं बुद्धिः एव महत्तत्त्वम् इति निगद्यते-इति सामान्यः प्रासङ्गिकः परिचयः। एतद् आदाय एव महाकविः अत्र उपमां निबध्नाति यत् यथा अव्यक्तं (तत्त्वं) बुद्धितत्त्वस्य कारणं विद्यते, तथैव ब्रह्म-सरः, सरयूनद्याः कारणभूतं वर्त्तते इति।

अथ कः तथा वदति? इत्याह-आप्तवाचः उदाहरन्ति इति। आप्ता वाक् यस्मिन् इति आप्तवाक्। वेदाः पुराणग्रन्थाः वेत्यर्थः। यद्वा आप्ता वाक् यस्य सः आप्तवाक्, ते इति आप्तवाचः, ऋषयः सिद्धाः तपस्विनः वेति। उभयथाऽपि अर्थग्रहणे अभिप्रायहानिः तु नास्ति। वेदाः, पुराणानि, ऋषयः वा एतद् उदाहरन्ति-वदन्ति इति। इयं खलु दार्शनिकी उपमा प्रस्तुता कविना। छन्दः उपजातिरिति।

# व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पुण्यजन + अङ्गनानाम् = पुण्यजनाङ्गनानाम् - स्वरसन्धिः, सवर्णदीर्घः।

हेम + अम्बुजम् = हेमाम्बुजम् - स्वरसन्धिः, सवर्णदीर्घः।

आप्तवाचः + बुद्धेः = आप्तवाचो बुद्धेः - विसर्गसन्धिः, उत्वम्।

बुद्धेः + इवः = बुद्धेरिव - विसर्गसन्धिः, रुत्वम्।

इव + अव्यक्तम् = इवाव्यक्तम् - स्वरसन्धिः, सवर्णदीर्घः।

उत् + आहरन्ति = उदाहरन्ति - व्यञ्जनसन्धिः, जश्त्वम्।

**समास-परिचयः-**

पुण्य-जनाङ्गनाः - पुण्यजनानाम् अङ्गनाः इति षष्ठी-तत्पुरुषः।

निर्विष्ट-हेमाम्बुज-रेणु - निर्विष्टाः हेमाम्बुजानां रेणवः यस्य तत् इति बहुव्रीहिः।

आप्तवाचः = आप्ताः वाचः येषां ते इति-बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

निर्विष्टम् - निः-उपसर्गः + विश् धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

ब्राह्मम् - ब्रह्मन्-शब्दः + अण् प्रत्ययः (तद्धितः) - नपुं. प्र. ए. व.।

बुद्धेः - बुध् धातुः + क्तिन् प्रत्ययः - स्त्री. ष. ए. व.।

**प्रसङ्गः**- अयोध्यया सह सरयूनद्याः सम्बन्धं दर्शयति यत्-

**जलानि या तीर-निखात-यूपा,**
**वहत्ययोध्यामनु राजधानीम्।**
**तुरङ्गमेधाऽवभृथाऽवतीर्णैः**
**इक्ष्वाकुभिः पुण्यतरीकृतानि ॥ 61 ॥**

**अन्वयः**- तीर-निखात-यूपा या (सरयूः) तुरङ्ग-मेघ+अवभृथ+अवतीर्णैः इक्ष्वाकुभिः पुण्यतरीकृतानि जलानि अयोध्याम् राजधानीम् अनु वहति।

**व्याख्या**- तीरे निखाताः यूपाः यस्याः सा तीर-निखात-यूपा इति। - सरयूनद्याः विशेषणमिदं प्रथमान्तम्। तीरं नाम कूलं तटं वा। निखातः नाम भूमि-खनन-पूर्वकं संस्थापितः, प्रतिष्ठापितः वा। यूपः नाम यज्ञस्तम्भ-विशेषः। बलि-पशुबन्धनयोग्यः काष्ठनिर्मितः स्तम्भविशेषः वा। तट-संस्थापित-यज्ञस्तम्भा इत्यर्थः। अर्थात् सरयूनद्याः तटे अनेके यज्ञस्तम्भाः प्रतिष्ठापिताः सन्ति इति। तादृशी इयं नदी जलानि अयोध्यायां वहति (प्रापयति) इति वाक्य-निबन्धनम्। कीदृशानि जलानि इत्याह-तुरङ्ग-मेधाऽवभृथाऽवतीर्णैः = तुरङ्गमेधेषु अवभृथार्थम् अवतीर्णैः। तुरङ्गमेधः नाम अश्वमेघः, यज्ञविशेषः इति। अवभृथः नाम यज्ञसमाप्तिस्नानम् अर्थात् मुख्ययज्ञस्य सम्पन्नतायां क्रियमाणः पुण्यस्नानविशेषः इति। अवतीर्णः नाम अवगाढः, निमग्नः वा (स्नानार्थमिति)। अश्वमेध-यज्ञान्त-स्नानाऽर्थम् अवगाढैः। इक्ष्वाकूणां विशेषणम् इदं तृतीयान्तम्। इक्ष्वाकुभिः = इक्ष्वाकुवंशीयैः नृपैः, सम्राड्भिः वा। पुण्तरीकृतानि= पवित्रतरीकृतानि, पावनतरीकृतानि इति। सरयू-जलानि पुण्यमयानि तु पूर्वमेव आसन्, यज्ञान्तस्नाने च तेषाम् इतोऽपि पुण्यम् अवर्धत इत्याशयः। अयम् अभिप्रायः यत् इक्ष्वाकु-नृपतयः अश्वमेधयज्ञान् सम्पाद्य सरयूजलेषु पुण्यस्नानं कुर्वन्ति स्म, तत्कारणात् च तानि जलानि अतिशयपुण्यमयानि भवन्ति स्म इति। तादृशानि जलानि इति।

अयोध्यां राजधानीम् = अयोध्यानगरीम्, अयोध्यापुरीम्, साकेतनगरीम् इति। अनु = समीपे, उपकण्ठे वा। वहति – प्रापयति, आनयति। सरयूतीरे हि अयोध्यापुरी प्रतिष्ठिता इति प्रसिद्धं, सर्वविदितं च।

इयं पुण्यसलिला सरयूनदी अयोध्यायाः निकटे एव प्रवहति इति भावः। परिकरः काव्यलिङ्गं चालङ्कारौ। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

वहति + अयोध्याम् वहत्ययोध्याम् – स्वरसन्धिः, यण्।

तुरङ्गमेध + अवभृथः = तुरङ्गमेधावभृथः – स्वरसन्धिः, सवर्णदीर्घः।

अवभृथ + अवतीर्णैः = अवभृथावतीर्णैः – स्वरसन्धिः, सवर्णदीर्घः।

अवतीर्णैः + इक्ष्वाकुभिः = अवतीर्णैरिक्ष्वाकुभिः – विसर्गसन्धिः रुत्वम्।

**समास-परिचयः-**

तीर-निखात-यूपा – तीरे निखाता यूपाः यस्याः सा इति बहुव्रीहिः।

तुरङ्ग मेधावभृथावतीर्णैः – तुरङ्गमेधेषु अवभृथार्थम् अवतीर्णैः इति चतुर्थीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

निखातः – नि-उपसर्गः + खन् धातु + क्तप्रत्ययः – पुं. प्र. ए. व.।

अवभृथः – अव-उपसर्गः + भृ-धातुः + क्थन् प्रत्ययः – पुं. प्र. ए. व.।

अवतीर्णैः – अव-उपसर्गः + तॄ-धातुः + क्तप्रत्ययः – पुं. तृ. ब. व.।

पुण्यतरीकृतानि – पुण्य + तरप् + च्वि + कृ धातुः + क्त –नपुं. प्र. ब. व.।

वहति – वह् धातुः + लट् लकारः – प्र. पु. ए. व.।

**प्रसङ्गः**- सरयूं प्रति आत्मनः श्रद्धातिरेकं प्रकटयति यत्-

**यां सैकतोत्सङ्गसुखोचितानाम्,**
**प्राज्यैः पयोभिः परिवर्धितानाम्।**
**सामान्यधात्रीमिव मानसं मे,**
**सम्भावयत्युत्तरकोसलानाम् ॥ 62 ॥**

**अन्वयः**- याम् (सरयूम्) मे (रामस्य) मानसम्, सैकत+उत्सङ्ग-सुख+उचितानाम्, प्राज्यैः पयोभिः परिवर्धितानाम्, उत्तरकोसलानाम् सामान्य-धात्रीम् इव सम्भावयति।

**व्याख्या**- याम् = सरयूनदीम् । मे = मम, रामस्य इति। मानसम् = हृदयम्, अन्तःकरणं, चेतः। सैकतोत्सङ्ग-सुखोचितानाम् = सैकतम् एव उत्सङ्गः इति सैकतोत्सङ्गः, सैकतोत्सङ्गस्य सुखम् इति सैकतोत्सङ्गसुखम्, सैकतोत्सङ्ग-सुखानाम् उचित इति सैकतोत्सङ्गसुखोचितः तेषाम् इति सैकतोत्सङ्गसुखोचितानाम्। सैकतं नाम पुलिनं, तटं वा। उत्सङ्गः नाम क्रोडः, अङ्कः वा। सुखं नाम सौख्यं, शर्म, आह्लादः वा। उचितः नाम योग्यः, अनुरूपः वा। पुलिन-क्रोड-संख्याऽनुरूपाणाम्, तटोत्सङ्गानन्दयोग्यानाम् इत्यर्थः। उत्तरकोसलानां विशेषणमिदं षष्ठ्यन्तम्। उत्तरकोसलस्य राजानः हि अस्याः एव नद्याः पुलिनरूपे उत्सङ्गे बाल्य-क्रीडा-विनोद-सुखानि अनायासम् आसादयन्ति (लभन्ते) इत्याशयः।

अन्यम् अपि उपकारं दर्शयति-

प्राज्यैः = प्रचुरैः, प्रभूतैः सुपर्याप्तैः इति। पयोभिः = पानीयैः, जलैः, अम्बुभिः। पयः पदं दुग्धवाचकमपि विद्यते, धात्री-पक्षे तस्यापि ग्रहणम्। नदीपक्षे तु जलम् इत्येव। परिवर्धितानाम् = परिपालितानाम्, परिपोषितानाम्। उत्तरकोसलानाम् = उत्तरकोसल-नृपतीनाम् इति। सामान्य धात्रीम् इव = साधारणमातरम् इव, उपमातरम् इव, उपजननीम् इव। इव = उपमार्थकमिदम्। सम्भावयति =सम्मानयति, आद्रियते, श्रद्दधाति इति।

उत्तरकोसलानां महोपकारिणीं सरयूं प्रति मम (रामस्य) हृदये असीमश्रद्धा विद्यते इति आशयः। 'धात्रीमिव' इत्यत्र उपमा अलङ्कारः। पयोभिः-इत्यत्र श्लेषः। धात्री-कल्पनायां कारणस्य निर्देशात् काव्यलिङ्गम् अपि। छन्दस्तु इन्द्रवज्रा इति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

सैकत + उत्सङ्गः = सैकतोत्सङ्गः - स्वरसन्धिः, गुणः।

सुख + उचितः = सुखोचितः - स्वरसन्धिः, गुणः।

सम्भावयति + उत्तरकोसलानाम् = सम्भावयत्युत्तरकोसलानाम् - स्वरसन्धिः, यण्।

**समास-परिचयः-**

सैकतोत्सङ्गसुखोचितानाम् - सैकतोत्सङ्गे सुखोचितानाम् इति-सप्तमीतत्पुरुषः।

सामान्य-धात्रीम् - सामान्या च असौ धात्री इति ताम् - कर्मधारयः।

**प्रकृति-प्रत्ययादि-प्रत्ययः-**

परिवर्धितानाम् - परि + वृध् धातुः (णिजन्तः) + क्त - पुं. ष. ब. व.।

सम्भावयति - सम् + भू धातुः (णिजन्तः) + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** सरयूनदीं स्वमातृरूपेण सम्भावयन् वर्णयति यत्-

**सेयं मदीया जननीव तेन,**
**मान्येन राज्ञा सरयूर्वियुक्ता।**
**दूरे वसन्तं शिशिरानिलैर्माम्,**
**तरङ्गहस्तैरुपगूहतीव ॥ 63 ॥**

**अन्वयः-** मान्येन तेन राज्ञा (दशरथेन) वियुक्ता, मदीया जननी (कौसल्या) इव, सा इयम् सरयूः दूरे वसन्तम् माम् (रामम्) शिशिर+अनिलैः तरङ्ग-हस्तैः उपगूहति इव।

**व्याख्या-** मान्येन = आदरणीयेन, पूज्येन। तेन दिवङ्गतेन मद्वियोगे त्यक्तप्राणेन इत्याशयः। राज्ञा = महाराजेन दशरथेन, मम पित्रा इति। वियुक्ता = विरहिता, विप्रयुक्ता। मदीया = मम, मामकीना। जननी इव = माता इव, जन्मदायिनी इव, कौसल्या इव इति। इव-उपमार्थे। सा = सरयूनदी, पूर्ववर्णिता इति। इयम् = एषा, पुरतः दृश्यमाना। अनेन अयोध्यायाः सुतरां निकटता लक्ष्यते, पुष्पक-विमानं तन्निकटे प्राप्तम् इत्याशयः। सरयूः = ब्रह्मसरोवरोद्भूता नदी इति। दूरे वसन्तम् = वनवासे विद्यमानम्। वनवासं परिसमाप्य निवर्त्तमानम् इत्याशयः। माम् = रामम्। शिशिरानिलैः = शीतलवातैः, शीतलसमीरैः इति। तरङ्गाणां विशेषणम् इदं तृतीयान्तम्। तरङ्ग-हस्तैः = तरङ्गाः एव हस्ताः इति तरङ्गरूपहस्तैः, वीचिकरैः, ऊर्मिपाणिभिः, लहरि-पाणिभिः। उपगूहति इव = आलिङ्गति इव, परिष्वजते इव।

यथा माता चिरात् प्रत्यागतं पुत्रं स्निग्धस्पर्शैः आलिङ्गति तथैव इयं सरयूः अपि शीतलस्पर्शैः

माम् आलिङ्गति इति आशयः। तरङ्गेषु हस्तकल्पना-निरूपणात् रूपकमलङ्कारः। जननी-साम्य-वर्णनात् च उपमा। शीतलस्पर्शे आलिङ्गनस्य सम्भावनात् च उत्प्रेक्षा अपि। छन्दः उपजातिः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

सा + इयम् = सेयम् - स्वरसन्धिः, गुणः।

जननी + इव = जननीव - स्वरसन्धिः, सवर्णदीर्घः।

सरयूः + वियुक्ता = सरयूर्वियुक्ता - विसर्गसन्धिः, रुत्वम्।

शिशिरः + अनिलैः = शिशिरानिलैः - स्वरसन्धिः, सवर्णदीर्घः।

अनिलैः + माम् = अनिलैर्माम् - विसर्गसन्धिः, रुत्वम्।

हस्तैः + उपगूहति = हस्तैरुपगूहति - विसर्गसन्धिः, रुत्वम्।

उपगूहति + इव = उपगूहतीव - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

शिशिरानिलैः -शिशिराः अनिलाः यैः ते शिशिरानिलाः, तैः इति बहुव्रीहिः।

तरङ्ग-हस्तैः - तरङ्गः एव हस्तः इति तरङ्गहस्तः, तैः इति रूपककर्मधारयः।

**प्रकृति-प्रत्ययादि-परिचयः-**

मान्येन - मन् धातुः + ण्यत् - पुं. तृ. ए. व.।

वियुक्ता - वि + युज् धातुः + क्त + टाप् - प्र. ए. व.।

वसन्तम् - वस् धातुः + शतृ प्रत्ययः - पुं. द्वि. ए. व.।

उपगूहति - उप +गुह् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** विमानेन अयोध्यां प्रविशन् रामः दूरात् भरतस्य आगमनं तर्कयति यत्-

**विरक्तसन्ध्याकपिशं पुरस्ताद्,**
**यतो रजः पार्थिवमुज्जिहीते।**
**शङ्के हनूमत्कथितप्रवृत्तिः,**
**प्रत्युद्गतो मां भरतः ससैन्यः ॥ 64 ॥**

**अन्वयः-** यतः विरक्त-सन्ध्या-कपिशम् पार्थिवम् रजः पुरस्तात् उज्जिहीते, (अतः) शङ्के (यत्) - हनूमत्कथित-प्रवृत्तिः ससैन्यः भरतः माम् प्रत्युद्गतः (इति)।

**व्याख्या-** यतः = यस्मात् कारणात् हि। विरक्त-सन्ध्या-कपिशम् = सन्ध्यातुल्य-रक्तवर्णम्, सन्ध्यावेला-ताम्रवर्णम् इति। पार्थिवम् = पृथिव्याः, भूमेः, इति। रजः = धूलिः, रेणुः। पुरस्ताद् = अग्रे, उत्थितं दृश्यते इत्याशयः। (अतः तस्मात् कारणात्) शङ्के = तर्कयामि, सम्भावयामि अनुमानं करोमि। (यत्) हनूमत्कथित-प्रवृत्तिः = हनुमता ज्ञातवृत्तान्तः, पवनसुत-विदितागमनवार्तः इत्यर्थः। हनूमता कथिता प्रवृत्तिः यस्मै सः (भरतः) इति। प्रवृत्तिः नाम रामस्य आगमन-वार्ता इति। अर्थात् हनुमतः मुखेन अस्माकम् आगमन-समाचारं श्रुत्वा इति। ससैन्यः = सेनासहितः, सैन्यसहितः। भरतः = कैकेयीपुत्रः। माम् = रामम्। प्रत्युद्गतः = स्वागतार्थम् उपस्थितः, स्वागतसम्मानार्थम् आगतः इति।

भरतस्य उपस्थितेः अनुमानात् अत्र अनुमानम् अलङ्कारः। 'विरक्तसन्ध्याकपिशं रजः' इत्यत्र उपमा अलङ्कारः। उपजातिः छन्दः।

# व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पुरस्तात् + यतः = पुरस्ताद्यतः - व्यञ्जनसन्धिः, जश्त्वम्।

यतः + रजः = यतो रजः - विसर्गसन्धिः, उत्वम्।

उत् + गतः = उद्गतः - व्यञ्जनसन्धिः, जश्त्वम्।

प्रति + उद्गतः = स्वरसन्धिः, यण्।

**समास-परिचयः-**

विरक्त-सन्ध्या-कपिशम्-

(i) विरक्ता च असौ सन्ध्या इति विरक्तसन्ध्या, इति कर्मधारयः।

(ii) विरक्तसन्ध्या इव कपिशम् इति विरक्तसन्ध्याकपिशम् उपमानपूर्वः कर्मधारयः।

ससैन्यः - सह सैन्येन इति बहुव्रीहिः।

हनूमत्कथितप्रवृत्तिः - हनूमता कथिता प्रवृत्तिः यस्मै सः इति - बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विरक्ता - वि + रञ्ज् धातुः + क्तप्रत्ययः + टाप् - प्र. ए. व.।

कथिता - कथ् धातुः + क्तप्रत्ययः + टाप् प्र. ए. व.।

प्रवृत्तिः - प्र + वृत् धातुः + क्तिन् प्रत्ययः - स्त्री. प्र. ए. व.।

प्रत्युद्गतः - प्रति उत् + उपसर्गौ + गम् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

उज्जिहीते - उत् + हाङ् धातुः (आत्मने )+ लट् - प्र. पु. ए. व.।

शङ्के - शङ्क् धातु : (आत्मने)+ लट् - उ. पु. ए. व.।

**प्रसङ्गः-** 'इदानीं भरतः किं करिष्यति' इत्यात्मनः विचारं प्रकटयति यत्-

**अद्धा श्रियं पालितसङ्गराय,**
**प्रत्यर्पयिष्यत्यनघां स साधुः।**
**हत्वा निवृत्ताय मृधे खरादीन्,**
**संरक्षितां त्वामिव लक्ष्मणो मे ॥ 65 ॥**

**अन्वयः-** मृधे खर + आदीन् हत्वा निवृत्ताय (मे) लक्ष्मणः संरक्षिताम् (अनघाम्) त्वाम् (सीताम्) इव, साधुः सः (भरतः)पालित-सङ्गराय मे अनघाम् (संरक्षिताम्) श्रियम् प्रत्यर्पयिष्यति (इति) अद्धा।

**व्याख्या-** मृधे = युद्धे, सङ्ग्रामे। खरादीन् = खरादि-राक्षसान्, खरं दूषणं त्रिशिरसं चेति मुख्यान्। हत्वा= मारयित्वा, व्यापाद्य । निवृत्ताय = प्रत्यागताय, प्रत्यावर्तिताय। मे रामाय इति। लक्ष्मणः = सुमित्रानन्दनः। संरक्षिताम् = परित्राताम्, परिरक्षिताम्। अनघाम् = निर्दोषाम्, निष्पापाम्। त्वाम् इव = त्वां सीताम् इव। साधुः = सत्पुरुषः, सज्जनः, महाशयः। सः = असौ भरतः इति। पालित-सङ्गराय = निर्वाहित-प्रतिज्ञाय, पूरितप्रतिज्ञाय। मे = रामाय। अनघाम् = दोषरहिताम्, अविकृतस्वरूपाम् इति। यथावद् व्यवस्थिताम् इत्याशयः। (संरक्षिताम् = परिरक्षिताम्, सुरक्षिताम्) श्रियम् = राजलक्ष्मीं, राज्यश्रियं, राज्यसत्तां वा। प्रत्यर्पयिष्यति = समर्पयिष्यति, ग्राहयिष्यति इति। अद्धा = सत्यम् एव इति। सुनिश्चितम् इति।

भरतस्य मनसि राज्यलक्ष्मीं प्रति न कश्चिद् अपि लोभः आसीत्, नैव चास्ति, न चापि भविष्यति इति भावः। उपमा अलङ्कारः। इन्द्रवज्रा च छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

प्रति + अर्पयिष्यति = प्रत्यर्पयिष्यति - स्वरसन्धिः, यण्।

प्रत्यर्पयिष्यति + अनघाम् = प्रत्यर्पयिष्यत्यनघान् - स्वरसन्धिः, यण्।

सः + साधुः = स साधुः - विसर्गसन्धिः, विसर्गलोपः।

खर + आदीन् = खरादीन् - स्वरसन्धिः, सवर्णदीर्घः।

लक्ष्मणः + मे = लक्ष्मणो मे -विसर्गसन्धिः उत्वम्।

**समास-परिचयः-**

पालितसङ्गराय= पालितः सङ्गरः येन सः- पालितसङ्गरः, तस्मै इति- बहुव्रीहिः।

अनघाम् = न विद्यते अघं यस्यां सा अनघा, ताम् इति बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

हत्वा - हन् धातुः + क्त्वाप्रत्ययः - अव्ययप्रत्ययः।

निवृत्ताय - नि + वृत् धातुः + क्तप्रत्ययः - पुं. च. ए. व.।

संरक्षिताम् - सम् + रक्ष् धातुः + क्तप्रत्ययः टाप् - द्वि. ए. व.।

प्रत्यर्पयिष्यति - प्रति + ऋधातुः (णिजन्तः) + लृट् प्र. पु. ए. व.।

**प्रसङ्गः**- अथ आगच्छन्तं भरतं वर्णयति यत्-

> **असौ पुरस्कृत्य गुरुं पदातिः,**
> **पश्चादवस्थापितवाहनीकः।**
> **वृद्धैरमात्यैः सह चीरवासाः,**
> **मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥ 66 ॥**

**अन्वयः**- असौ पदातिः, चीरवासाः, पश्चात्+अवस्थापित-वाहिनीकः, गुरुम् पुरस्कृत्य, वृद्धैः अमात्यैः सह, अर्घ्यपाणिः भरतः माम् अभ्युपैति।

**व्याख्या**- असौ = सः समक्षे दृश्यमानः। पदातिः = पादचारी, पत्तिः। पद्भ्यामेव न तु रथम् आरूढः इत्याशयः। चीरवासाः = वल्कलवासाः, वल्कलवस्त्रधारी। तपस्विवेषधारी इत्याशयः। पश्चात् अवस्थापिता वाहिनी येन सः-पश्चादवस्थापितवाहिनीकः । पश्चात् नाम पृष्ठभागः। वाहिनी नाम सेना, सैन्यं वा। पृष्ठभाग-स्थापितसैन्यः इत्यर्थः। गुरुम् = कुलगुरुम्, वसिष्ठम् इति। पुरस्कृत्य = अग्रे कृत्वा। वृद्धैः = वर्षिष्ठैः, ज्येष्ठैः। परिपक्वबुद्धिभिः इत्यर्थः। अमात्यैः मन्त्रिभिः, सचिवैः। सह = समम्, साकम्, सार्धम्। अर्घ्य-पाणिः= अर्घ्यं पाणौ यस्य सः इति। अर्घ्यं नाम सत्कार-करणार्थं चरणक्षालनार्थं वा जलादिकम्। पाणिः नाम हस्तः, करः, शयः वा। अर्घ्यकरः, अर्घ्यजलहस्तः इत्यर्थः। चरणोदकम् आदाय इत्याशयः। भरतः = अनुजः कैकेयीनन्दनः। माम् = रामम्। अभ्युपैति = आयाति, आगच्छति।

रामं प्रति भरतस्य अतिशय-श्रद्धा, उत्कण्ठा च लक्ष्यते। पदातिः, चीरवासाः, इत्यादि प्रयोगे परिकरः अलङ्कारः। उपजातिः छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

पुरः + कृत्य = पुरस्कृत्य - विसर्गसन्धिः, सत्वम्।

पश्चात् + अवस्थापिता = पश्चादवस्थापिता - व्यञ्जनसन्धिः, जश्त्वम्।

वृद्धैः + अमात्यै = वृद्धैरमात्यैः - विसर्गसन्धिः, रुत्वम्।

चीरवासाः + माम् = चीरवासा माम् - विसर्गसन्धिः, विसर्गलोपः।

अर्घ्यपाणिः + भरतः = अर्घ्यपाणिर्भरतः - विसर्गसन्धिः, रुत्वम्।

उप + एति = उपैति - स्वरसन्धिः, वृद्धिः।

अभि + उपैति = अभ्युपैति - स्वरसन्धिः, यण्।

भरतः + अभ्युपैति = भरतोऽभ्युपैति - विसर्गसन्धिः, उत्वं, पूर्वरूपम्।

**समास-परिचयः-**

पश्चादवस्थापितवाहिनीकः -

(i) पश्चात् अवस्थापिता वाहिनी येन सः इति - बहुव्रीहिः।

चीरवासाः- चीरं वासः यस्य सः इति - बहुव्रीहिः।

अर्घ्यपाणिः - अर्घ्यं पाणौ यस्य इति- बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

पुरस्कृत्य - पुरः (अव्ययम्) + कृ धातुः + ल्यप् - अव्ययप्रत्ययः।

अवस्थापिता - अव + स्था (णिजन्तः) धातुः + क्त + टाप् - स्त्री. प्र. ए. व.।

वृद्धैः - वृध् धातुः + क्त - पुं. तृ. ब. व.।

अभ्युपैति - अभि + उप-उपसर्गौ + इण् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः**- भरतस्य कठोर-तपस्यां निर्दिशति यत्-

**पित्रा विसृष्टां मदपेक्षया यः,**
**श्रियं युवाप्यङ्कगतामभोक्ता।**
**इयन्ति वर्षाणि तया सहोग्रम्,**
**अभ्यस्यतीव व्रतमासिधारम् ॥ 67 ॥**

**अन्वयः**-यः पित्रा विसृष्टाम्, अङ्कगताम् (अपि) श्रियम् युवा अपि मत्+अपेक्षया अभोक्ता, (असौ) इयन्ति वर्षाणि तया सह उग्रम् आसिधारम् व्रतम् अभ्यस्यति इव।

**व्याख्या**- यः = भरतः। पित्रा = जनकेन। विसृष्टाम् = प्रदत्तां, निवेशिताम्, समर्पिताम् इति। अङ्क-गताम् = उत्सङ्ग-सङ्गताम् (अपि), क्रोड-प्राप्ताम् (अपि)। स्वाधिकारे स्थिताम् अपि इत्याशयः। श्रियम् = लक्ष्मीम्, राज्यलक्ष्मीम् इत्यर्थः। राजवैभवम् इत्याशयः। युवा अपि = युवकः अपि, यौवनस्थितः अपि। मदपेक्षया = मम रामस्य अपेक्षया, आशया। मत्कारणात् इत्यर्थः। श्रद्धया भक्त्या वा इत्याशयः। अभोक्ता = न भोक्ता अर्थात् निःस्पृहः, निरभिलाषः, निर्लालसः इति। असौ = सः, भरतः इति। इयन्ति वर्षाणि = एतावन्ति अब्दानि, इयतः वत्सरान् इति। चतुर्दश वर्षाणि इत्यर्थः। सुदीर्घ-काल-पर्यन्तम् इत्याशयः। तया = श्रिया, राजलक्ष्म्या, राजसत्तया इति। सह = समम्, सार्धम्, साकम्। उग्रम् = अतिकठोरम्, अति-कठिनम्, अतिदुष्करम्, दुश्चरम् इति। आसिधारं व्रतम् = असिधाराव्रतम्, खड्गधारा-चलन-तुल्यं व्रतम्, प्रखरतम-सङ्कल्पम् इत्यर्थः। अभ्यस्यति इव = निर्वहति इव, आचरति इव।

समासोक्तिः उत्प्रेक्षा च अलङ्कारौ। उपजातिः छन्दः।

# व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

मत् + अपेक्षया = मदपेक्षया - व्यञ्जनसन्धिः, जश्त्वम्।

युवा + अपि = युवापि - स्वरसन्धिः, सवर्णदीर्घः।

युवापि + अङ्कगताम् = युवाप्यङ्कगताम् - स्वरसन्धिः, यण्।

सह + उग्रम् = सहोग्रम् - स्वरसन्धिः, गुणः।

अभ्यस्यति + इव = अभ्यस्यतीव - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

अङ्कगताम् - अङ्कं गता इति अङ्कगता, ताम् इति- द्वितीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विसृष्टाम् - वि सृज् + धातुः + क्त + टाप् - स्त्री. द्वि. ए. व.।

अभोक्ता - नञ् (अ) + भुज् धातुः + तृन् प्रत्ययः - पुं. प्र. ए. व.

अपेक्षया - अप + ईक्ष् धातुः + अ-प्रत्ययः + टाप् - स्त्री. तृ. ए. व.।

अभ्यस्यति - अभि + अस् धातुः + लट् - प्र. पु. ए. व.।

**प्रसङ्गः-** आकाशात् विमानस्य अवतरणं वर्ण्यते यत्-

**एतावदुक्तवति दाशरथौ तदीयाम्,**
**इच्छां विमानमधिदेवतया विदित्वा।**
**ज्योतिष्पथादवततार सविस्मयाभिः,**
**उद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥ 68 ॥**

**अन्वयः-** दाशरथौ (रामे) एतावद् उक्तवति, तदीयाम् इच्छाम् अधिदेवतया विदित्वा विमानम् सविस्मयाभिः, भरत+अनुगाभिः, प्रकृतिभिः उद्वीक्षितम् ज्योतिष्पथात् अवततार।

**व्याख्या-** दाशरथौ = दशरथनन्दने, रामे इति। एतावत् = इयत्, एतन्मात्रम्। उक्तवति = कथितवति, भाषितवति। अर्थाद् यदा रामः एतानि (पूर्ववर्णितानि) वचनानि उक्तवान् तदा इति। अयोध्यां प्राप्य इत्याशयः। तदीयाम् = तस्य, रामस्य इति। इच्छाम् = मनोगतम्, अभिलाषम् (एव)। अधिदेवतया = अधिदेवरूपेण, अधिदेवत्वेन इति। अधिदेवः नाम अधिष्ठाता, नियन्ता, स्वामी वा। रामस्य इच्छा एव विमानस्य स्वामिनी आसीत् अतः विमानं तस्य इच्छामात्रेण एव सञ्चलति स्म। अत्र अयमेव भावः विराजते।

विदित्वा = ज्ञात्वा, अवगत्य। विमानम् = वायुयानम्, पुष्पकम् इति। सविस्मयाभिः = विस्मिताभिः, आश्चर्य-चकिताभिः। भरतानुगाभिः = भरतस्य अनुगामिनीभिः, पृष्ठगामिनीभिः। प्रकृतिभिः = प्रजाभिः, नागरिकैः, प्रजाजनैः। उद्वीक्षितम् = विलोकितम्, दृष्टम्। दृष्टिम् उत्थाप्य दृष्टम् इत्यर्थः। प्रजाः विस्मयपूर्वकं विमानं पश्यन्ति स्म इत्याशयः। तादृशं तद् विमानम्-ज्योतिष्पथात् = ज्योतिर्मार्गात्, आकाशात्, गगनात् इति। अवततार = अवातरत्, अवतीर्णम्, नीचैः आगतम् इत्यर्थः। भूमिं प्राप्तम् इत्याशयः।

अयोध्यां प्राप्य विमानं स्वयमेव भूमिम् अवातरत् इति भावः।

'अधिदेवतया' इत्यत्र लुप्तोप्रेक्षा अलङ्कारः। छन्दः-वसन्तलिका इति। तल्लक्षणं च-

**उक्ता वसन्ततिलका तभजा जगौ गः ॥** इति ॥

तगणः, भगणः, जगणद्वयं गुरुद्वयं चेति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

एतावत् + उक्तवति = एतावदुक्तवति - व्यञ्जनसन्धिः, जश्त्वम्।

ज्योतिः + पथात् = ज्योतिष्पथात् - विसर्गसन्धिः, सत्वं षत्वम्।

ज्योतिष्पथात् + अवततार = ज्योतिष्पथादवततार - व्यञ्जनसन्धिः,जश्त्वम्।

वि + ईक्षितम् = वीक्षितम् - स्वरसन्धिः, सवर्णदीर्घः।

उत् + वीक्षित् = उद्वीक्षितम् - व्यञ्जनसन्धिः, जश्त्वम्।

सविस्मयाभिः + उद्वीक्षितम् = सविस्मयाभिरुद्वीक्षितम् -विसर्गसन्धिः, रुत्वम्।

प्रकृतिभिः + भरतानुगाभिः = प्रकृतिभिर्भरतानुगाभिः - विसर्गसन्धिः, रुत्वम्।

भरत + अनुगाभिः = भरतानुगाभिः - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

सविस्मयाभिः - विस्मयेन सह (या) सविस्मया, ताभिः इति-बहुव्रीहिः।

भरतानुगाभिः - भरतस्य अनुगाभिः इति षष्ठीतत्पुरुषः।

ज्योतिष्पथात् - ज्योतिषां पन्थाः इति ज्योतिष्पथः, तस्मात् इति-षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

उक्तवति = वच् धातुः + क्तवतु प्रत्ययः - पुं. स. ए. व.।

विदित्वा = विद् धातुः + क्त्वा प्रत्ययः - अव्ययप्रत्ययः।

उद्वीक्षितम् = उत् + वि + ईक्ष् धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

दाशरथौ = दशरथ + इञ् प्रत्ययः (तद्धितः)- पुं. स. ए. व.।

अवततार = अव + तॄ धातुः + लिट् लकारः - प्र. पु. ए. व।

**प्रसङ्गः**- अथ पुष्पक-विमानात् रामस्य अवतरणं वर्ण्यते यत्-

**तस्मात्पुरःसर-विभीषणदर्शितेन,**<br>
**सेवाविचक्षण-हरीश्वरदत्तहस्तः।**<br>
**यानादवातरददूरमहीतलेन,**<br>
**मार्गेण भङ्गिरचितस्फटिकेन रामः ॥ 69 ॥**

**अन्वयः**- पुरःसर-विभीषण-दर्शितेन, अदूर-महीतलेन, भङ्गिरचित-स्फटिकेन मार्गेण, सेवा-विचक्षण-हरीश्वर-दत्त-हस्तः रामः, तस्मात् यानात् अवातरत्।

**व्याख्या**- पुरः सरति इति पुरस्सरः, पुरस्सरः च असौ विभीषणः इति पुरस्सरविभीषणः, तेन दर्शितः इति पुरस्सर-विभीषण-दर्शितः, तेन इति-पुरस्सर-विभीषण-दर्शितेन इति। मार्गस्य विशेषणम् इदम्। अग्रगामि-विभीषण-प्रदर्शितेन इत्यर्थः। अग्रे गच्छन् विभीषणः मार्गं दर्शयति स्म, निर्दिशति स्म इत्यर्थः। तादृशेन मार्गेण इत्यर्थः। अपि च-अदूरमहीतलेन = नास्ति दूरं महीतलं यस्मात् सः अदूरमहीतलः, तेन इति अदूरमहीतलेन। आसन्न-भूमि-स्थलेन, सुनिकट-पृथिवी-तलेन इत्यर्थः। विमानात् पृथिवीतलं दूरं नासीत् इत्यर्थः। तादृशेन मार्गेण। अपि च-भङ्गिरचितस्फटिकेन = भङ्गिभिः रचितः स्फटिकः यस्मिन् सः भङ्गिरचितस्फटिकः, तेन इति। भङ्गिः नाम शोभा, सुन्दर-विन्यासः, विच्छित्तिः वा। रचितः नाम निर्मितः निबद्धः वा। स्फटिकः नाम मणिविशेषः, उत्कृष्टकाचः वा। सुविन्यास-निबद्ध-काचेन इत्यर्थः। स्फटिकमणि-निर्मित-सोपानेन इत्याशयः। अर्थात् विमानात्

पृथिवीतलपर्यन्तम् अवतरणयोग्यः मार्गः स्फटिक-मणिभिः सुसज्जितः आसीत् इति। तादृशेन मार्गेण। मार्गेण = पथा, पद्धत्या वा। सेवा-विचक्षण-हरीश्वर-दत्तहस्तः = सेवाकुशलसुग्रीवेण अवलम्बितहस्तः, सेवानिपुणसुग्रीवेण गृहीतकरः इत्यर्थः। रामस्य विशेषणमदिम्। रामः सीतापतिः। यानात् विमानात् पुष्पकात्। अवातरत् = अवततार, अवतीर्णः इति।

वसन्ततिलका छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

हरि + ईश्वरः = हरीश्वरः- स्वरसन्धिः, सवर्णदीर्घः।

यानात् + अवातरत् = यानादवातरत् - व्यञ्जनसन्धिः, जश्त्वम्।

अव + अतरत् = अवातरत् - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

पुरस्सर-विभीषण-दर्शितेन - पुरस्सरेण विभीषणेन दर्शितः इति पुरस्सर-विभीषण-दर्शितः, तेन इति- तृतीया तत्पुरु षः।

सेवा-विचक्षण-हरीश्वर-दत्तहस्तः - सेवाविचक्षेण हरीश्वरेण दत्तः हस्तः यस्मै इति सः - बहुव्रीहिः।

अदूर-महीतलेन - न दूरं महीतलं यस्मात् इति अदूरमहीतलः (मार्गः) तेन इति - बहुव्रीहिः।

भङ्गिरचितस्फटिकेन - भङ्गिभिः रचितः स्फटिकः यस्मिन् इति तेन -बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

दर्शितेन - दृश् धातुः (णिजन्तः) + क्तप्रत्ययः - पुं. तृ. ए. व.।

दत्तः - दा धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

अवातरत् - अव + तॄ धातुः + लङ् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- कुलगुरुं प्रति भरतं प्रति च रामस्य हार्दिकः व्यवहारः वर्ण्यते यत्-

**इक्ष्वाकु-वंश-गुरवे प्रयतः प्रणम्य,**
**स भ्रातरं भरतमर्घ्यपरिग्रहान्ते।**
**पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ,**
**तद्भक्त्यपोढ-पितृ-राज्य-महाभिषेके ॥ 70 ॥**

**अन्वयः**- प्रयतः सः (रामः) इक्ष्वाकु-वंश-गुरवे प्रणम्य, अर्घ्य-परिग्रह+अन्ते पर्यश्रुः भ्रातरम् भरतम् अस्वजत। तद्-भक्ति+अपोढ-पितृराज्य-महाभिषेके मूर्धनि च उपजघ्रौ।

**व्याख्या**- प्रयतः = संयतः, संयमवान्, जितेन्द्रियः इति। सः = रामः। इक्ष्वाकु-वंश-गुरवे = स्वकुलगुरवे, कुलगुरु-वसिष्ठाय इति। प्रणम्य = नमस्कृत्य, प्रणामं कृत्वा। अर्घ्य-परिग्रहान्ते = अर्घ्यस्वीकारान्ते, अर्घ्यं स्वीकृत्य इति, परिग्रहः नाम स्वीकारः, स्वीकृतिः वा। भरतेन आनीतम् अर्घ्यं-स्वीकृत्य इत्यर्थः। पर्यश्रुः = अश्रुपूर्णः, नयनजलपूर्णः, आनन्दाश्रु -परिपूर्णः इत्यर्थः। भ्रातरम् = अनुजम्। भरतम् = कैकेयीपुत्रम्। अस्वजत = आलिङ्गत्, आलिङ्गितवान्। भरतस्य आलिङ्गनाय उत्कण्ठितोऽपि प्रथमं कुलगुरुं प्रणतवान्, ततः अर्घ्यं स्वीकृतवान्, ततश्च अन्ते आलिङ्गनं कृतवान्- इति 'प्रयत-' विशेषणपदस्य गूढः अभिप्रायः। अपि च-

तद्भक्त्यपोढ-पितृ-राज्य-महाभिषेके = तस्मिन् (राम) भक्तिः इति तद्भक्तिः, तद्भक्त्या अपोढः इति तद्भक्त्यपोढः। पितुः राज्यम् इति पितृराज्यम्, पितृराज्यस्य महाभिषेकः इति पितृराज्यमहाभिषेकः।

तद्भक्त्या अपोढः पितृराज्यमहाभिषेकः येन सः- तद्भक्त्यपोढ-पितृराज्य-महाभिषेकः, तस्मिन् इति। मूर्धनि-इत्यस्य विशेषणमिदं सप्तम्यन्तम्। तद्-इति रामस्य वाचकं सर्वनामपदम् अस्मिन् पद्ये। भक्तिः नाम श्रद्धा, एकनिष्ठा, आदरातिशयः वा। अपोढः नाम परिहृतः, तिरस्कृतः, उपेक्षितः वा। अभिषेकः नाम राजपदवी-प्रतिष्ठापकः संस्कारविशेषः, राज्याधिकार-प्रतीकं धार्मिकम् अनुष्ठानं वा। रामैकनिष्ठा-तिरस्कृत-पितृराज्यमहालाभे इत्यर्थः। रामभक्तिवशात् भरतः राजपदमपि तिरस्कृतवान् इत्याशयः। (तादृशस्य) मूर्धनि = मस्तके, शिरसि, मौलौ इति। च। उपजघ्रौ = उपाजिघ्रत्, उपघ्रातवान्। स्नेहप्रतीकम् इदम् आघ्राणं भवति खलु, रामः भरतस्य मस्तके तदेव कृतवान् इति।

अत्र परिकरोऽलङ्कारः। वसन्ततिलका छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

परि + अश्रुः = पर्यश्रुः - स्वरसन्धि, यण्।

पर्यश्रुः + अस्वजत = पर्यश्रुरस्वजत - विसर्गसन्धिः, रुत्वम्।

च + उपजघ्रौ = चोपजघ्रौ - स्वरसन्धिः, गुणः।

**समास-परिचयः-**

इक्ष्वाकुवंशगुरवे = इक्ष्वाकुवंशस्य गुरवे इति षष्ठीतत्पुरुषः।

अर्घ्यपरिग्रहान्ते - अर्घ्य-परिग्रहस्य अन्ते इति षष्ठीतत्पुरुषः।

पर्यश्रुः- परिगतानि अश्रूणि यस्य सः इति बहुव्रीहिः।

तद्भक्त्यपोढ-पितृराज्यमहाभिषेके - तद्भक्त्या अपोढः पितृराज्यमहाभिषेकः येन सः, तस्मिन् इति - बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रयतः - प्र + यम् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

प्रणम्य - प्र + नम् धातुः + ल्यप् - अव्ययप्रत्ययः।

अपोढः - अप + वह् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

अस्वजत - स्वज् धातुः + लङ् - प्र. पु. ए. व.।

उपजघ्रौ - उप + घ्रा-धातुः + लिट् - प्र. पु. ए. व.।

**प्रसङ्गः-** मन्त्रिगणान् प्रति रामस्य सौम्य-व्यवहारः वर्ण्यते यत्-

**श्मश्रु-प्रवृद्धिजनितानन-विक्रियांश्च,**
**प्लक्षान् प्ररोह-जटिलानिव मन्त्रिवृद्धान्।**
**अन्वग्रहीत् प्रणमतः शुभदृष्टिपातैः,**
**वार्तानुयोग-मधुराक्षरया च वाचा ॥ 71॥**

**अन्वयः-** श्मश्रु-प्रवृद्धि-जनित+आनन-विक्रियान् प्ररोह-जटिलान् प्लक्षान् इव प्रणमतः मन्त्रिवृद्धान् च, शुभदृष्टिपातैः, वार्त्त+अनुयोग-मधुर+अक्षरया वाचा च (रामः) अन्वग्रहीत्।

**व्याख्या-** श्मश्रु-प्रवृद्धि-जनितानन-विक्रियान् = श्मश्रूणां प्रवृद्धिः इति श्मश्रु-प्रवृद्धिः, श्मश्रुप्रवृद्ध्या जनिता आननेषु विक्रिया येषां ते श्मश्रु-प्रवृद्धि-जनितानन-विक्रियाः, तान् इति। श्मश्रु नाम मुख-रोमजालं, वदन-केश-जालं वा। प्रवृद्धिः नाम वर्धनम् अभिवृद्धिः वा। जनिता नाम प्रकटिता, उत्पादिता वा। आननं नाम मुखं

वदनं वा। विक्रिया नाम विकारः विकृतिः वा। मुख-रोम-वर्धन-प्रकटित-वदन-विकारान् इत्यर्थः। अर्थात् श्मश्रुकूर्चादीनाम् परिवर्धनात् तेषां (मन्त्रिणां) मुखेषु विकृतिः इव दृश्यते स्म। तादृशान् इति। तेषाम् उपमां प्रस्तौति यत्-

प्ररोहजटिलान् प्लक्षान् इव इति। प्ररोहैः जटिलाः इति प्ररोह-जटिला, तान् इति। प्ररोहः नाम शाखावलम्बितम् अधोमुखं मूलम्, यथा वटवृक्षस्य इति। जटिलः नाम जटायुक्तः, जटावान् वा। लम्बमान-मूल-जटायुक्तान् इत्यर्थः। प्लक्षान् = न्यग्रोधवृक्षान्, वटवृक्षान् इति। तान् इव। अर्थात् यथा लम्बमान-मूल-जटायुक्ताः वटवृक्षाः दृश्यन्ते, तथैव श्मश्रुपूरित-मुखाः ते वृद्धाः मन्त्रिगणाः अपि दृश्यन्ते स्म इति। तादृशान् इति। किं कुर्वतः? इत्याह-प्रणमतः अर्थात् प्रणामं कुर्वतः, नमस्कुर्वतः, अभिवादनं कुर्वतः इति। मन्त्रिवृद्धान् = अमात्यवृद्धान्, वृद्धसचिवान्। शुभदृष्टिपातैः = सौम्यदर्शनैः, कृपादृष्ट्या, अनुकम्पा-दृष्ट्या इति। वार्त्तस्य अनुयोगेन मधुराणि अक्षराणि यस्यां सा-वार्त्तानुयोग-मधुराक्षरा, तया इति। वाचः विशेषणमिदं तृतीयान्तम्। वार्त्तम् नाम कुशलं, कुशलक्षेमः वा। अनुयोगः नाम सम्प्रश्नः, जिज्ञासा वा। मधुरं नाम माधुर्ययुक्तं कोमलं वा। अक्षराणि नाम वर्णाः। कुशलक्षेम-प्रश्न-कोमल-वर्णया, कुशलक्षेम-जिज्ञासा-मृदु-पदया इत्यर्थः। वाचा = वाण्या, गिरा, वचनैः इत्यर्थः। रामः। अन्वग्रहीत् = अनुगृहीतवान्, अनुग्रहं दर्शितवान्। मन्त्रिणः रामं प्रणमन्ति स्म, रामः च तान् आत्मीयभावनया कृतार्थयति स्म इत्याशयः।

मन्त्रिवृद्धानां वटवृक्ष-साम्यवर्णनात् अत्र उपमा अलङ्कारः। वसन्ततिलका छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

जनित + आननम् = जनिताननम् - स्वरसन्धिः, सवर्णदीर्घः।

अनु + अग्रहीत् = अन्वग्रहीत् - स्वरसन्धिः, यण्।

वार्त्त + अनुयोगः = वार्त्तानुयोगः = स्वरसन्धिः, सवर्णदीर्घः।

मधुर + अक्षरा = मधुराक्षरा - स्वरसन्धिः, सवर्णदीर्घः।

आननविक्रियान् + च = आननविक्रियांश्च - व्यञ्जनसन्धिः, नकार- रुत्वम् सत्वं, श्चुत्वं च।

**समास-परिचयः-**

श्मश्रु-प्रवृद्धि-जनितानन-विक्रियान्-

(i) श्मश्रूणां प्रवृद्धिः इति श्मश्रुप्रवृद्धिः- षष्ठीतत्पुरुषः।

(ii) आनने विक्रिया इति आननविक्रिया - सप्तमीतत्पुरुषः।

(iii) श्मश्रुप्रवृद्ध्या जनिता आननविक्रिया यस्य सः- श्मश्रुप्रवृद्धिजनिताननविक्रियः, तान् इति-बहुव्रीहिः।

प्ररोह-जटिलान् - प्ररोहैः जटि लः इति प्ररोहजटिलः, तान् इति-षष्ठीतत्पुरुषः।

शुभदृष्टिपातैः- शुभः च असौ दृष्टिपातः इति शुभदृष्टिपातः, तैः इति - कर्मधारयः।

वार्त्तानुयोग-मधुराक्षरया -

(i) वार्त्तस्य अनुयोगः इति वार्त्तानुयोगः - षष्ठीतत्पुरुषः।

(ii) मधुराणि च तानि अक्षराणि इति मधुराक्षराणि - कर्मधारयः।

(iii) वार्त्तानुयोगेन मधुराणि अक्षराणि यस्यां सा- वार्त्तानुयोग-मधुराक्षरा, तया इति - बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रवृद्धिः - प्र + वृध् धातुः + क्तिन् प्रत्ययः- स्त्री. प्र. ए. व.।

जनिता - जन् धातु (णिजन्तः) + क्त प्रत्ययः + टाप् - स्त्री. प्र. ए. व.।

प्रणमतः - प्र + नम् धातुः + शतृ प्रत्ययः पुं. द्वि. ए. व.।

दृष्टिः - दृश् धातुः + क्तिन् प्रत्ययः -स्त्री. प्र. ए. व.।

पातः - पत् धातुः घञ् + प्रत्ययः - पुं. प्र. ए. व.।

अन्वग्रहीत् - अनु + ग्रह धातुः + लङ् - प्र . पु. ए. व.।

**प्रसङ्गः**- सुग्रीवं प्रति विभीषणं प्रति च भरतस्य अभिवादनं वर्ण्यते यत्-

**दुर्जातबन्धुरयमृक्षहरीश्वरो मे,**
**पौलस्त्य एष समरेषु पुरः प्रहर्त्ता।**
**इत्यादृतेन कथितौ रघुनन्दनेन,**
**व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ 72 ॥**

**अन्वयः**- अयम् मे दुर्जात-बन्धुः ऋक्ष-हरि + ईश्वरः (सुग्रीवः) एषः (च) समरेषु पुरः प्रहर्त्ता पौलस्त्यः (विभीषणः) - इति आदृतेन रघुनन्देन कथितौ उभौ (सुग्रीव-विभीषणौ), लक्ष्मणम् व्युत्क्रम्य भरतः ववन्दे।

**व्याख्या**- अयम् = एषः। मे = मम, रामस्य। दुर्जात- बन्धुः = आपद्-बन्धुः, आपन्मित्रम्। विपत्तिकाले मैत्रीं प्राप्तः इत्यर्थः। दुर्जातं नाम व्यसनम् आपत् सङ्कटं वा। सङ्कटकाले अयम् अस्मत्साहाय्यं कृतवान् इत्याशयः। ऋक्षाणां हरीणां च ईश्वरः इति ऋक्षहरीश्वरः। ऋक्षः नाम भल्लूकः। हरिः नाम वानरः, कपिः। हरिशब्दः अनेकार्थकः अपि अत्र प्रसङ्गवशात् वानरार्थे प्रयुक्तः। ऋक्षहरीश्वरः अर्थात् सुग्रीवः। परिचयात्मकं वचनमिदम्। एषः (च) = अयं च, विभीषणः इति। समरेषु = युद्धेषु, सङ्ग्रामेषु। पुरःप्रहर्त्ता = अग्रेसर-योद्धा, अग्रयोद्धा इति। न तु पृष्ठे स्थितः इत्याशयः। पौलस्त्यः = पौलस्त्यवंशजः, महर्षे पुलस्तेः वंशजः, पौलस्त्य-कुलोत्पन्नः। विभीषणः इत्यर्थः। इति = एवम्, इत्थम्, अनेन प्रकारेण। आदृतेन = आदरयुक्तेन, आदरवता। आदरपूर्वकम् इत्यर्थः। रघुनन्दनेन = रघुवंशजेन, रामेण। कथितौ = उक्तौ, निवेदितौ, दत्तपरिचयौ, प्रस्तुत-परिचयौ सुग्रीव-विभीषणौ इति। उभौ - द्वौ अपि। भरतः ववन्दे इति। किं कृत्वा? इत्याह-

लक्ष्मणम् = सौमित्रिम्, सुमित्रानन्दनम्। व्युत्क्रम्य = उल्लङ्घ्य, व्यतिक्रम्य। क्रमशः तु लक्ष्मणस्य एव मिलनम् अभीष्टं, परन्तु सुग्रीव-विभीषणौ प्रति आदराऽतिशयं दर्शयितुं लक्ष्मणस्य व्युत्क्रमणं कृतं भरतेन इत्याशयः। एवं लक्ष्मणं व्युत्क्रम्य भरतः = कैकेयीनन्दनः। ववन्दे = वन्दितवान्, अवन्दत। सुग्रीवं विभीषणं च नमस्कृतवान् इत्यर्थः।

'दुर्जातबन्धुः' पुरःप्रहर्त्ता च- इति विशेषणपदयोः अभिप्रायविशेषप्रकटनात् परिकरः अलङ्कारः। वसन्तलिका छन्दः।

## व्युत्पत्ति-प्रदर्शनम्

**सन्धि-परिचयः-**

बन्धुः + अयम् = बन्धुरयम् - विसर्गसन्धिः, रुत्वम्।

हरि + ईश्वरः = हरीश्वरः - स्वरसन्धिः, सवर्णदीर्घः।

पौलस्त्यः + एषः = पौलस्त्य एषः –विसर्गसन्धिः, विसर्गलोपः।

इति + आदृतेन = इत्यादृतेन – स्वरसन्धिः, यण्।

वि + उत्क्रम्य = व्युत्क्रम्य – स्वरसन्धिः, यण्।

वि + उत्क्रम्य = व्युत्क्रम्य – स्वरसन्धिः, यण्।

भरतः + ववन्दे = भरतो ववन्दे – विसर्गसन्धिः, उत्वम्।

**समास-परिचयः-**

दुर्जातबन्धुः- दुर्जातेषु बन्धुः इति सप्तमीतत्पुरुषः।

ऋक्षहरीश्वरः =

(i) ऋक्षाः च हरयः च इति ऋक्षहरयः – द्वन्द्वः।

(ii) ऋक्षहरीणाम् ईश्वरः इति ऋक्षहरीश्वरः – षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रहर्त्ता – प्र + हृ धातुः + तृच् प्रत्ययः – पुं. प्र. ए. व.।

आदृतेन – आङ् दृ धातुः + क्तप्रत्ययः (कर्त्तरि) – पुं. तृ. ए. व.।

कथितौ – कथ् धातुः + क्तप्रत्ययः – पुं. द्वि. द्वि. व.।

व्युत्क्रम्य – वि + उत् + क्रम् धातुः + ल्यप् – अव्ययप्रत्ययः।

ववन्दे – वन्द् धातुः + लिट् – प्र. पु. ए. व.।

**प्रसङ्गः**- भरत-लक्ष्मणयोः स्नेहार्द्र-मिलनं वर्ण्यते यत्-

**सौमित्रिणा तदनु संससृजे स चैनम्,**
**उत्थाप्य नम्रशिरसं भृशमालिलिङ्ग।**
**रूढेन्द्रजित्प्रहरणव्रणकर्कशेन,**
**क्लिश्यन्निवास्य भुजमध्यमुरःस्थलेन ॥ 73 ॥**

**अन्वयः**- तदनु सः (भरतः) सौमित्रिणा संससृजे। नम्रशिरसम् एनम् उत्थाप्य च, अस्य रूढ+इन्द्रजित्-प्रहरण-व्रण-कर्कशेन उरःस्थलेन क्लिश्यन् इव (भरतः) भुजमध्यम् भृशम् आलिलिङ्ग।

**व्याख्या**- तदनु = ततः, तदनन्तरम्। सुग्रीव-विभीषण-वन्दनाऽनन्तरम् इत्यर्थः। सः भरतः। सौमित्रिणा = लक्ष्मणेन, सुमित्रा-नन्दनेन। संससृजे = सङ्गतः, मिलितः इति। नम्र-शिरसम् = नम्रं शिरः यस्य सः नम्रशिराः, तम् इति। नतमस्तकम्, प्रणतम् इत्यर्थः। एनम् = एतम्, इमम्, लक्ष्मणम् इति। उत्थाप्य च = उन्नमय्य च। प्रणतं लक्ष्मणं हस्तयोः गृहीत्वा इत्यर्थः। अस्य = लक्ष्मणस्य। रूढेन्द्रजित्-प्रहरण-व्रण-कर्कशेन = मेघनादाऽस्त्र कृतव्रण-कठोरेण इति। 'उरःस्थलस्य ' विशेषणमिदं तृतीयान्तम्। इन्द्रजितः प्रहरणम् इति इन्द्रजित्प्रहरणम्, इन्द्रजित्-प्रहरणेन व्रणम् इति इन्द्रजित्प्रहरणव्रणम्, रूढं च तत् इन्द्रजित्प्रहरणव्रणम् रूढेन्द्रजित्प्रहरणव्रणम्, रूढेन्द्रजित्प्रहरणव्रणैः कर्कशम् इति रूढेन्द्रजित्प्रहरणव्रणकर्कशम्, तेन इति रूढेन्द्रजित्प्रहरण-व्रण-कर्कशेन। इन्द्रजित् नाम मेघनादः, रावणपुत्रः। प्रहरणं नाम अस्त्रं, प्रहारकरणं वा। शक्तिनामकम् अस्त्रम् इति आशयः।

व्रणम् नाम क्षतम्। आहतिः, आघातः वा इत्यर्थः। रूढं नाम उत्पन्नम्, उद्भूतं, सञ्जातं वा। कर्कशं नाम कठोरम् अकोमलं, परुषं वा। रावणपुत्र-प्रहार-जन्याघात-परुषेण, मेघनादकृतप्रहारजन्य-क्षत-कठोरेण इत्यर्थः। युद्धे हि मेघनादः शक्तिनाम्ना अस्त्रेण लक्ष्मणं प्राहरत्, तेन प्रहारेण लक्ष्मणस्य वक्षःस्थले व्रणम् उत्पन्नम्, तेन व्रणेन च तद् वक्षःस्थलं कर्कशम् अभूत्-कठोरम् अभूत् इति आशयः। तादृशेन-उरःस्थलेन = वक्षःस्थलेन, वक्षसा।

क्लिश्यन् इव = क्लेशम् अनुभवन् इव, पीडाम् अनुभवन् इव। 'हन्त! अयं मम अनुजः लक्ष्मणः युद्धे कष्टप्रदम् आघातम् असहत -'इति दुःखेन क्लेशम् इत्याशयः। भुजमध्यम् = भुजयोः मध्ये बाहुयुगलमध्ये। भृशम् = अत्यधिकम्, अतितराम्, प्रकामम्। आलिलिङ्ग = आलिङ्गितवान्, आलिङ्गनं कृतवान्, उपगूहितवान् इति। अतिमात्रं स्नेहं प्रकटितवान् इत्याशयः।

स्नेहभरिते आलिङ्गने 'क्लिश्यन्निव' इति कल्पनायाः वर्णनात् उत्प्रेक्षा। वसन्ततिलका छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

तत् + अनु = तदनु - व्यञ्जनसन्धिः, जश्त्वम्।

च + एनम् = चैनम् - स्वरसन्धिः, वृद्धिः।

सः + चैनम् = स चैनम् - विसर्गसन्धिः, वृद्धिः।

रूढ + इन्द्रजित् = रूढेन्द्रजित् - स्वरसन्धिः, गुणः।

क्लिश्यन् + इव = क्लिश्यन्निव - व्यञ्जनसन्धिः, नकारद्वित्वम् (ङमुट्)।

इव + अस्य = इवास्य -स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

नम्रशिरसम् = नम्रं शिरः यस्य सः नम्रशिराः, तम्, इति- बहुव्रीहिः।

भुजमध्यम् - भुजयोः मध्यम् इति षष्ठीतत्पुरुषः।

रूढेन्द्रजित्प्रहरणेन व्रणम् इति इन्द्रजित्प्रहरणव्रणम् इति तृतीयातत्पुरुषः।

रूढं च तत् इन्द्रजित्प्रहरणव्रणम् इति रूढेन्द्रजित्प्रहरणव्रणम् इति कर्मधारयः।

रूढेन्द्रजित्प्रहरणव्रणैः कर्कशम् इति-रूढेन्द्रजित्प्रहरणव्रणकर्कशम्, तेन इति तृतीयातत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

रूढम् - रुह् धातुः + क्तप्रत्ययः - नपुं. प्र. ए. व.।

क्लिश्यन् - क्लिश् धातुः + शतृ प्रत्ययः - पुं. प्र. ए. व.।

उत्थाप्य - उत् + स्था (णिजन्तः) + ल्यप् - अव्ययप्रत्ययः।

संससृजे - सम् + सृज् धातुः (कर्मणि)+ लिट् - प्र. पु. ए. व.।

आलिलिङ्ग - आङ् + लिगि धातुः + लिट् - प्र. पु. ए. व.।

**प्रसङ्गः**- अथ वानर-सेनापतीनां गजारोहणं वर्ण्यते यत्-

**रामाज्ञया हरिचमूपतयस्तदानीम्,**
**कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान्।**
**तेषु क्षरत्सु बहुधा मद-वारि-धाराः,**
**शैलाधिरोहणसुखान्युपलेभिरे त ॥ 74 ॥**

**अन्वयः**- तदानीम् राम+आज्ञया हरि-चमूपतयः मनुष्य-वपुः कृत्वा गजेन्द्रान्आरुरुहुः। बहुधा मद-वारि धाराः क्षरत्सु तेषु ते शैल+अधिरोहण-सुखानि उपलेभिरे।

**व्याख्या**- तदानीम् = ततः, तत्पश्चात्, तदनन्तरम्। रामाज्ञया = रामस्य आदेशेन, रामस्य अनुमत्या। हरिचमूपतयः = वानर-सेनापतयः, कपिसैन्यपतयः। मनुष्य-वपुः = मानव-शरीरम्, मानव-देहम्। कृत्वा = विधाय, धृत्वा। गजेन्द्रान् = गजराजान्, हस्तिनः। आरुरुहुः = आरोहन्, आरूढवन्तः। श्रीरामस्य अनुमतिं प्राप्य गजारोहणं कृतवन्तः इत्यर्थः। तत्र कीदृशम् आनन्दं प्राप्तवन्तः? इत्याह-

बहुधा = अत्यधिकम्, अतितराम्। मदवारिधाराः = मदजलधाराः, मदजलस्रावम्। क्षरत्सु = वहत्सु, स्रवत्सु, मुञ्चत्सु, वर्षत्सु इति। तेषु = गजेन्द्रेषु इति। ते = वानर-सेनापतयः। शैलाधिरोहण-सुखानि = पर्वतारोहण-सुखानि। शैलस्य अधिरोहणमिति शैलाधिरोहणम्, शैलाधिरोहणस्य सुखम् इति शैलाधिरोहणसुखं, तानि इति। शैलः नाम पर्वतः, गिरिः, अद्रिः वा। अधिरोहणं नाम आरोहणम्। सुखं नाम सौख्यम्, आनन्दः, आह्लादः वा। पर्वतारोहणानन्दम् इत्यर्थः। उपलेभिरे = प्राप्तवन्तः, लब्धवन्तः, अलभन्त इति। पर्वतेषु यथा निर्झर-जलधाराः वहन्ति तथैव गजानां मदजल-धाराः वहन्ति स्म। विशालाकारत्वात् च गजाः पर्वताः इव प्रतीयन्ते स्म इत्याशयः।

अत्र काव्यलिङ्गम् अलङ्कारः उपमागृभतः । छन्दश्च वसन्ततिलका।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

राम + आज्ञया = रामाज्ञया - स्वरसन्धिः, सवर्णदीर्घः।

चमूपतयः + तदानीम् = चमूपतयस्तदानीम् - विसर्गसन्धिः, सत्वम्।

वपुः + आरुरुहुः = वपुरारुरुहुः - विसर्गसन्धिः, रुत्वम्।

आरुरुहुः + गजेन्द्रान् = आरुरुहुर्गजेन्द्रान् - विसर्गसन्धिः, रुत्वम्।

गज + इन्द्रः = गजेन्द्रः - स्वरसन्धिः, गुणः।

सुखानि + उपलेभिरे = सुखान्युपलेभिरे - स्वरसन्धिः, यण्।

**समास-परिचयः**-

रामाज्ञया -रामस्य आज्ञया इति षष्ठीतत्पुरुषः।

मनुष्यवपुः - मनुष्यस्य वपुः इति षष्ठीतत्पुरुषः।

मदवारिधाराः - मदवारिणः धाराः इति षष्ठीतत्पुरुषः।

शैलाधिरोहणसुखानि –

(i) शैलस्य अधिरोहणम् इति षष्ठीतत्पुरुषः।

(ii) शैलाधिरोहणस्य सुखानि षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

कृत्वा – कृ धातुः + क्त्वा – अव्ययप्रत्ययः।

क्षरत्सु – क्षर् धातुः + शतृ प्रत्ययः – पुं. स. ब. व.।

आरुरुहुः – आङ् + रुह् धातुः + लिट् – प्र. पु. ब. व.।

उपलेभिरे – उप + लभ् धातुः + लिट् – प्र. पु. ब. व.।

**प्रसङ्गः-** विभीषणादीनामपि रथारोहणं वर्ण्यते यत्-

**सानुप्लवः प्रभुरपि क्षणदाचराणाम्,**
**भेजे रथान् दशरथप्रभवानुशिष्टः।**
**मायाविकल्परचितैरपि ये तदीयैः,**
**न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥ 75 ॥**

**अन्वयः**-सानुप्लवः क्षणदाचराणाम् प्रभुः अपि, दशरथ-प्रभव+अनुशिष्टः रथान् भेजे। ये (रथाः) तदीयैः माया-विकल्प-रचितैः अपि स्यन्दनैः तुलित-कृत्रिमभक्ति-शोभाः न (आसन्)।

**व्याख्या-** अनुप्लवैः सह इति सानुप्लवः। विभीषणस्य विशेषणमिदं प्रथमान्तम्। अनुप्लवः नाम अनुचरः, अनुसरः, सहायः वा। अनुचर-सहितः इत्यर्थः। क्षणदाचराणाम् = निशाचराणां, रजनीचराणां, राक्षसानाम्। प्रभुः = राक्षसाधिपतिः विभीषणः अपि इति। दशरथ-प्रभवानुशिष्टः = रामेण आदिष्टः, रामेण आज्ञप्तः इति। दशरथः प्रभवः (पिता) यस्य इति दशरथप्रभवः-रामः। तेन दशरथप्रभवेण अनुशिष्टः इति दशरथप्रभवानुशिष्टः। अर्थात् रामस्य आज्ञां प्राप्य राक्षसराजः विभीषणः अपि। रथान् = स्यन्दनान्, विहार-यानानि। भेजे = अभजत। आरूढवान् इत्यर्थः। ये = रथाः इति। तदीयैः = तस्य, विभीषणस्य इति। मायाविकल्प-रचितैः = माया-विशेष-निर्मितैः, सङ्कल्पविशेष-विरचितैः। अपि = इदं तुलना-प्रयोजनं पदम् अत्र। तुलित-कृत्रिम-भक्ति-शोभाः = समान-क्रिया-विन्यासाः, समान-रचना-सौन्दर्ययुक्ताः। न आसन् इति। राक्षसानां रथाः मायाद्वारा विरचिताः भवन्ति अतः तेषां रचना-विन्यासः निर्माण-सौन्दर्यं वा अद्वितीयं भवति, परन्तु अयोध्यायाः रथानां सम्मुखे तेऽपि (मायानिर्मिताः रथाः) निष्प्रभाः आसन् इत्याशयः। विभीषणः तादृशान् रथान् आरूढवान् अनुचरसहितः।

अत्र उदात्तः अलङ्कारः। वसन्ततिलका च छन्दः।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

प्रभुः + अपि = प्रभुरपि – विसर्गसन्धिः, रुत्वम्।

प्रभव + अनुशिष्टः = प्रभवानुशिष्टः – स्वरसन्धिः, सवर्णदीर्घः।

रचितैः + अपि = रचितैरपि – विसर्गसन्धिः, रुत्वम्।

स्यन्दनैः + तुलिता = स्यन्दनैस्तुलिता- विसर्गसन्धिः, सत्वम्।

**समास-परिचयः-**

सानुप्लवः - अनुप्लवैः सह इति- बहुव्रीहिः।

क्षणदाचरणाम् - क्षणदायां (रात्रौ) चरति इति क्षणदाचरः, तेषामिति-उपपदतत्पुरुषः।

दशरथप्रभवाऽनुशिष्टः - दशरथप्रभवेण अनुशिष्टः इति तृतीयातत्पुरुषः।

मायाविकल्परचितैः - मायायाः विकल्पैः रचितः इति मायाविकल्परचितः, तैः इति तृतीया तत्पुरुषः।

तुलितकृत्रिम-भक्ति-शोभाः- तुलिता कृत्रिमभक्तीनां (क्रिया-विन्यासानां)- शोभा यस्य सः तुलितकृत्रिम-भक्तिशोभः, ते इति - बहुव्रीहिः।

**प्रकृति-प्रत्ययादि-परिचयः-**

अनुशिष्टः - अनु + शास् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

रचितै - रच् धातुः + क्तप्रत्ययः - पुं. तृ. ब. व.।

तुलिता - तुल् धातुः + क्तप्रत्ययः + टाप्-स्त्री. प्र. ए. व.।

कृत्रिमम् - कृधातुः + क्त्रि-प्रत्ययः + मप् आगमः - नपुं. प्र. ए. व.।

भक्तिः - भज् धातुः + क्तिन् प्रत्ययः - स्त्री. प्र. ए. व.।

भेजे - भज् धातुः (आत्मने)+ लिट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- भरत-लक्ष्मण-सहितस्य रामस्य पुनः पुष्पकारोहणं वर्ण्यते यत्-

**भूयस्ततो रघुपतिर्विलसत्पताकम्,**
**अध्यास्त कामगति सावरजो विमानम्।**
**दोषातनं बुध-बृहस्पति-योगदृश्यः,**
**तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ 76 ॥**

**अन्वयः**- ततः सावरजः रघुपतिः विलसत्पताकम्, कामगति, विमानम् भूयः (अध्यास्त), बुध-बृहस्पति-योगदृश्यः तारापतिः दोषातनम् तरल-विद्युत् अभ्र-वृन्दम् इव अध्यास्त।

**व्याख्या**- ततः = तदनन्तरम्, तदनु, तत्पश्चात्। अवरजाभ्यां सह इति सावरजः। अवरजः नाम अनुजः। ताभ्यां भरतलक्ष्मणाभ्यां सहितः इत्यर्थः। रघुपतिः = श्रीरामः। विलसत्पताकम् = शोभमान-ध्वजम्, पताका-सुशोभितम् इति। विमानस्य विशेषणम् इदम्। कामगति = इच्छागति, यथेष्ट-गमनप्रवृत्ति इति। इच्छामात्रेण (रामस्य) विमानं सञ्चलति स्म अत एव कामगति इति विशेषणम्। विमानम् = वायुयानम्, पुष्पकम् इति। भूयः = पुनः, मुहुः। अध्यास्त = अधिष्ठितवान्, अधिरूढवान् इत्यर्थः। भरतेन लक्ष्मणेन च सह पुनः विमानम् आरोहत् इत्याशयः। कीदृशः? इत्यत्र उपमाद्वारा आह यत्।

बुध-बृहस्पतिभ्यां संसर्गेण दर्शनयोग्यः (रमणीयः इत्याशयः)। तारापतिः = नक्षत्रपतिः, चन्द्रमाः, चन्द्रः। दोषातनम् = सन्ध्याकालीनम्, सायन्तनम्, सायङ्कालीनम् इति। तरल-विद्युत् = चञ्चलविद्युद्-युक्तम्, चञ्चलतडित्सम्पृक्तम्, चञ्चल-सौदामिनी-युक्तम्। अभ्रवृन्दस्य विशेषणमिदं द्वितीयान्तम्। अभ्र-वृन्दम्

= मेघसमूहम्, घन-समूहम्, जलधर-वृन्दम्। इव = उपमार्थकं पदमिदम्। अध्यास्त = अधिष्ठितवान्, विराजितवान् इति। उपमा-कारणात् 'अध्यास्त' इति क्रियापदम् उभयत्र अन्वितम् (प्रयुक्तम्) इति।

अत्र चन्द्रेण सह रामस्य, बुध-बृहस्पतिभ्यां भरत-लक्ष्मणयोः, विद्युता पताकायाः, अभ्रवृन्देन च विमानस्य उपमा-निरूपणं कृतं महाकविना। अतः पूर्णोपमा अलङ्कारः। छन्दस्तु वसन्ततिलका इति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

भूयः + ततः = भूयस्ततः - विसर्गसन्धिः, सत्वम्।

ततः + रघुपतिः = ततो रघुपतिः - विसर्गसन्धिः, उत्वम्।

रघुपतिः + विलसत्पताकम् = रघुपतिर्विलसत्पताकम् - विसर्गसन्धिः, रुत्वम्।

तारापतिः + तरलविद्युत् = तारापतिस्तरलविद्युत् - विसर्गसन्धिः, सत्वम्।

इव + अभ्रवृन्दम् = इवाभ्रवृन्दम् - स्वरसन्धिः, सवर्णदीर्घः।

**समास-परिचयः-**

विलसत्पताकम् - विलसन्ती पताका यस्मिन् इति तत् - बहुव्रीहिः।

कामगति -कामेन गतिः यस्य इति तत् - बहुव्रीहिः।

सावरजः - अवरजाभ्यां सह इति - बहुव्रीहिः।

बुधबृहस्पतियोगदृश्यः-

(i) बुधबृहस्पतिभ्यां योगः इति बुधबृहस्पतियोगः - इति तृतीयातत्पुरुषः।

(ii) बुधबृहस्पतियोगेन दृश्यः इति तृतीया-तत्पुरुषः।

तरल-विद्युत् - तरला विद्युत् यस्मिन् इति तत्- बहुव्रीहिः।

अभ्रवृन्दम् - अभ्राणां वृन्दम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

विलसन्ती - वि + लस् धातुः + शतृ प्रत्ययः + ङीप् - प्र. ए. व.।

योगः - युज् धातुः + घञ् प्रत्ययः - पुं. प्र. ए. व.।

दृश्यः - दृश् धातुः + क्यप् प्रत्ययः - पुं. प्र. ए. व.।

अध्यास्त - अधि + आस् धातुः (आत्मने)+ लङ् - प्र. पु. ए. व.।

**प्रसङ्गः**- विमान-मध्ये सीतां प्रति भरतस्य अभिवादनं वर्ण्यते यत्-

**तत्रेश्वरेण जगतां प्रलयादिवोर्वीम्,**
**वर्षात्ययेन रुचमभ्रघनादिवेन्दोः।**
**रामेण मैथिलसुतां दशकण्ठ-कृच्छ्रात्,**
**प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ 77 ॥**

**अन्वयः**- तत्र (विमाने) जगताम् ईश्वरेण प्रलयात् (उद्धृताम्) उर्वीम्, इव, वर्षा+अत्ययेन अभ्रघनात् (उद्धृताम्) इन्दोः रुचम् इव, रामेण दश-कण्ठ-कृच्छ्रात् प्रत्युद्धृताम् धृतिमतीम् मैथिल-सुताम् भरतः ववन्दे।

**व्याख्या**- तत्र = विमाने, पुष्पक-विमानमध्ये इति। जगताम् ईश्वरेण = जगदीश्वरेण, श्रीविष्णुना, आदिवराहेण (अवतार-रूपेण) इत्यर्थः। प्रलयात् = महाविनाशात्, परिसञ्चरात्। प्रलयकालमुखात् इत्यर्थः। (उद्धृताम् = रक्षिताम्)। उर्वीम् इव = पृथिवीम् इव, धरणीम् इव। वर्षात्ययेन = शरदागमेन, शरदारम्भेण इति। अभ्रघनात् = मेघसमूहात्, मेघसङ्घात् । इन्दोः = चन्द्रमसः, चन्द्रस्य। रुचम् इव = कान्तिम् इव, चन्द्रिकाम् इव, ज्योत्स्नाम् इव। रामेण = दशरथनन्दनेन, दाशरथिना। दशकण्ठ-कृच्छ्रात् = दशानन-सङ्कटात्, रावणकष्टात्, रावणत्रासात् इति। प्रत्युद्धृताम् = परिरक्षिताम्, परित्राताम्, उन्मोचिताम्, स्वतन्त्रीकृताम् इति। धृतिमतीम् = धैर्यवतीम्, धैर्यशालिनीम्, धीरस्वभावाम्। मैथिलसुताम् = मैथिलीम्, जानकीम्, सीताम्। भरतः = कैकेयीनन्दनः। ववन्दे = अवन्दत, प्रणतवान्। प्रणामं कृतवान् इत्यर्थः।

अत्र उपमा-युगलं महाकविना निबद्धं, यथा आदिवराहरूपः, श्रीविष्णुः प्रलयात् पृथिवीम् उद्धृतवान्, यथा शरत्प्रारम्भकालः मेघसमूहात् चन्द्रकान्तिम् उद्धरति (रक्षति), तथैव रामः रावण-बन्धनात् सीताम् उद्धृतवान् आसीत्। तादृशीं सीतां भरतः अवन्दत इति सरल-स्पष्टः अर्थः। अनेकोपमा (अनेक-उपमा)-निबन्धनात् अत्र मालोपमा अलङ्कारः। छन्दस्तु वसन्ततिलका इति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

तत्र + ईश्वरेण = तत्रेश्वरेण - स्वरसन्धिः, गुणः।

प्रलयात् + इव = प्रलयादिव - व्यञ्जनसन्धिः, जश्त्वम्।

इव + उर्वीम् = इवोर्वीम् - स्वरसन्धिः, गुणः।

वर्षा + अत्ययेन = वर्षात्ययेन - स्वरसन्धिः, सवर्णदीर्घः।

अभ्रघनात् + इव = अभ्रघनादिव - व्यञ्जनसन्धिः, जश्त्वम्।

इव + इन्दोः =इवेन्दोः - स्वरसन्धिः, गुणः।

प्रति + उद्धृताम् = प्रत्युद्धृताम् - स्वरसन्धिः, यण्।

भरतः + ववन्दे = भरतो ववन्दे - विसर्गसन्धिः, उत्वम्।

**समास-परिचयः**-

वर्षात्ययेन - वर्षाणाम् अत्ययः इति वर्षात्ययः, तेन इति- षष्ठीतत्पुरुषः।

अभ्रघनात् - अभ्राणां घनात् इति षष्ठीतत्पुरुषः।

मैथिलसुताम् - मैथिलस्य सुता इति मैथिलसुता, ताम् इति - षष्ठीतत्पुरुषः।

दशकण्ठ-कृच्छ्रात् - दशकण्ठात् कृच्छ्रम् इति दशकण्ठकृच्छ्रम्, तस्मात् इति-पञ्चमीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः**-

धृतिमतीम्- धृति + मतुप् (तद्धितः) + ङीप् - स्त्री. द्वि. ए. व.।

प्रत्युद्धृताम् - प्रति + उत् + धृ धातुः + क्तप्रत्ययः टाप् - स्त्री. द्वि. ए. व.।

ववन्दे - वन्द् धातुः + लिट् लकारः - प्र. पु. ए. व.।

**प्रसङ्गः**- सीता-चरणयोः भरत-मस्तकस्य च विशिष्टपुण्यं वर्ण्यते यत्-

**लङ्केश्वर-प्रणति-भङ्ग-दृढव्रतं तद्,**
**वन्द्यं युगं चरणयोर्जनकात्मजायाः।**
**ज्येष्ठानुवृत्ति-जटिलं च शिरोऽस्य साधोः,**
**अन्योन्य-पावनमभूदुभयं समेत्य ॥ 78 ॥**

**अन्वयः**- लङ्केश्वर-प्रणति-भङ्ग-दृढव्रतम् वन्द्यम् तत्-जनक+आत्मजायाः चरणयोः युगम्, अस्य (भरतस्य) साधोः ज्येष्ठ+अनुवृत्ति-जटिलम् शिरः च, (इति) उभयम् समेत्य अन्योन्य-पावनम् अभूत्।

**व्याख्या**- लङ्केश्वर-प्रणति-भङ्ग-दृढव्रतम् = लङ्केश्वरस्य प्रणतीनां भङ्गेन दृढं व्रतं यस्य इति तत्। चरणयुगस्य विशेषणमिदम्। रावणकृत-प्रणाम-भङ्ग-दृढसङ्कल्पम् इत्यर्थः। प्रणतिपदस्य अत्र लाक्षणिकः अर्थः ग्रहणीयः, अर्थात् लङ्केश्वरः रावणः सीतां लोभयितुम् अनेकानि प्रशंसावचनानि, स्तुतिवचनानि च आलपति स्म परन्तु सीता लेशमात्रम् अपि तैः वचनैः प्रभाविता न अभवत्, अपितु कटु-प्रत्युत्तरम् एव दत्तवती। अत्र अयम् एव भावः। अर्थात् येन चरणयुगेन रावणस्य प्रणयनिवेदनम् अपि विभञ्जितम्, तद् इति। जनकात्मजायाः = सीतायाः। चरणयोः = पादयोः, पदयोः, अङ्घ्र्योः। युगम् = युगलं, युग्मम्। पदयुगलम् इत्यर्थः। वन्द्यम् = वन्दनीयं, वन्दना-योग्यं, पूज्यम्।

अथ च-साधोः = सत्पुरुषस्य, महात्मनः। अस्य = भरतस्य। ज्येष्ठाऽनुवृत्ति-जटिलम् = ज्येष्ठस्य अनुवृत्तये जटिलम् इति। शिरसः विशेषणमिदं प्रथमान्तम्। ज्येष्ठः नाम ज्येष्ठ-भ्राता, अग्रजः, श्रीरामः-इत्यर्थः। अनुवृत्तिः नाम अनुसरणम्, अनुगमनम्, अनुवर्त्तनं वा। जटिलं नाम जटायुक्तम्। अग्रजाऽनुसरण-जटायुक्तम् इत्यर्थः। अनुकरणाय भरतः अपि तपस्वि-भावं प्राप्तः, राज्यं न स्वीकृतवान् अपितु जटाधरः अभवत्। मुकुटं विहाय जटाः धृतवान् शिरसि इति तादृशं शिरः।

उभयम् = द्वयम् अपि अर्थात् सीतायाः चरणयुगलं, प्रणमतः भरतस्य च शिरः इति एतत् द्वयम्। अन्योन्यपावनम् = परस्परपुण्यवर्धकम्, परस्पर-पुण्यकारकम्। अभूत् = अभवत्, सञ्जातम्।

अत्र परिकरः अलङ्कारः। वसन्ततिलका छन्दः इति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः**-

चरणयोः + जनकात्मजायाः = चरणयोर्जनकात्मजायाः - विसर्गसन्धिः, रुत्वम्।

जनक + आत्मजायाः = जनकात्मजायाः - स्वरसन्धिः, सवर्णदीर्घः।

शिरः + अस्य = शिरोऽस्य - विसर्गसन्धिः, उत्वम्।

अभूत् + उभयम् = अभूदुभयम् - व्यञ्जनसन्धिः, जश्त्वम्।

**समास-परिचयः-**

लङ्केश्वर-प्रणति-भङ्ग-दृढव्रतम् - लङ्केश्वरस्य प्रणतीनां भङ्गेन दृढं व्रतं यस्य तत्- इति बहुव्रीहिः।

ज्येष्ठानुवृत्तिजटिलम् - ज्येष्ठस्य अनुवृत्तये जटिलम् इति चतुर्थीतत्पुरुषः।

जनकात्मजायाः- जनकस्य आत्मजायाः इति- षष्ठीतत्पुरुषः।

अन्योन्यपावनम् - अन्योन्यस्य पावनम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

प्रणतिः - प्र + नम् धातुः + क्तिन् प्रत्ययः- स्त्री. प्र. ए. व.।

वन्द्यम् - वन्द् धातुः + ण्यत् प्रत्ययः - नपुं. प्र. ए. व.।

समेत्य - सम् + आ + इण् धातुः + ल्यप् प्रत्ययः - अव्ययप्रत्ययः।

अनुवृत्तिः - अनु + वृत् धातुः + क्तिन् प्रत्ययः- स्त्री. प्र. ए. व.।

**प्रसङ्गः**- अथ अयोध्यायाः उपवने रामस्य विश्रामार्थः अधिवासः वर्ण्यते यत् -

**क्रोशार्धं प्रकृतिपुरस्सरेण गत्वा,**
**काकुत्स्थः स्तिमित-जवेन पुष्पकेण।**
**शत्रुघ्नप्रतिविहितोपकार्यमार्यः,**
**साकेतोपवनमुदारमध्युवास ॥ 79 ॥**

**अन्वयः**- आर्यः काकुत्स्थः (रामः) प्रकृति-पुरस्सरेण, स्तिमित-जवेन, पुष्पकेण क्रोश+अर्धम् गत्वा, शत्रुघ्न-प्रतिविहित+उपकार्यम् उदारम् साकेत+उपवनम् अध्युवास।

**व्याख्या**- आर्यः = श्रेष्ठः, श्रीमान् इति। काकुत्स्थः = काकुत्स्थ-वंशजः, रामः इति। प्रकृति-पुरस्सरेण = प्रकृतयः पुरस्सराः यस्य इति तत् प्रकृतिपुरस्सरम्, तेन इति प्रकृति-पुरस्सरेण। पुष्पकस्य विशेषणमिदं तृतीयान्तम्। प्रकृतयः नाम प्रजाः, जनता वा। पुरस्सराः नाम-पूर्वगामिन्यः, अग्रगामिन्यः, अग्रसराः वा। अर्थात् प्रजाजनाः विमानस्य अग्रे अग्रे सरन्ति स्म, विमानं च मन्दगत्या अनुयाति स्म इत्याशयः। तदेव आह-

स्तिमित-जवेन = स्तिमितः जवः यस्य तत् स्तिमितजवम्, तेन इति। स्तिमितः नाम मन्दः, शिथिलः, मन्थरः वा। जवः नाम वेगः, रयः, गतिः, चालः वा इति। मन्दवेगेन, मन्दचालेन वा। पुष्पकेण = पुष्पक-विमानेन इति। क्रोशार्धम् = अर्धक्रोश-पर्यन्तम्। ईषद्दूरं गत्वा इत्याशयः। गत्वा = यात्वा, व्रजित्वा, गमनं कृत्वा, यात्रां कृत्वा इत्यर्थः। शत्रुघ्न-प्रतिविहितोपकार्यम् -शत्रुघ्नेन प्रतिविहिता उपकार्या यस्मिन् इति तत् शत्रुघ्न-प्रतिविहितोपकार्यम्। उपवनस्य विशेषणम् इदं द्वितीयान्तम्। शत्रुघ्नः = भरतसहोदरः, कैकेयीनन्दनः इति। प्रतिविहिता नाम संसाधिता, सज्जिता, सम्पादिता वा। उपकार्या नाम पट-मण्डपम्, मण्डपभवनं वा। शत्रुघ्न-सज्जित-पटमण्डपम्, शत्रुघ्न-सम्पादित-मण्डप भवनम् इत्यर्थः। उपवने शत्रुघ्नेन पूर्वमेव मण्डपगृहं सम्पादितम् आसीत् इति तादृशम् उपवनम्। उदारम् = सौविध्य-सम्पन्नम्, विविधोपचार-संयुक्तम्। सुख-सुविधा-परिपूर्णम् इत्याशयः। साकेतोपवनम् = साकेतस्य उपवनम् इति। साकेतः नाम अयोध्या-नगरी। उपवनं नाम विहार-वाटिका, विहार-विपिनं वा। अयोध्या-विहारविपिनम् इत्यर्थः। अध्युवास = अध्यवसत्, अध्युषितवान्,

अधिष्ठितवान् इति। तत्र अधिवासम् अकरोत् इत्याशयः। रामः तत्र विश्रामं प्राप्तवान् इति भावः।

अस्मिन् सर्गान्त-पद्ये प्रहर्षिणी नाम छन्दः विद्यते। तल्लक्षणं च- **म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्** इति। अर्थात् मगणः, नगणः, जगणः रगणः, गुरु : चेति।

## व्युत्पत्ति-दर्शनम्

**सन्धि-परिचयः-**

क्रोश + अर्धम् = क्रोशार्धम् - स्वरसन्धिः, सवर्णदीर्घः।

प्रतिविहित + उपकार्यम् = प्रतिविहितोपकार्यम् - स्वरसन्धिः, गुणः।

साकेत + उपवनम् = साकेतोपवनम् - स्वरसन्धिः, गुणः।

अधि + उवास = अध्युवास - स्वरसन्धिः, यण्।

**समास-परिचयः-**

क्रोशार्धम् - क्रोशस्य अर्धम् इति षष्ठीतत्पुरुषः।

प्रकृति-पुरस्सरेण - प्रकृतयः पुरस्सराः यस्य इति तेन - बहुव्रीहिः।

स्तिमित-जवेन - स्तिमितः जवः यस्य इति तेन - बहुव्रीहिः।

शत्रुघ्न-प्रतिविहितोपकार्यम् -

(i) शत्रुघ्नेन प्रतिविहिता इति शत्रुघ्न-प्रतिविहिता- तृतीयातत्पुरुषः।

(ii) शत्रुघ्न-प्रतिविहितोपकार्यम् इति - बहुव्रीहिः।

साकेतोपवनम् - साकेतस्य उपवनम् इति षष्ठीतत्पुरुषः।

**प्रकृति-प्रत्ययादि-परिचयः-**

गत्वा - गम् धातुः + क्त्वा - अव्ययप्रत्ययः।

स्तिमितः - स्तिम् धातुः + क्तप्रत्ययः - पुं. प्र. ए. व.।

प्रतिविहिता - प्रति + वि + धा-धातुः + क्तप्रत्ययः + टाप् - प्र. ए. व.।

अध्युवास - अधि + वस् धातुः + लिट्लकारः - प्र. पु. ए. व.।

★★★

## अभ्यास-विस्तरः

**(I) वस्तुनिष्ठाः प्रश्नाः-**

1. शब्दगुणं पदं किम् उच्यते?
2. सागरः केन परिवर्धितः आसीत्?
3. प्रह्लादनं ज्योतिः किं कथ्यते?
4. लोकान् संहृत्य कः समुद्रम् अधिशेते?

5. इन्द्रात् भीतभीता: पर्वता: कं शरणं प्राप्ता:?
6. रसातलात् पृथिवीं क: उद्धृतवान्?
7. रामेण पृथिव्यां बद्धमौनं किं दृष्टम्?
8. सीतावियोगे कस्मिन् पर्वते राम: अश्रूणि अमुञ्चत्?
9. रामेण कस्मिन् सरोवरे चक्रवाक-युगलानि सस्पृहम् ईक्षितानि?
10. अशोकलताम् आलिङ्गितुं तत्पर: राम: केन निषिद्ध:?
11. विमानस्य काञ्चन-किङ्किणीनां स्वरं श्रुत्वा केषां पङ्क्तय: आकाशं प्रति उत्पतन्ति?
12. सीताया: उत्सङ्गे शिर: निधाय राम: कुत्र सुप्तवान्?
13. भ्रूभङ्गमात्रेण क: नहुषं प्रभंशयाञ्चकार?
14. मुने: शातकर्णे: क्रीडासरोवरस्य किं नाम आसीत्?
15. सुराङ्गनानां विलासचेष्टाभि: क: विचलित: न अभूत्?
16. रामस्य प्रणतिं स्वीकृत्य तपस्वी सुतीक्ष्ण: स्वदृष्टिं पुन: कुत्र नियोजितवान्?
17. क: पर्वत: ककुद्मान् (वृषभ:) इव विभाति स्म?
18. भूमे: कण्ठगता मुक्तावली का नदी विभाति स्म?
19. कस्य वृक्षस्य पल्लवम् आदाय राम: सीताया: कर्णाभूषणं विरचितवान्?
20. कस्य ऋषे: तपोवने जन्तव: स्वयम् अनुशिष्टा: आसन्?
21. अनसूया कां नदीं तपोवने प्रवर्त्तयामास?
22. कस्य वृक्षस्य समक्षे सीता उपयाचनां कृतवती?
23. यमुनाया: जलस्य वर्ण: कीदृश: विद्यते?
24. कस्मिन् पुण्यजले स्नानमात्रेण मोक्ष: लभ्यते?
25. सरयूनदी कुत: निर्गच्छति?
26. इक्ष्वाकु-नृपतय: अवभृथं (यज्ञान्त-स्नानं) कस्यां नद्याम् अकुर्वन्?
27. सरयू-नदी केषां सामान्यधात्री इव मन्यते?
28. स्वस्य कृते राम: सरयूनदीं कया सह तुलयति?
29. क: अर्घ्यपाणि: रामम् अभ्युपेत:?
3`. भरत: कीदृशं व्रतम् आचरितवान्?
31. लक्ष्मणं व्युत्क्रम्य भरत: कौ अवन्दत?
32. भरत: कं भृशम् आलिङ्गितवान्?
33. किं रूपं धृत्वा वानर-सेनापतय: गजेन्द्रान् आरुरुहु:?
34. विमानमध्ये भरत: कां ववन्दे?
35. प्रजाभि: सह क्रोशार्धं गत्वा राम: कुत्र अधिवासं चकार?

**(II) बहुविकल्पात्मकाः प्रश्नाः-**

1. रामाभिधानः हरिः किं वीक्ष्य जायाम् (सीताम्) उवाच?

(क) आकाशम् (ख) रत्नाकरम्

(ग) पातालम् (घ) स्वर्गम् ( )

2. अश्वमेधयज्ञस्य अश्वं कः रसातलं नीतवान्?

(क) सगरः (ख) दिलीपः

(ग) कपिलः (घ) नारदः ( )

3. अर्कमरीचयः कस्मात् गर्भं दधति?

(क) समुद्रात् (ख) अरण्यात्

(ग) नक्षत्रसमूहात् (घ) प्राणिसमूहात् ( )

4. 'संहृत्य लोकान् पुरुषोऽधिशेते' इत्यत्र पुरुष-शब्दस्य कोऽर्थः?

(क) विष्णुः (ख) मनुष्यः

(ग) ब्रह्मा (घ) दैत्यराजः ( )

5. कस्मात् भयभीताः पर्वताः समुद्रशरणम् आश्रिताः?

(क) इन्द्रद्वेवात् (ख) दानवराजात्

(ग) विष्णोः (घ) शङ्करात् ( )

6. आदिभवः पुरुषः कः अवतारः कथ्यते?

(क) कूर्मावतारः (ख) मत्स्यावतारः

(ग) आदिवराहावतारः (घ) रामावतारः ( )

7. ऊर्ध्वाङ्कुर-प्रोतमुखं शङ्खयूथं कथम् अपक्रामति?

(क) सुखात् (ख) आनन्दात्

(ग) क्लेशात् (घ) स्वभावात् ( )

8. यथाविधः रामस्य मनसः अभिलाषः वर्त्तते, तथैव किं प्रवर्त्तते?

(क) समुद्रः (ख) वायुः

(ग) नदी (घ) विमानम् ( )

9. जनस्थानं निर्विघ्नं ज्ञात्वा पुनः उटजनिर्माणं के अकुर्वन्?

(क) तपस्विनः (ख) हरिणाः

(ग) राक्षसाः (घ) देवाः ( )

10. कस्मात् कारणाद् इव नूपुरं बद्धमौनम् आसीत्?

(क) सीताचरण-वियोगक्लेशात् इव (ख) भयङ्कर-वन-पतनात् इव

(ग) रावणभयात् इव (घ) रामहस्त-स्पर्शात् इव ( )

11. काः आवर्जित-पल्लवाभिः शाखाभिः रामं मार्गम् अदर्शयन्?

(क) लताः (ख) हरिण्यः

(ग) वाटिकाः (घ) चटकाः ( )

12. हरिण्यः नयनैः कस्यां दिशि मार्गसङ्केतम् अकुर्वन्?

(क) पूर्वस्याम् (ख) पश्चिमायाम्

(ग) उत्तरस्याम् (घ) दक्षिणस्याम् ( )

13. का चिराद् दृष्टा रामस्य मनः आनन्दयत्?

(क) पञ्चवटी (ख) सारसपङ्क्तिः

(ग) मृगाङ्गना (घ) मेघमाला ( )

14. ऋषिः अगस्त्यः भ्रूभङ्गमात्रेण कं प्रभंशयाञ्चकार?

(क) रावणम् (ख) मेघनादम्

(ग) नहुषम् (ख) कुम्भकर्णम् ( )

15. कः ऋषिः मृगैः सह चरन् दर्भाङ्कुरमात्रवृत्तिः अभूत्?

(क) शातकर्णिः (ख) सुतीक्ष्णः

(ग) अत्रिः (घ) अगस्त्यः ( )

16. सुतीक्ष्णः रामस्य सभाजने किं प्रयुक्तवान्?

(क) सव्येतरं भुजम् (ख) नयनसङ्केतमात्रम्

(ग) मधुरवचनम् (घ) उच्चस्वरम् ( )

17. कस्मात् कारणात् सुतीक्ष्णः मूर्ध्नः कम्पमात्रेण रामस्य अभिवादनं स्वीकृतवान्?

(क) अभिमानकारणात् (ख) मौनव्रतकारणात्

(ग) मूकता-कारणात् (घ) आलस्यकारणात् ( )

18. मन्दाकिनी नगोपकण्ठे का इव विभाति?

(क) मुक्तावली इव (ख) खग-पङ्क्तिः इव

(ग) मेघमाला इव (घ) धूमरेखा इव ( )

19. कः ऋषिः अग्निमध्ये स्वशरीरम् अपि आहुतवान्?

(क) शरभङ्गः (ख) अत्रिः

(ग) शातकर्णिः (घ) सुतीक्ष्णः ( )

20. अनसूया किमर्थं गङ्गां तपोवने प्रवर्त्तमायास?

(क) ऋषीणाम् अभिषेकार्थम् (ख) कृषि-करणार्थम्

(ग) परिमार्जनार्थम् (घ) तपःप्रभाव-प्रदर्शनार्थम् ( )

21. निवात-निष्कम्पतया शाखिनः (वृक्षाः) कीदृशाः प्रतीयन्ते?

(क) योगाधिरूढाः इव (ख) मृताः इव

(ग) जडाः इव (घ) चञ्चलाः इव ( )

22. फलितः वटवृक्षः केषां राशिः इव विभाति?

(क) मरकतमणीनाम् (ख) स्फटिकमणीनाम्

(ग) चिन्तामणीनाम् (घ) स्वर्णमणीनाम् ( )

23. गङ्गा कैः भिन्नप्रवाहा विभाति?

(क) यमुनातरङ्गैः (ख) सरयूतरङ्गैः

(ग) नर्मदातरङ्गैः (घ) गोदावरीतरङ्गैः ( )

24. 'समुद्र-पत्न्योः' इति पदेन कयोः अर्थः गृह्यते?

(क) सरयू-गोदवर्योः (ख) कावेरी-नर्मदयोः

(ग) गङ्गा-यमुनयोः (घ) शिप्रा-वेत्रवत्योः ( )

25. 'कैकेयि कामाः फलितास्तवेति' इति कस्य वचनम्?

(क) सुमन्त्रस्य (ख) निषादराजस्य

(ग) दशरथस्य (घ) भरतस्य ( )

26. तीरनिखात-यूपा का नदी?

(क) गङ्गा (ख) सरयूः

(ग) यमुना (घ) गण्डकी ( )

27. आसिधारं व्रतं कः अभ्यस्यति इव?

(क) रामः (ख) लक्ष्मणः

(ग) भरतः (घ) शत्रुघ्नः ( )

28. किं विदित्वा विमानं गगनात् अवततार?

(क) आदेशम् (ख) इच्छामात्रम्

(ग) क्रोधम् (घ) हासम् ( )

29. विमानात् अवतीर्णः रामः सर्वप्रथमं कं प्रणनाम?

(क) कुलगुरुंवसिष्ठम् (ख) वृद्धान् अमात्यान्

(ग) सेनापतीन् (घ) नागरिकान् ( )

30. प्रवृद्धश्मश्रुमुखाः मन्त्रिवृद्धाः कीदृशाः प्रतीयन्ते स्म?

(क) प्लक्षाः इव (ख) तपस्विनः इव

(ग) बालकाः इव (घ) पक्षिणः इव ( )

31. रामस्य दुर्जातबन्धुः कः?

(क) बाली (ख) सुग्रीवः

(ग) विभीषणः (घ) रावणः ( )

32. 'समरेषु पुरः प्रहर्त्ता' इत्यनेन कस्य परिचयः रामेण दत्तः?

(क) विभीषणस्य (ख) सुग्रीवस्य

(ग) हनुमतः (घ) जाम्बवतः ( )

33. कस्य आज्ञया वानर-सेनापतयः गजेन्द्रान् आरूढाः?

(क) रामस्य (ख) लक्ष्मणस्य

(ग) हृदयस्य (घ) स्वेच्छया एव ( )

34. क्षणदाचराणां प्रभुः कः?

(क) रावणः (ख) विभीषणः

(ग) रामः (घ) लक्ष्मणः ( )

35. सीतायाः चरणयुगलं, भरतस्य शिरः च समेत्य कीदृशम् अभूत्?

(क) अन्योन्यरोधकम् (ख) अन्योन्यबोधकम्

(ग) अन्योन्यपावनम् (घ) अन्योन्यधावनम् ( )

**(III) लघूत्तरात्मकाः प्रश्नाः-**

1. सगरपुत्राः पृथिवीं किमर्थम् अवदारितवन्तः?
2. भगवता विष्णुना सह समुद्रस्य किं साम्यं वर्त्तते?
3. सीता-वियोगे माल्यवत्पर्वते रामस्य कृते किं किम् असह्यम् अभूत्?
4. रामेण पम्पा-सरसि चक्रवाक-द्वन्द्वानि किमर्थं सस्पृहमीक्षितानि?
5. सारसपङ्क्तीनाम् विमानं प्रति आगमनस्य किं कारणं विद्यते?
6. पञ्चवटी किमर्थं रामम् आनन्दयति?
7. गोदावरीं विलोक्य रामः कं वृत्तान्तं स्मरति?
8. महर्षेः अगस्त्यस्य आश्रमात् उत्थितः यज्ञधूमः कीदृशः वर्तते?
9. मुनेः शातकर्णेः वृत्तान्तः यथासङ्क्षेपं लेखनीयः?
10. मुनेः सुतीक्ष्णस्य तपस्याभङ्गे इन्द्रः सफलः अभवत् न वा? इति सामान्यः वृत्तान्तः प्रदर्शनीयः।
11. नहुषस्य इन्द्रपदात् भ्रंशस्य कारणं किम् आसीत्?
12. विमानरूढं रामं विलोक्य तपस्विनः सुतीक्ष्णस्य का प्रतिक्रिया आसीत्?
13. शरभङ्गस्य तपोवनवृक्षाः कथम् इव अतिथि-सत्कारं कुर्वन्ति स्म?
14. केन कारणेन चित्रकूटपर्वतस्य ककुद्मता (वृषभेण) सह साम्यं कल्पितम्?
15. चित्रकूटस्य समीपे वहन्तीं गङ्गां विलोक्य रामः कां कल्पनां करोति?

16. मुने: अत्रे: तपोवन-प्रभाव: वर्ण्यताम्?
17. वृक्षाणां योगाधिरूढ-कल्पनां स्पष्टयत?
18. 'तत्त्वावबोधेन विनाऽपि मुक्ति:' इत्यत्र आशयं स्पष्टयत?
19. सरयू-नदी कीदृशं सलिलम् अयोध्यां प्रापयति?
20. कै: कारणै: सरयू-नदी उत्तरकोसलानां धात्री इव वर्णिता?
21. राम: केन कारणेन सरयूं स्वमातृतुल्यां कल्पयते?
22. विमानस्थ राम: भरतस्य आगमनं कथम् अनुमाति?
23. भरतेन मिलनात् पूर्वं राम: तस्य विषये किं किं चिन्तयति?
24. विमानाद् रामस्य अवतरणं वर्णयत?
25. भरतं दृष्ट्वा राम: किम् अकरोत्? इति वर्णयत।
26. सुग्रीव-विभीषणौ वन्दितुं भरत: किमर्थं लक्ष्मणं व्युत्क्रमितवान्?
27. लक्ष्मणम् आलिङ्गन् भरत: किमर्थं क्लेशम् अनुभूतवान्?
28. अयोध्याया: रथा: कीदृशा: आसन्? इति वर्ण्यताम्।
29. भरतलक्ष्मणाभ्यां सह विमानस्थितस्य रामस्य शोभां वर्णयत।
30. सीताया: चरणयुगलं, भरतस्य शिर: च कीदृशं वर्णनं कविना विहितम्?
31. अयोध्यां प्राप्य राम: कुत्र विश्रामं स्वीकृतवान्? इति वर्णयत।

**(IV) निबन्धात्मका: प्रश्ना:-**

1. रघुवंश-महाकाव्यस्य त्रयोदशे सर्गे समुद्रस्य कीदृशं सौन्दर्यं वर्णितम् अस्ति?
2. पुष्पक-विमानस्य वैशिष्ट्यं स्पष्टयत।
3. सीता-विरहे माल्यवत्पर्वते रामस्य करुणदशां वर्णयत।
4. पम्पा-सरोवरं विलोक्य राम: किं अतीतं स्मरति?
5. विमानारूढ: राम: पञ्चवटीं विलोक्य कानि दिनानि स्मरति?
6. विमानस्थित: राम: पञ्चवटीं विलोकयन् कानि कानि मुनि-चरितानि तपोवनानि च वर्णयति?
7. मार्गे तमालवृक्षं वटवृक्षं च विलोक्य राम: किं विशिष्टं वर्णयति?
8. गङ्गा-यमुनयो: सङ्गम-सौन्दर्यं वर्णयत।
9. 'कैकेयि! कामा: फलितास्तवेति' इति कथनं कस्य वर्तत्ते? तस्य आशयं चापि स्पष्टयत।
10. राम: सरयू-नद्या: किं महत्त्वं प्रदर्शयति?
11. सीताम् आदाय विमानेन अयोध्यां प्राप्तस्य रामस्य स्वागत-व्याहारं वर्णयत।
12. भरत: यदा सीता-चरणयुगं प्रणमति तदा कवि: कं भावविशेषं प्रकटयति?
13. लङ्कापुरीत: अयोध्यापुरी-पर्यन्तं यात्रायां रामेण वर्णितानां स्थानविशेषाणां क्रमश: नाममात्रेण उल्लेख: क्रियताम्?
14. रघुवंश-महाकाव्यस्य त्रयोदश-सर्गस्य सारांश: लेखनीय:।

15. रघुवंश-महाकाव्यस्य त्रयोदश-सर्गस्य आधारेण प्रकृति-वर्णने महाकवेः कालिदासस्य कौशलं प्रदर्शयत।

**(V) व्याख्या-भावादि सम्बद्धाः प्रश्नाः-**

(1) अधोनिर्दिष्टानां पद्यानां प्रसङ्गान्वयपुरस्सरा व्याख्या करणीया-

(क) गुरोर्यियक्षोः ---------------------- परिवर्धितो नः।।

(ख) गर्भं दधत्यर्क --------------------- ज्योतिरजन्यनेन।।

(ग) नाभिप्ररूढाम्बुरुहासनेन-------------- अधिशेते।।

(घ) मुखार्पणेषु --------------------- च सिन्धूः।।

(ङ) वेलानिलाय -------------------- फणस्थैः।।

(च) तवाधरस्पर्धिषु ------------------ शङ्खयूथम्।।

(छ) करेण वातायनलम्बितेन ------------ घनस्ते।।

(ज) अमी जनस्थानम् ---------------- आश्रममण्डलानि ।।

(झ) सैषा स्थली यत्र ---------------- बद्धमौनम्।।

(ञ) एतद् गिरेर्माल्यवतः -------------- समं विसृष्टम्।।

(ट) गन्धश्च धाराहत ----------------- विना त्वया मे।।

(ठ) आसारसिक्तक्षिति --------------- अरुणलोचनश्रीः।।

(ड) इमां तटाशोकलतां च ------------ साश्रुरहं निषिद्धः।।

(ढ) अत्रानुगोदं ------------------ सुप्तः।।

(ण) पुरा स दर्भाङ्कुरमात्रवृत्तिः -------------- यौवनकूटबन्धम्।।

(त) अमुं सहास ------------------ विभ्रमचेष्टितानि।।

(थ) एषोऽक्षमालावलयं --------------- इतः प्रयुङ्क्ते।।

(द) छायाविनीताऽध्व --------------- पादपेषु।।

(ध) धारास्वनोद्गारि --------------- चित्रकूटः।।

(न) एषा प्रसन्नस्तिन्तिप्रवाहा --------------- भूमेः।।

(प) क्वचिच्च कृष्णोरग ----------------- यमुनातरङ्गैः।।

(फ) समुद्रपत्न्योः ------------------ नास्ति शरीरबन्धः।।

(ब) सेयं मदीया जननीव ------------------ उपगूहतीव।।

(भ) पित्रा विसृष्टाम् --------------- व्रतमासिधारम्।।

(म) इक्ष्वाकुवंशगुरवे --------------- महाभिषेके ।।

(य) दुर्जातबन्धुरयम् --------------------- भरतो ववन्दे।।

(र) सौमित्रिणा तदनु -------------------- उरःस्थलेन ।।

(ल) भूयस्ततो रघुपतिः ---------------- अभ्रवृन्दम्।।

(व) तत्रेश्वरेण जगताम् ------------------ भरतो ववन्दे॥

(श) लङ्केश्वरप्रणतिभङ्ग ----------------- उभयं समेत्य॥

(2) अधोनिर्दिष्टानां पद्यानां भावसौन्दर्यं प्रकाशयत (भावार्थं लिखत इति)-

(क) प्रवृत्तमात्रेण पयांसि पातुमिति।

(ख) मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षाः इति।

(ग) पूर्वानुभूतं स्मरता च यत्रेति।

(घ) अत्रावियुक्तानि रथाङ्गनाम्नामिति।

(ङ) एषा प्रसन्नस्तिमितप्रवाहेति।

(च) वीरासनैर्ध्यानजुषामृषीणामिति।

(छ) क्वचित् प्रभालेपिभिः --- इत्यादिपद्यचतुष्टये गङ्गायमुना-सङ्गमस्य इति।

(ज) यां सैकतोत्सङ्गसुखोचितानामिति।

(झ) भूयस्ततो रघुपतिरिति।

(ञ) लङ्केश्वरप्रणतिभङ्गदृढव्रतमिति।

(3) अलङ्कारदृष्टि-निष्ठाः प्रश्नाः-

(क) रघुवंश-महाकाव्यस्य त्रयोदश-सर्गान्तर्गतानि उपमालङ्कारस्य कानिचित् पञ्च उदाहरण-रूपाणि पद्यानि यथेष्टं प्रदर्शयत।

(ख) मालोपमायाः किमपि एकम् उदाहरणं त्रयोदश-सर्गगतं प्रदर्श्यताम्।

(ग) उत्प्रेक्षाऽलङ्कारस्य किमपि पद्यद्वयं त्रयोदश-सर्गात् चिनुत।

(घ) 'उपमा कालिदास्य ' इत्यस्मिन् विषये स्वविचारान् प्रकटयत।

★★★